श्रीरस्तु

BHAIMÎPARINAYA NÂTAKAM

भैमीपरिणयन्नाम नाटकम्

(नलविजयापरनामकम्)

श्रीमन्महीशूरमहाराजकृष्णराजेन्द्रास्थानपण्डितेन

मण्डिकल् रामशास्त्रिणा

विरचितम्

महिशूरपुरे

राजकीय शाखा मुद्राक्षरशालायां मुद्रितम्

श्रीमन्महाराजानुज्ञया प्रकाशितञ्च सत् विजयते तराम्

1914



His Highness Sri Krishnarajendra Woodier Bahadur, G.C.S.I.,
Maharaja of Mysore

श्रीरस्तु

BHAIMÎPARINAYA NÂTAKAM

भैमीपरिणयन्नाम नाटकम्,

(नलविजयापरनामकम्,)

श्रीमन्महीशूरमहाराजकृष्णराजेन्द्रास्थानपण्डितेन

मण्डिकल् रामशास्त्रिणा

विरचितम्,

महिशूरपुरे

राजकीय शाखा मुद्राक्षरशालायां मुद्रितम्,

श्रीमन्महाराजानुज्ञया प्रकाशितञ्च सत् विजयते तराम्.

1914.

विज्ञापना.

१. पुण्यश्लोकं नलमुपश्लोक्यात्मानं कृतार्थयितुं चिरपरिचितसाङ्गसाहित्यविद्यानुभवं सज्जनसमाह्लादनेन सफलयितुञ्च प्रवृत्तेन मया कालिदास-दण्डि-भवभूति-बाण-राजशेखर-विशाखदत्तादीनां महाकवीनां सरणीस्साधु सम्भाव्य, प्रकृतकालस्थितीरप्यनुसन्धाय, यथामति भैमीपरिणयं नाम साङ्कं नाटकं निरमायि.

२. अत्रत्येतिवृत्तक्रमस्सर्वोपि विषयानुक्रमणिकायां प्रदर्शितः.

३. नाटकेस्मिन् तत्रतत्र संवादमुद्रया, निदर्शनमुद्रया, निषेधमुद्रया, प्रशंसनादिमुद्रया च भावुकभावानुभाव्यास्तेते रसभावादयः तास्ता नीतयश्च प्राकाशिषत.

४. प्रायशस्स्वभावोक्तिरेवात्र समुन्नतिमनीयत.

५. प्रतिपाद्यार्थप्रत्ययापादनार्थं तत्रतत्र प्राचीनवचनान्येव प्रादर्शिषत.

६. दृढानभ्यस्तप्राकृतभाषाणां पठितॄणां सौकर्यार्थं प्राकृतभाषां अधःप्रदर्शिततिर्यग्रेखाधस्स्थले विलिख्य, उपरि संस्कृतभाषामात्रं व्यलेखि.

७. किञ्च—

> "क्वचिच्च, देवीगणिकामन्त्रिराजादियोषिताम् ।
> योगिन्यप्सरसां शिल्पकारिण्या अपि संस्कृतम् ॥"

इति शास्त्रमनुसृत्य देव्याः दमयन्त्याः, योगिन्यास्सिद्धिमत्याः, मन्त्रिपुत्र्याश्शारदायाः, अप्सरसां रम्भादीनां, शिल्पकारिण्योः केशिनीबृहत्सेनयोश्च संस्कृतव्यवहारं परिकल्प्य, अन्येषां नटीचेटी-वणिग्बालव्याधादीनां प्राकृतभाषयैव व्यवहारः प्रदर्शितः.

८. तदिदं नाटकमस्मत्स्वामिने श्रीमन्महाराजकृष्णराज-सार्वभौमाय निवेद्य, तत्समाज्ञयैव प्राकाश्यमनीयत.

९. अपिच–श्रीमन्महीशूरमहाराजकृष्णराजेन्द्रास्थानद्वितीयामात्येन महाराजमातुलेन अभिज्ञेन च श्रीमता कान्तराजेन तदिदं नाटकं सावधान मामूलाग्र माकलय्य, राजकीयशाखा-मुद्राक्षरशालायां मुद्रणाय सादरमाज्ञा प्रादायि.

१०. ततस्तदाज्ञासमुल्लसितैः मयि निरन्तराव्याजप्रेमबन्धानुप्रेरितैश्च,

आस्थानधर्माधिकारिभिः नवीनरामानुजाचार्यैः,
आस्थानधर्माधिकारिभिः पुङ्गनूरुराघवेन्द्राचार्यैः,
महाराजसंस्कृतमहापाठशालाव्याकरणपण्डितैः
रामकृष्णशास्त्रिभिः,

साहित्यविद्यानवद्यपण्डितैर्हासन नरसिंहशास्त्रिभिश्च,

इत्येतैर्विद्वद्भिरेतन्निबन्धनं साधु परिशील्य तत्रतत्र कश्चित्कश्चिदंशं संसूच्य सोहमन्वग्राहिषि. तत्तत्प्रदत्ताश्चानुमोदनपत्रिकाः उत्तरपुटेषु योजिताः.

११. अस्याः कृतेः श्रीमद्भिः चीफ् इञ्जनीयर् पदमधितिष्ठद्भिः कर्पूरं श्रीनिवासरायमहाशयैः आङ्ग्लेयभाषया उपोद्घातश्च प्रसञ्जितः.

१२. उपरिप्रदर्शिततत्तत्सहायकमहाशयानां विषये सुतरां कृतज्ञतामनुवर्ते.

१३. अस्मिन्ग्रन्थे यः कोपि दोषस्सन्दृश्यते चेत्, तदिदं-पुस्तकमालोकयन्तो महान्तस्तं, मां बोधयन्तो मम दयेरन्निति भूयोभूयः प्रार्थये.

मण्डिकल् रामशास्त्री,
आस्थान महाविद्वान्,
मैसूरु.

विषयानुक्रमणिका.

2. पुष्करकृतदमयन्त्यपहारोद्यमप्रकारप्रदर्शनम्.
3. ततो वन्दिना पुरजनपरिजनप्रोत्साहवर्णनपूर्वकं राजसमाजसम्मेलनवर्णनम्.
4. शारदया सख्या दमयन्त्यै महीपालेषु प्रदर्श्यमानेषु, सवैदर्भाणां पञ्चानां नलानां आगमनम्.
5. सर्वेषां नलानां वैदर्भाणां च स्वस्वतथ्यत्वप्रदर्शनप्रकारः.
6. सम्भ्रान्तिखिन्नया भैम्या स्तुतिकरणात् प्रसन्नेष्विन्द्रादिषु प्रमोदान्नलकण्ठे वरणमालिकार्पणम्.
7. विवाहनिर्वर्तनाय वैदर्भेण नले सर्वैस्सह गृहाभ्यन्तरं नाते विमनायमानस्य बहुधा प्रलपतः पुष्करस्य स्वयंवरस्थानात्स्वयं निर्गमनञ्चाभ्यधायि.

चतुर्थेऽङ्के—

1. ब्राह्मणसमुदायसल्लापकल्पनद्वारा यथाविधिनिर्वृत्तभैमीपरिणयवैभववर्णनम्.
2. दमयन्त्याः पतिगृहप्रस्थानमुपदर्श्य लोके दुहितॄणां पतिगृहं प्रति प्रथमप्रस्थानप्रसङ्गेषु यानियान्यनुशोचनान्यनुशासनान्यनुकम्पनादीनि च स्वाभाविकानि, तानि सर्वाण्यपि प्रदर्शितानि.

पञ्चमेऽङ्के—

1. कलिद्वापरयोस्संवादः.
2. दमयन्तीप्राप्त्युपायलाभेन प्रहृष्यता पुष्करेण सविनयमुपसृत्य च्छलेन नलस्य द्यूते प्रवर्तनम्.
3. पुष्करकृतनलसर्वस्वापहारप्रकारः.
4. नलेन देव्या सह सम्मन्त्र्य पुत्रयोस्तन्मातामहगृहाय प्रेषणम्.

5. पौरप्रार्थनामप्यवधूनयतो नलस्य देव्या सह वनगमनप्रकारश्च प्रदर्शितः.

षष्ठेऽङ्के—

1. देव्या सह घोरे वने सञ्चरतस्तस्यै विविधवनवृत्तानि प्रबोधयतो नलस्य कनकमयविहङ्गकृतवस्त्रापहारप्रकारः.
2. ततो विमनायमानेन राज्ञा विदर्भगामिमार्गोपदेशाच्छङ्कितां देवीं समाश्वास्य तया सह सायं शयनार्थं जीर्णशिलामण्डपभजनम्.
3. अथ निशीथे समुत्थाय समालोच्य निद्राणां देवीमुत्सृज्य गच्छतो राज्ञः कथञ्चित्कृच्छ्रान्निर्गमनप्रकारः.
4. ततस्सुप्तोत्थितायाः पतिमनालोक्य सत्रासमाक्रन्दन्त्याश्च देव्यास्तत्रतत्र तदन्वेषणाय प्रस्थानप्रकारेश्चाभ्यधायि.

सप्तमेऽङ्के—

1. गहने वने पतिमन्विष्यान्विष्य विषीदन्त्याः स्वाभिमुखागतस्य किरातराजस्य दुर्गसेनस्य दर्शनाद्भीतायाश्च देव्याः गुल्मोदरप्रवेशः.
2. तत्राजगरेण देव्यां गिलितायां दुर्गसेनेनागत्य वाहसं द्वेधा विदार्य देव्यास्समाश्वासनम्.
3. ततो देवीं कामयमानस्य तस्य वचनैरचनाक्रममाकर्ण्य प्रकुपितायाः देव्याः पातिव्रत्यप्रभावादशनिपातेन तन्निधनम्.
4. देव्यां वनान्तरं गतायां तत्र तां वशयितुं मृगयाच्छलेन वनमागतेन पुष्करेण सह देव्यास्संवादः.

5. देव्या च च्युतदत्ताक्षरादिवाग्भङ्गीमङ्गीकृत्य तद्वादनिराकरणम्.

6. तावद्देवीं दिदृक्षोः पताकानायकस्य महर्षेर्वामदेवस्यागमनात्पुष्करस्य निवर्तनम्.

7. वामदेवेनापि सभक्तिप्रकर्षं देव्यै फलपुष्पताम्बूलादिकं समर्प्य आकाशात्पक्षिभिः पातितं मया गृहीतं चेदमित्युक्त्वा नलीयं प्रणष्टं पीताम्बरञ्च प्रदाय बहुधा प्रशस्य स्वाश्रमाश्रयणम्.

8. ततश्चोरापहृतवसनया विग्रया च मित्रादिन्या समागत्य देव्या सह सख्यं कृत्वा देव्यां सायंसंध्यार्थं निर्झरं गतायां देवीदत्तफलपुष्पताम्बूलपीताम्बराण्युपयुज्य निकुञ्जद्वारि देवीप्रत्यागमनप्रतिपालनम्.

9. तावत्पुष्करेण पुनस्समागत्य तमसि देवीभ्रान्त्या चाटुभिस्तामनुनीय समालिङ्ग्य तया सह पटगृहवाटीपरिसराश्रयणम्.

10. तदनु देव्याः मार्गभ्रंशात् चोदपुरगामिवणिक्सार्थशिबिरसान्निधिमेत्य शतकोटीश्वरेण वणिक्पतिना कामदासेन चोरेति सन्तर्ज्य साधु समालोक्य सकामं सप्रलोभनं च सम्प्रार्थ्यमानायास्तत्प्रार्थनामवधूय, तावद्गजव्रजावमर्दिते सबान्धवे तस्मिन् निहते ततो निर्गत्य कालिकायतने निलयनम्.

11. तावत्तत्र द्वादशवर्षदेशीयं बालकं बलीकर्तुमुद्यतानां व्याधानां संवादान् श्रुत्वा बालरिरक्षिषया देव्यां

कालीकरगतं खड्गमाकृष्य सरभसं बहिः निर्गतायां, भयात्पलायितेषु व्याधेषु बालेन देवताबुध्या देवीं सम्प्रार्थ्य खड्गं गृहीत्वा व्याधानुधावनकरणम्.

12 तदनन्तरमतर्कितोपनतमित्रादिनीमुखात् बालकृतव्याधभञ्जनं तस्य स्वमातुलाभ्यां दमदमनाभ्यां सह स्वपुरगमनं च श्रुत्वा प्रतुष्टायाः देव्याः मित्रादिन्यै स्वरत्नवलयमेकं पारितोषिकीकृत्य तया सह चेदिपुराय प्रस्थानञ्च, इत्यादयोऽत्र विषयाः सुललितेन सन्दर्भेण प्रादर्शिषत,

अष्टमेऽङ्के—

1. अधिकरणलेखकस्य लेखायनस्य प्रवेशनिर्गमव्याजेन प्रभुकार्यप्रमादेनामनर्थापातादेः प्रदर्शनपूर्वकं भ्रमप्रमादादिना कामक्रोधादिना वा पुरुषदोषेण न्यायान्याययोर्व्यत्ययो भवत्येव, तथापि सत्यमेव स्वयमूर्जितं भवतीत्याद्यर्थबोधानार्थं अधिकरणव्यवहारं परिकल्प्य चेदिराजस्य व्यवहरणविचारणार्थमधिकरणप्रवेशश्च कल्पितः.

2. ततो देव्यामसाधु व्यवहरता धनसेनेन राज्ञे कूटव्यवहारनिवेदनम्.

3. बन्दीकृतायाः देव्याः वेत्रिभिर्विचारणार्थमधिकरणस्थानानयनम्.

4. अधिवक्त्रा चण्डवर्मणा धनसेनपक्षमाश्रित्य देवीं विचार्य राज्ञे संगृहीतार्थनिवेदनपूर्वकं नैषध्यसौ सवस्त्राभरणा पत्युर्धनसेनस्य वशे स्थापनीयेति समभ्यर्थनम्.

5. पौरैर्न्यायदर्शिभिरनुमोद्यमाने तदभ्यर्थने अमात्येनानभ्युपगते च सति देव्या स्वजनानुस्मरणपूर्वकमात्मानुशोचनम्.

6. तावत्पुरजनमध्यात्समुत्थाय हृष्टा सुदेवनाम्ना ब्राह्मणेन राज्ञे विज्ञापिते देवीवृत्तान्ते राज्ञा देवीं बहुमान्य अपराधिनां दण्डानुशासनम्.

7 ततो देव्या सदयं प्रतिषिद्धे तद्दण्डकल्पने तद्वचनगौरवाद्राज्ञा तान्विमोच्य देव्याः स्वमातुस्सुनन्दाया स्समीपनयनञ्च, इत्यादयोर्था स्सरसेन सन्दर्भेण प्राकाश्यन्त.

नवमेऽङ्के—

1. गङ्गातीरे अतिथिसत्कारपरस्य सत्यव्रतनामधारिणो नलामात्यस्य बाहुकरूपप्रतिच्छन्नेन नलेन सह सल्लप्य कृषेस्सर्वोत्तमजीविकात्वञ्च प्रदर्श्य कर्षकप्रशंसनपूर्वकमवस्थानम्.

2. तीर्थव्रतेनागत्य सत्यव्रताय दमयन्त्यास्स्वपितृगृहप्राप्तिनिवेदनम्.

3. निषधेभ्यस्तैस्तैः पौरैर्जानपदैश्च समागत्य कलिकालराज्यस्थितिलोकस्थित्योर्निरूपणम्.

4. पथिकेन पर्णादनाम्ना ब्राह्मणेनागत्य दमयन्तीद्वितीयस्वयंवरवृत्तान्तनिवेदनम्.

5. बाहुकपर्णादयोस्तद्विषये वाग्वादः.

6. दमयन्तीस्वयंवरजिगमिषुणा ऋतुपर्णेन दुर्धरमुखात्समाहूतस्य बाहुकस्य ऋतुपर्णसन्निधिगमनं च प्रदर्शितम्.

दशमेऽङ्के—

1. ऋतुपर्णसारथीभूय बाहुकस्य अयोध्यातः प्रस्थानम्
2, मार्गे बाहुकऋतुपर्णयोस्संलापः.
3. बाहुकऋतुपर्णाभ्यामश्वहृदयाक्षहृदययोः परस्परमुपदेशनम्.
4: बाहुकेन विभीतकतरुमेत्य कलिविधूननम्.
5, ऋतुपर्णेन सह बाहुकस्य कुण्डिनपुरप्रवेशः.
6. बाहुकतत्त्वजिज्ञासया दमयन्तीबृहत्सेनयोस्संवादः.
7. केशिन्या बाहुकवृत्तान्तनिवेदनम्.
8. अभ्यन्तरमन्दुरायां भैमीबाहुकयोः प्रश्नोत्तरप्रकारः.
9. रूपाहरणनामकनाटकावलोकनार्थं कञ्चुकिमुखाद्वैदर्भाहूतायाः देव्याः बाहुकस्य च रङ्गस्थानगमनम्.
10. पूर्वरङ्गं प्रसञ्जयता सूत्रधारेण प्रविश्य सामाजिकाभिमुखीकरणपूर्वकं संक्षिप्य प्ररोचनां प्रदर्श्य प्रस्तावनावतारणम्.
11. घोरे वने तमसि निद्राणां दयितां विसृज्य गतस्य नलस्य परिदेवनप्रकारः.
12. अभयार्थिनः कर्कोटकस्य परित्राणार्थं नलस्य दावाग्निप्रवेशः.
13. कर्कोटकदंशनान्नलस्य कुब्जरूपावाप्तिः.
14. कर्कोटकेन दिव्यरूपेणागत्य नलमनुनीय दिव्ये वस्त्रद्वये प्रदत्ते सर्वनटनिर्गमनम्.
15. ऋतुपर्णेन सभयमागत्य बाहुकानुनयनम्.

16. ततो नलेन दिव्यवसनधारणाद्बाहुकरूपं परित्यज्य स्वरूपेण दमयन्तीं प्रतिगृह्य स्वयंवराशया समागतेन पुष्करेण सह अक्षद्यूतकरणम्.

17. ततो नलविजयः.

18. ततो वामदेवेन महर्षिणा समागत्य प्रसञ्जितो नलस्य राज्ञः पुनःपट्टाभिषेकः, प्रशस्तिभरतवाक्यश्चेति सर्वं वस्तु सरसेन सन्दर्भेण सन्दर्शितमिति सर्वमनवद्यम्.

शोधनपत्रिका.

पुटे.	पङ्क्तौ.	अशुद्धम्.	शुद्धम्.
8	11	देव ?	देव !
14	21	णष्ठाः	णष्टाः
16	2	सेन्ने	सन्ने
20	13	धिधे	विधे
21	16	दमन्ती	दमयन्ती
27	9	मेतत्.	मेतत् ?
35	2	प्रत्रिका	पात्रिका
54	7	कात्र !	कात्र
75	14	द्धूप्य	धूप्य
93	10	याजय	योजय
95	1	गुरुवः	गुरवः
109	5	गुण	गुणा
118	20	निष्क्रन्तः	निष्क्रान्तः
190	18	मासं	मांसं
197	15	णिणिपडि	णिपडि
230	9	माक्स्पा	भाक्स्या
232	12	अस्थान	आस्थान
233	9	ठथब	व्यव
,,	10	किन्वेव	किन्न्वेव
236	11	ह्तं	हृतं
238	2	क्रार्षी	कर्षी
240	11	तत्व	तत्त्व
245	13	श्रयम्	श्रयेम्
248	13	भ्रय	भ्राय

INTRODUCTION.

THIS is not the place to dilate upon the excellent merits of Sanskrit literature in general or of the dramatic branch of that literature in particular. Suffice it to say that, after the recent discovery of as many as fourteen dramas of the great poet Bhasa, whom even the famous Kalidasa has mentioned as his model, it has been established from external and internal evidence available from these works, that this author must have lived not later than the second or third century before Christ. From a critical study of these old works it is seen that the Sanskrit drama had attained a high degree of perfection, even so early as the time of Bhasa, and it is therefore not unreasonable to conclude that the beginnings of our Indian dramatic literature can be traced to periods much earlier than the works of the great Greek dramatists. This is also borne out by the researches of Sir Monier Williams who, in his Indian Wisdom, has stated that the origin of the Sanskrit drama is "lost in remote antiquity." In fact, the Indian dramatic literature may be considered almost as old as the Mahabharata. The direct or conversational style employed for unfolding the varied incidents of this great epic may be taken to indicate the beginnings of the Sanskrit drama.

It is true that the dramas, now extant, are not many. The reasons for this are not far to seek. Considering the great vicissitudes through which India has passed, the want of printing facilities and the effect of foreign invasions, and considering also that the Indian mind has got a predominant tendency towards philosophical and Vedantic studies, it is natural that the dramatic literature must have been relegated to the background. But there is no reason to think that good and excellent additions to this branch of literature have not been made from time to time by eminent Pandits, many of whom were patronised by Hindu sovereigns in various parts of India. Even in comparatively modern times, many dramas were written by Pandits in the Court of the Mahratta Chiefs of Tanjore, and some of them have been recently discovered and published. Many good Sanskrit works have been written by eminent Pandits under the encouragement of our own Maharajas, notably His Highness the late Sri Krishnaraja Wadiyar Bahadur. True to his traditions, our present beloved sovereign is also well known as a patron of learning in all branches; and the present publication is one of the many tokens of the sympathetic encouragement, enlightened appreciation and munificent liberality of His Highness the Maharaja.

People often talk of our ancient Sanskrit as being a dead language. But certainly the language of the great Rishis of Vedic renown, of Vyasa and Valmiki, of Kanâda and Goutama, of Sankara and Ramanuja,

of Bana and Sri Harsha, and above all, of the great dramatists, Kalidasa and Bhavabhuti, cannot be called *dead* in any real sense of the word. If the manners and customs, the traditions and folklore, the religion and philosophy of this vast Indian continent, teeming with millions of souls—if all this is at all to be considered living, then the language of the authoritative works on which they are all based and which are favourite household words in every part of India cannot but be considered living also.

Nor is this all. No other language in the world can lay claim to have such a strong-hold on the minds and affections of so vast a population from such ancient times. The fact that our great works have survived so long in spite of so many counteracting influences and that a large number of Pandits in all parts of India can even now hold free conversation, give discourses and write excellent works in this divine language, goes to establish the fact that the Sanskrit language is not *dead* but eminently living. The production of excellent works in Sanskrit, and the eagerness with which they are studied even in these days of modern scientific and practical developments on western lines, give ample proof that there is still considerable vitality in our ancient language. If timely steps are taken to rejuvenate it, it will soon be restored to its pristine life and vigour.

The present work, to which this is a foreword, is one such effort in that direction. The publication bears ample testimony to the ability of its author to

write simple and elegant Sanskrit, not inferior to his classic models. He shows he is no mean poet in the music of his verses and in the cadence and pathos of the utterances put into the mouths of his characters. The book is full of the mellow experience of human life and contains valuable teachings.

But the question may arise why the almost threadbare story of Nala and Damayanthi has been chosen as the subject of this work; and why indeed that the same old stories are written and rewritten in India by almost every author worth the name. The aim of all good literature is to serve as a silent, and yet a very effective, teacher of mankind. Such teaching can only be possible through the delineation of well chosen characters, who can be taken as so many types of humanity. Our great popular heroes easily lend themselves to serve as models to mankind for all ages and times. Such characters must be placed not merely on the ordinary human platform; for then, it would not be possible to secure that intensity of delineation, so essential to all high class literature. The passions and emotions depicted must be eminently human, and yet, the characters must be capable of displaying them with an intensity of effect, without any grotesqueness or incongruity. Our great poets have solved this double problem by placing their principal characters on a somewhat higher platform than that of human beings. Curiously enough, the key-note of the Greek drama is also based on this important principle. Taking the familiar example of

the Ramayana, we have the characters of Rama and Ravana—Rama with his superhuman and yet eminently human qualities, to serve as an object lesson to be admired and copied; and Ravana, as the reverse. Thus, very valuable lessons are silently brought home to all readers of the Ramayana, that it is good to act like Rama, while it would be equally desirable to avoid the ways of Ravana.

The dominant principle that the hero should serve as a model for things considered good and the counter-hero, for things to be shunned, has been kept in view by our author in choosing his characters. Nala and Pushkara, as delineated in this work, produce more or less the same effect as the more famous characters of Rama and Ravana. Nala indeed is a very popular hero of India, attributed with some divine virtues. It is on this account that it has become possible for our author to delineate Nala's characteristics in the present work in a manner suitable to the tastes of modern India also.

The more important features of the story and what lessons may be learnt from it, may now be noticed. Prince Nala and Princess Damayanthi, both endowed with excellent qualities, fell in love with each other on hearing of their respective merits. Each is consumed by a longing to secure the other and an opportunity is afforded through the Swayamvara celebration.

Here, it is necessary to distinguish the love of Nala towards Damayanthi from that of Damayanthi

to Nala. Nala is eminently a man, a model man indeed. He should not therefore do anything that would detract from his manly virtues. Among these virtues, love to his bride should only form a part of the many obligations which man as such has to fulfil. Helping others even at much self-sacrifice, braving the dangers of life with fortitude and courage, and holding to SATYA or truth through thick and thin, are more essential qualities in a perfect man, than the mere domestic virtues of love towards one's wife and children. Nala is put to severe tests in each of these directions and he undergoes the ordeal in an admirable manner.

First, we have the almost unreasonable request of the four Lokapalas, Indra, Yama, Agni and Varuna, who have also fallen in love with Damayanthi on account of her almost divine beauty. Nala recognises that these demi-gods are really more deserving than himself to partake of the good things of this world. It was not in the nature of Nala to refuse any reasonable request. He considered his life not worth living, if his selfish motives prompted him in this unworthy direction. He was ready to give up his own life for others in a good cause. Seeing the earnestness of the evidently more deserving demi-gods, he did not hesitate to give up something more valueable than even his own life. Nala had considered Damayanthi dearer than his own life; and he would not have been true to himself if he had refused the request of the Lokapalas and acted in a manner con-

trary to his avowed principle. He therefore readily consented to obey the commands of the gods, to plead their cause before Damayanthi and to secure her hand to one of them. This action, when properly analysed, was really a source of great satisfaction to himself, as acting true to one's principles of self-sacrifice must, indeed, prove of greater pleasure to a character like Nala than gaining the hand of Damayanthi herself. This is the key to the Lokapala incident.

The same incident brings into equal prominence the excellent virtues of the eminently feminine Damayanthi. Her one aim in life is to choose a fitting lord and to adhere and persevere in her attachment to such a lord through all trials and difficulties. Nala was such a lord and none could replace him in her heart. Even the great Lokapalas must be kept out, if her true feminine virtues are to be upheld. Damayanthi proves true to the test set to her by the Lokapalas. She flatly refused the request of Nala made on behalf of the Lokapalas. They would not be baffled by this refusal. They contrived to make it impossible for her to choose Nala in the Swayamvara mantap by all four of them assuming the exact form of Nala. But Damayanthi rose equal to the occasion. She challenged the Lokapalas that her attachment to Nala could not be shaken by all their attempts, and that she would in spite of them choose her own dear lord by the strength of her SATYA. They were pleased with the genuineness of her affections and made it possible for Damayanthi to choose her real lord.

They went further and showered their blessings on the new pair. It is therefore that Damayanthi is rightly held up as an ideal to be followed by women in all ages and climes.

Nala would not have served as a model if he had not been put to more severe tests; and if he had not proved invulnerable at every point. The great virtues in a hero serve as direct lessons to mankind. But an indirect lesson can also be drawn from the same heroes, if they are also endowed with a modicum of human weakness. Calamities must result from such weaknesses; and the manner in which these are overcome by the heroes, acts as an indirect lesson to us, ordinary mortals. Taking again the familar illustration from the Ramayana: Rama was led away by the intense desire of Sita to have the golden antelope, although he ought not to have been so led away. Sita too wrongly imputed evil motives even to Lakshmana, when he refused to leave her alone in the forest. These are small foibles in the character of the hero and the heroine of the Ramayana, and the progress of the whole story is rendered possible by them. If these foibles had been avoided, the characters would not have served as human types and we would also have missed the story itself as well as the resulting moral lessons.

So also in the case of Nala, the weakness of yielding to the temptation of playing at dice, forms the central hinge of the story. Pushkara, who had also been anxious to marry Damayanthi, bore a special

grudge to Nala ever since the latter gained her hand. He wanted to separate the pair so that he might secure Damayanthi to himself. Having tried this in many ways, he at last tempts Nala to gamble. With this object he presents Nala with a set of charming dice, with a false story that this set was used by the ancestors of Nala. Nala was flattered by this present. Though till then innocent of gambling, he is tempted by the mere possession of the charming dice, to go so far as to compel the counter-hero, Pushkara, against his pretended unwillingness, to gamble with himself. As the result of such gambling, Nala loses his all, including his kingdom, and is banished into the forest with his wife. This shows clearly that, if one like Nala could not resist the temptation once he had the means of indulging in it, we ordinary mortals should keep miles and miles away from such tempting ways, to be able to lead a peaceful and virtuous life in this world.

A word may be said of the trials to which Damayanthi was subjected. While wandering with her husband, Damayanthi was left alone in the forest by Nala, so that she might find her way to her father's house and be thus relieved of the hardships of such wandering life. In her lonely wanderings, she finds a friend of her family and at last is restored to her parents. There, however, the desire to see her lord, Nala, overpowers her, so much so that she was ready to face direct unpopularity and social ostracism; all with the idea of making sure whether her lord was

at all alive and, if possible, of securing reunion with him. So at her instance, a proclamation was made that Damayanthi would be married again in a second Swayamvara. Happily, Nala in the garb of a charioteer to Rutuparna, goes to the Swayamvara. The author here skilfully introduces an internal drama, as in the Hamlet and the Uttara-Rama Charitra, giving an account of the wanderings of Nala after he left Damayanthi in the forest; and convincing proofs are brought forth to identify the charioteer himself with the real Nala. Thus the Swayamvara ends in the reunion of the separated couple. Then, Nala who had acquired the secrets of gambling from Rutuparna, challenged the same Pushkara once more for a game, or defeated him and gained his lost kingdom. Here ends this interesting story.

Many more direct and indirect moral lessons can be learnt by a careful reader of this excellent drama. It has been undertaken, as already stated, with a view to enriching our sacred Sanskrit literature on lines, more or less suited to modern tastes. This foreword may be concluded with the hope that the present work would be followed by many more similar works by Pandits and scholars, animated by a desire to popularise the study of our great mother language; and with an appeal that all true patriots would come forward to help in the production, publication and study of such gems of Sanskrit literature.

FERN-HILL,
April 14th, 1914. } KARPUR SHRINIVASRAO.



Mandikal Ramasastry, Author.

श्रीरस्तु.

भैमीपरिणयन्नाम नाटकम्.

(नलविजयापरनामकम्).

प्रथमोङ्कः.

सन्दृष्टे जगदीश्वरे प्रियतमे प्रोल्लासिवक्त्राम्बुजां
साश्चर्यामथ कोककैरवमरुन्मित्राक्षसन्दर्शने ।
एकान्तेपि जटाहिचक्रचकितां गौरीं नवे सङ्गमे
सव्रीडामनुरञ्जयन्नवतु न श्चन्द्रार्धचूडामणिः ॥ १ ॥

अपिच—

कल्याणं नः कलयतु हरिस्त्रिक्रमीवृद्धिभाजो
मौलावासन्नुडुपरिषदो यस्य मल्लीस्रगाभाः ।
कण्ठे हाराः कटिपरिसरे किङ्किणीदामशोभाः
पादाम्भोजे कटकरुचय स्तन्नखाभाश्च जाताः ॥ २ ॥

नान्द्यन्ते सूत्रधारः । सप्रश्रयमञ्जलिं बद्ध्वा—

निजगुणपरिपूतेभ्यः परगुणलेशान् प्रसाध्य वक्तृभ्यः ।
दुर्जनदुरासदेभ्यस्तेभ्यस्सद्भ्यो नमोस्तु विद्वद्भ्यः ॥ ३ ॥

(इति पुष्पाञ्जलिं विकीर्य नेपथ्याभिमुखमवलोक्य) आर्ये! इतस्तावत्.

नटी—(प्रविश्य) [1]एषास्मि नियोगप्रदानेन अनुगृह्णातु मामार्यः.

सूत्रधारः—आर्ये! समादिष्टोस्मि भगवतश्चराचरगुरोः कपिलातीरवासिनः श्रीकण्ठेश्वरस्य यात्रां निर्वर्त्य समागतैः महीशूरमहाराज चामराजसूनोः श्रीमतो नाल्वडिकृष्णराजसार्वभौमस्य सुमेरुशिखरायमाणे सुधर्मासधर्मणि नवे महत्यास्थानमण्डपे नवरात्रमहोत्सवारम्भसंरम्भदिदृक्षया सम्मिलितैः नानादिगन्तरागतैः महाजनैः किमप्यपूर्वं रूपकमभिनेतव्यमिति. तत्कतमत्प्रकरणमाश्रित्य परिषच्चेतस्समाह्लादनाय प्रयतामहे.

नटी—[2]आर्य! इदानीमेव आज्ञप्तं खलु अनेन पत्रिकामुखेन महाराजकृष्णराजस्य आस्थानाधिकारिवर्गप्रमुखेन विद्याविनयविवेकादि मधुरगुणकान्तेन कान्तराजेन.

सू—(सादरं) सुमुखि! दर्शय तत्पत्रम्.

नटी—(अर्पयति).

सू—(वाचयति)–

यत्सन्दर्शनतो भवेयुरखिलास्सत्यानुवृत्त्या युताः
पातिव्रत्यपरायणत्वमबलाचित्तं समुत्तंसयेत् ।
वैदग्ध्यं सदसद्विवेकजनितं ज्ञायेत जायेत वा
तादृक् साध्वभिनीयतां नवरसीशृङ्गाटकं नाटकम् ॥ ४ ॥

---

[1] एसम्हि णिओअप्पदाणेण अणुगेण्हेदु मं अज्जो.

[2] अय्य दाणिं एव्व आणत्तं खु इमिणा पत्तिआमुहेण महाराअकिण्हराअस्स अत्थाणाहिआरिवग्गप्पमुहेण विज्जाविणअविवेआदिमहुरगुणकन्तेण कन्तराएण.

नटी—[1] एष सामान्यनियोगः विशेषं अन्विष्यति.

सू—(सविमर्शं) अपूर्वंखलु तादृशं नाटकं (विचिन्त्य सनिश्चयं सप्रमोदंच) आः ज्ञातं ज्ञातं–

भैमीपरिणयं नाम नाटकं नवनिर्मितम् ।
अस्माभिरभिनेतव्यं सरसै स्संविधानकैः ॥ ५ ॥

नटी—[2] (सश्लाघं) तर्ह्यस्मात्प्रसंगाद्वयमपि कृतार्थीकृतास्स्मः. स्मर्यतेखलु. (संस्कृतमाश्रित्य)–

कर्कोटकस्य नागस्य दमयन्त्या नलस्य च ।
ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम् ॥ ६ ॥

इति ॥ [3] परन्तु नवनिर्मितमिति श्रुत्वा किमपि शङ्कनीयं भवति.

सू—अयि मुग्धे! श्रूयतां–

नव्येषु काव्येषु सतां मनांसि
रज्यन्ति वा नेति कुतो विशङ्का ।
यद्यस्ति सौरभ्यगुणाधियोगः
स्वतः पतन्त्येव सुमेषु भृङ्गाः ॥ ७ ॥

नटी—[4] सत्यं सत्यं सारग्राहिणो भृङ्गास्सज्जनाश्च.

---

[1] एस सामण्णणिओओ विसेसं अण्णेसइ.

[2] तारिहि इमादो पसङ्गादो अम्हेवि किदत्थीकिदम्ह सुमरिअदि खु.

[3] परंतु णवणिम्मिदंति सुणिअ किंवि सङ्कणिज्जं होदि.

[4] सच्चं सच्चं सारग्गाहिणो भिङ्गा सज्जणाअ.

सू—प्रिये ! अपरंचेदमाकर्ण्यताम्—

अनालोक्य प्रौढा अपि नवधिया काव्यसरणीः
जडाः केचिन्मौख्र्याद्विजहतु ततः का क्षतिरिह ।
विनिन्द्यन्तामन्धैर्नवनवभवाश्चन्द्रकिरणाः
प्रमोदात्तान्भोक्तुं दिशिदिशि जयन्त्येव सुदृशः ॥ ८ ॥

न—[1]भवतु तादृशस्य काव्यस्य कः पुनः कविः.

सू—श्रूयतां. अस्ति खलु सकलमहीमण्डलमण्डनायमानेषु महीशूर महाराजपरिपाल्यमानेषु कर्णाटेषु अखण्डपाण्डित्यसमुद्दण्डविद्वत्प्रकाण्डपरिमण्डितं मण्डिकल्नामकं नगरं तत्रहि—

राथीतरास्सन्ति सन्तः श्रोत्रिया ब्रह्मवादिनः ।
तेषु वेङ्कटसुब्बार्यसुधीमणिसुतः कविः ॥ ९ ॥

य एषः बाल्यएव महीशूरपुरीमागत्य—

आद्यं वेदमधीतवान् गुरुमुखादाषोडशाब्दं ततः
तर्कव्याकृतिसाहितीरधिजगे त्रिंशाब्दकालावधि ।
अद्वैतेऽथ रतो जगद्गुरुवराद्भ्यस्तभाष्यत्रयः
सोयं पण्डितमण्डलीबहुमतः श्रीरामनामा कविः ॥ १० ॥

न—[2]एष यदि अस्माभिरपि श्रुतपूर्वएव यथा महाराजकृष्णराजस्य आस्थानपण्डितइति. आर्यधर्मप्रकाशिकादि ग्रन्थकर्तेति च.

---

[1]होदु तारिसस्स कव्वस्स कोउण कई.

[2]एसो जदि अम्हेहिं वि सुदपुव्वो एव्व जहमहाराअ किण्हराअस्स अत्थाण पण्डिदोत्ति अय्यधम्मप्पआसिआदिगन्धकत्तोत्ति अ.

सू—किञ्च स्वयमभिज्ञेन महोदारेण च तेनैव महाराजेन महद्विद्वत्पदं प्रापितः स्वहस्तदत्तगृहारामाग्रहारादिना सम्मानितो महाराजकालेज्नामकाङ्ग्लेयमहापाठशालायां संस्कृतप्रथमोपाध्यायीकृतश्च.

न—[1]आं इदमपि श्रुतपूर्वमेव.

सू—सखि! शृणु स एष कविरिदानीं परिणते वयसि वर्तमानः परमहर्षेण महर्षिं व्यासं श्रीहर्षं च नैषधकर्तारं मनसा संभाव्य पावनवस्तुप्रशंसिनीं कवितामारभमाणः स्वयमेवमाशास्ते—

जिह्वे देवि! नमोस्तु ते भगवति! त्वां प्रार्थये क्षम्यतां
स्तावंस्तावमहर्दिवं नरगुणानायासयं त्वां भृशम् ।
पुण्यश्लोकचरित्रपावनवियद्गङ्गाझरीस्नापनै
रद्य त्वां परिपावयामि कुरु मद्वाच स्सुधास्यन्दिनीः ॥११

इति.

न—[2]एवं यदि सर्वोपि सन्निवेशः अस्माकमनुकूलएव संवृत्तः.

सू—अहो युक्तमाह भवती. यतः—

सभ्यास्सर्वकलाविदो वयममी नाट्यक्रमज्ञा नटाः
काव्यं पावनमेव यत्र निषधक्ष्मानायको नायकः ।
साहित्योपनिषद्रहस्यमखिलं ज्ञाता स तादृक्कविः
सर्वं चैतदुपर्युपर्युपगतं दैवानुकूल्यादभूत् ॥ १२ ॥

न—[3]तेन हि उपरिकरणीयं तावदादिशत्वार्यः.

---

[1] अं एदंवि सुदपुव्वं एव्व.

[2] एव्वं जदि सव्वोवि सण्णिवेसो अम्हाणं अणुऊळो एव्व संउत्तो.

[3] तेणहि उवरिकरणिज्जं दाव आदिसदु अज्जो.

सू—कलकण्ठि किमन्यदादेष्टव्यं इमामभिनवप्रवृत्तां शरदमुद्दिश्य पूरय नः कर्णकलशान् गीतामृतेन.

न—[1](तथेति गायति) इदानींहि–

[2]प्राप्तुं नवपल्लवनीं प्रमदवनाक्रमन्ति भ्रमराः ।
उज्झितजलदावरणा प्राप्तप्रकाशा विभाति नवज्योत्स्ना॥१३

सू—(सप्रमोदं सशिरःकम्पं च) आर्ये! त्वद्गानपरवशास्सभासदः चित्रार्पिताइव संवृत्ताः. श्रूयतामयमपरश्च स्वभावः शरदारम्भस्य–

सानन्दं नलिनीमुपेत्य विहरन्नभ्रागमोद्वेजितः
तामेतामपहाय यः प्रचलितः क्वापि प्रलीनोऽभवत् ।
सोऽयं हंस इह प्रसन्नसलिले कालेऽनुकूले पुनः
तामेवैत्य च पद्मिनीं सहचरैरामोदते भूतले ॥ १४ ॥

न—[3] अहोसकलजनमनोरथफलप्रदः समयः उपस्थितः.

नेपथ्ये—महाराजाधिराज राजपरमेश्वर! इतइतः

न—(भीता वेपते).

सू—प्रिये प्रमोदावहेपि काले कुतो बिभेषि.

न—[4]एष कोपि राक्षसः गर्जतीति भीतास्मि.

---

[1] तहेत्ति दाणिंहि.

[2] पत्तुं णवपउमवणिं पमदवणादो भमन्दि भमराओ ।
उज्झिद जळदावळणा पत्तपआसा विभादि नवजोण्हा ॥

[3] अम्हहे सअळजणमणोरहफळप्पदो समओ उवट्ठिदो.

[4] एसो कोवि रक्कसो गज्जदित्ति बीदम्हि.

सू—नहिनहि श्रूयतां. एष महाराजनलः स्वप्नदृष्टदमयन्तीवृत्तान्त-समुत्सुकितमनाः स्वयमास्थानीमधिवस्तुमशक्नुवन् वयस्यवनपालकाभ्यां सह उद्यानवनीं प्रविशति. तदद्य कञ्चुकिनो व्याहारएषः. नान्यथा सम्भावनीयः.

न—(साश्वासं) [1]तथा यदि समुत्सुकितस्य तस्य पुरतः स्थातुं आवयोरनुचितं तदावामपि अपसराव. (इत्युभौ निष्क्रान्तौ).

प्रस्तावना.

(ततः प्रविशति यथानिर्दिष्टपरिवारः सौत्सुक्यो राजा कञ्चुकीच)

कञ्चुकी—महाराजाधिराज राजपरमेश्वर! इतइतः.

राजा—(ध्यानमन्दं परिक्रम्य, स्वगतं)–

सञ्चिन्त्य तां नयनयोरमृतं निषिच्य
सौदामनीस्फुरितवच्चलितां मृगाक्षीं ।
आनन्दशोककुतुकस्थगितेऽन्तरङ्गे
कोप्यद्भुतः प्रसरतीव दशाविपाकः ॥ १९ ॥

सावेगं हृदयमुद्दिश्य—

चेतस्स्थैर्यमुपेहि किं तव वृथासङ्कल्पजैस्सम्भ्रमैः ।
भ्रातस्सौरमरीचिकाम्भसि भवेत्किंवा पिपासाशमः ॥

---

[1] तहजदि समुस्सुइदस्स तस्स पुरदो ठादुं अम्हाणं अणु इदं ता अम्होवि ओसरम्ह.

ज्ञातव्येषु पुरस्स्थितेषु विषयेष्वीषत्प्रसीदाखिल ।

ज्ञातुस्तेद्य वशंवदेषु करणेष्वीदृङ्निरोधः कुतः ॥ १६ ॥

(प्रकाशं) सखे! अशोक! वनविहारोपि भवनविहारवदेव मे असह्यतरस्संवृत्तः.

अशोकः—वयस्य! समाहितेन मनसा पश्यतु भवान्.

वनपालकः—(अपवार्य), ब्रह्मन् अशोक! महाराजः केनापि निमित्तेन उन्मना इव लक्ष्यते.

अ—(अपवार्य सकपटं) भद्र मधुमुख! कयाचिद्राजकार्यव्यग्रतया राजा एवं स्यादिति मन्ये.

व—(साशङ्कमात्मगतं) भवत्वाक्षिपामि ज्ञास्यामि च तत्त्वं (प्रकाशं) देव? इतो दीयतां दृष्टिः—

एतन्मत्तमतङ्गशाबकशतं देवप्रसादार्थिना

लाटेशेन समर्पितं निजशिरःकोटीरबद्धाञ्जलि ।

रा—अनाकर्णितकेन किमप्यनुचिन्तयति

वनपालकः—

एतद्गर्जिततर्जितेभहृदयं भीमाक्षमक्ष्णोः प्रियम्

हर्यक्षद्वयमार्यचारुमतिना प्रेमोपहारीकृतम् ॥ १७ ॥

रा—(सादरं) अपिनामेदं आर्यचारुमतिना मातुलेन प्रेषितम्?

व—अथकिम्.

रा—प्रियं नः.

वन—देव! इतः श्रूयताम्—

साक्षाद्वक्तुं स्वमभिलषितं लज्जितैर्भूमिपालै-
रध्याप्यैताः प्रमदविपिने शारिकाः संविसृष्टाः।
स्तावंस्तावं तव गुणगणान् तन्मनःकाङ्क्षितार्थान्
देवस्याग्रे मधुरवचनैस्साधु विज्ञापयन्ति ॥ १८ ॥

रा—सुकुमारः प्रयोगः कल्पितस्तैः. भवतु सम्भावयिष्यामः.

वन—देव! इतोपि चक्षुर्निक्षिप्यताम्. अत्रहि—

देवस्याकर्ण्य कण्ठादभिनवजलदध्वानगम्भीरघोषं
तोषादेषा मयूरी कलयति विविधावृत्तनृत्तानि सद्यः।
भृङ्गीसङ्गीतभङ्गी प्रसरति कुसुमश्रीविशाले रसाले
सालेसालेऽपि तालायितमिव मधुरैः पक्षिपक्षाभिघातैः ॥

रा—(स्वगतं) तदिदं द्रष्टुमशक्यं. (प्रकाशं) भवतु पुरस्ताद्गम्यताम्.

वन—पश्यतु स्वामी.—

एते ते वनमञ्जरीप्रियतमाः कान्तारसंसारिणः
छायाभिः कुसुमैः फलैश्च मधुभिस्सम्भावयन्त्यागतान्।

रा—अये महानुभावानां आतिथेयानां रीतिमनुसरन्त्येते, अभिनन्दनीयाएव.

वन—

एताः पर्वतनिर्झरीझळझळध्वानोपमानोल्लस-
ज्झाङ्कारध्वनिमावहन्ति सरघास्सालाग्रकेलीगृहे ॥ २० ॥

रा—एताः स्वसञ्चितान् अर्थान् अनुपभुज्य परोपभोगार्थं परिपालयमानाः कृपणाइव परित्याज्याः. (इत्यन्यत्र मुखं परावर्तयति).

वन--इह हि–

कलितनवविकासा कैतकीबर्हरेखा
कलयति मुदमक्ष्णोः केरलीगण्डपाण्डुः ।
पृथुलकलकलोयं पक्षिणां वृक्षभाजां
विमतकुपितचोलीविप्रलापानुकारी ॥ २१ ॥

रा—(सहासमन्यत्र परिक्रामति).

वन—इह तु–

पतनविदलितानां पक्वरम्भारसाल-
प्रमुखपृथुफलानां पङ्क्तिरुर्वीं पिधत्ते ।
विविधकुसुमभाजां वीरुधां मञ्जुकुञ्जात्
गलितकुसुमधूलीगन्धिनो गन्धवाहाः ॥ २२ ॥

रा—(सोद्वेगं स्वगतं) मम हि–

मदकलकलकण्ठकण्ठनादाः
स्फुटमिह कर्णपुटीकटूभवन्ति ।
अयमपि सुममञ्जुलो निकुञ्जः
प्रणिहितमक्षि पराङ्मुखीकरोति ॥ २३ ॥

(प्रकाशं) भद्र मधुमुख! अलं द्रष्टव्यानुप्रदर्शनेन. सखे अशोक! अन्यत्र गच्छाव.

अ—तर्हि समन्तात्परिफुल्लकुसुममञ्जरीपुञ्जवितानमञ्जुलं मन्दमन्द-स्पन्दमानगन्धवहकिशोरसञ्चारसुभगं इदं शतस्तम्भप्रासादशिखरमारुह्य मनो विनोदयतु प्रियवयस्यः.

रा—(सानुस्मरणं) सखे! अपि सन्निधत्तेऽत्र तत्रभवती सिद्धिमती नाम महायोगिनी? या किल ह्यः प्रभाते देशान्तरादागत्य निजपादसेवावकाशप्रदानेनास्मत्कुलमनुगृह्य साधयन्ती मया सप्रार्थनं शतस्तम्भप्रासादे निवेशिता.

अ—ज्ञास्यामः परिवारमुखात् तत्रभवत्याः सान्निध्यवृत्तान्तम्.

रा—(विचिन्त्य) भद्र मधुमुख! गत्वा सहानेन कञ्चुकिना भगवतीमुपचरन् दर्शनावकाशं परिज्ञाय परावर्तयैनं जयन्धरम्.

वन—यदाज्ञापयति देवः. (इति कञ्चुकिना सह निष्क्रान्तः).

अ—(स्वगतं) इदानीमस्य हृदयतत्त्वमुपलप्स्ये. (प्रकाशं) सखे! परिहृतस्त्वया स्वेच्छासल्लापप्रत्यूहः. तदिदानीं किञ्चित्प्रष्टव्योऽसि. तदत्र माधवीमण्डपे समुपविशतु भवान्.

रा—(उपविश्य) अवश्यमनुशासनीयोऽस्मि प्रियवयस्येन.

अ—तर्हि श्रूयताम्—

स्खलति वचनमन्तःकृष्यमाणेव दृष्टिः
तनुरपि तत्र तान्ता कान्तकान्तिर्नितान्तम् ।
श्वसितमलिनमास्ते शून्यशून्यं मुखाब्जम्
किमिदमभिनवं भोः कुत्र ते भावबन्धः ॥ २४ ॥

रा—(निश्वस्य) सखे! किं मया तवापि गोपनीयमस्ति? श्रूयताम्. ह्यः किल शर्वर्यास्तुरीये यामे उपरतव्यापारेषु परिजनेष्विव बाह्येन्द्रियेषु, अन्तर्हितेषु परिजनकोलाहलेष्विव विविधलोकतन्त्रविधानचिन्तनेषु, मयि च कथञ्चिन्निद्राणे—

काचित्पुरोमे कमलायताक्षी
कान्तालकान्ता कमनीयगात्रा ।
सौन्दर्यसम्पत्समुदायसीमा
सौभाग्यभूमा स्वयमाविरासीत् ॥ २५ ॥

ताञ्च किल—

विद्युद्वितानेन विधुं विलाप्य
विनिर्ममे नूनमनङ्गएव ।
काथोद्धतः कल्मषतामुपेतः
कलङ्क आसीत्किल केशपाशः ॥ २६ ॥

अ—ततस्ततः.

रा—ततश्च—

तत्सन्दर्शनकौतुकादभिमुखं चक्षुः प्रवृत्तं ततः
तत्प्रत्याकृषदञ्जसा परवधूशङ्काकुलं मे मनः ।

अ—अहो स्वप्नेपि परवधूपराङ्मुखत्वं प्रियवयस्यस्य. ततस्ततः.

रा—ततश्च—

दृष्ट्वा स्वर्णविभूषणोज्ज्वलपदां कन्यार्हवेषाञ्च ता
माशापाशनियन्त्रितस्य मम तच्चेतोपि नीतं तया ॥२७॥

अ—युज्यते उचिते प्रवृत्तिः. ततस्ततः.

रा—ततश्च

वलितवदनमीषद्वक्रितग्रीवमारात्

विपुलचपलतारं वीक्षमाणा परस्तात् ।

प्रपदधुतदुकूलं पादपद्मं क्षिपन्ती

मधुरहसितरम्या मन्दमन्दं व्यचालीत् ॥ २८ ॥

अ—अहो! सुभगसुभगोयमस्याः व्यापारः. ततस्ततः.

रा—ततश्च,

कस्यासि कासि सुमुखि क्वनु यासि देहि

कल्याणि! वाचमिति यावदनुद्रुतोस्मि ।

तावत्सखे! मधुरमङ्गलगीतिवाद्यैः

वैतालिकैरहमहो प्रतिबोधितोस्मि ॥ २९ ॥

अ—हन्त वैतालिकहतकास्ते अन्तरायाः संवृत्ताः. ततस्ततः.

रा—अतः परं किमावेदयानि मन्दभाग्यः,

सञ्चिन्त्य तां नयनयोरमृतं निषिच्य

सौदामनीस्फुरितवच्चलितां मृगाक्षीम् ।

आनन्दशोककुतुकस्थगितेऽन्तरङ्गे

कोप्यद्भुतः प्रसरतीव दशाविपाकः ॥

अ—यद्येवं तर्हि साम्प्रतं साम्प्रतमेव दृष्टनष्टनिधेः जनस्येव तवाप्यनुशयः. तथाप्यत्र किञ्चिद्विमर्शनीयमस्ति.

रा—किमिव,

अ—अनुभूतवस्तुभावनाबलमन्तरा स्मृतिः स्वप्नो वा न सम्भवतीत्यभिज्ञाः मन्यन्ते, तत्कथमवीक्षितायाः तस्याः स्वप्ने सन्दर्शनमिति.

रा—युक्तमाह भवान्. (स्मरणमभिनीय) -सखे! श्रूयतामनुस्मृतोद्य तद्दर्शनप्रकारः.

अ—अवहितोस्मि.

रा—पुरा खलु उग्रसेनोनाम यवनाधिपतिः सहानुयायिभिः राजभिः अस्मानभिषिषेणयिषुः दूरतः स्कन्धावारस्थितं आर्यचारुमतिमास्कन्द्य स्वनगरमनयत्. तदिदमनुश्रुत्य गुल्माधिकारिमुखात् द्विषदवस्कन्दनार्थं प्रस्थातुकामेन मया समादिष्टाः चन्द्रसेनप्रभृतयस्सेनापतयः. ततश्च,

नदीर्द्विरदसेतुभिर्घनकुठारघातैर्वनी-
निखातगिरिपूर्तिभिः पृथुगभीरगर्तस्थलीः ।
विलङ्घ्य पटुमारुतोद्धत त्रिभिन्नवेलाब्धिव-
ज्जवेन महती चमूर्व्यचलदौग्रसेनं पुरम् ॥ ३० ॥

तावदेव ते राजानः—

अस्मत्तुङ्गतुरङ्गसङ्घजनितैरभ्रायमाणैर्धरा-
धूलीपालिविजृम्भणैर्घनतरैर्गाढान्धकारे सति ।
कल्पान्तोत्थितकालरात्रिविचरद्गर्गाट्टहासायिता-
द्भेरीभाङ्करणोद्भटाद्भटरवाद्भीता दिशो भेजिरे ॥ ३१ ॥

अ—हन्त वराकास्ते प्रसुप्तं सिंहं प्रबोध्य प्रलीयमानाः फेरवाइव प्रणष्टाः. ततस्ततः.

रा—ततश्च तस्मिन् राज्ये तमेवार्यचारुमतिमभिषिच्य सह सैन्यैः परावर्तमानो मध्येमार्गं शतकूटगिरेरुपत्यकायां वरदातटवनभूमिषु निवेशितबलभारो वनविहारकुतूहलेन तत्रतत्र मन्दमन्दसायन्तनशीत-शीतवातपोतमासेव्यमानश्चरणाभ्यामेव सञ्चरमाणः किमप्यतिरमणीयमुद्यानमालोक्य तत्सौभाग्यादिदृक्षया तत्समीपमन्वसरम्. तदानीं खलु—

मधुवनतरुमालामध्यविद्योतमाना
सुरुचिरविभवाभिस्सेव्यमाना सखीभिः ।
चरणकलितयात्रा चम्पकस्निग्धगात्रा
नवकुवलयनेत्रा नेत्रयोः पात्रमासीत् ॥ ३२ ॥

अस्याःखलु—

कण्ठे हारः कुचतटभुवि स्निग्धकस्तूरिकाङ्को
मध्ये काञ्ची झणझणरणत्किङ्किणीक्वाणरम्या ।
श्रोणीभारे कनककलिकाबद्धकौसुम्भवासः
सर्वाङ्गेषु व्यलसदुदयद्यौवनोद्दामलक्ष्मीः ॥ ३३ ॥

अ—अहो! रूपानुरूपमस्यास्सौभाग्यम्. ततस्ततः.

रा—ततश्च—

सा मां वीक्ष्य नताननाब्जमवनीमालोकयन्ती मुहुः
संव्यानं करपल्लवेन भुजयोस्संयोजयन्ती शनैः ।
साचीकृत्य विलोचने मयि मनाग्व्यापारयन्ती बलात्
कर्षन्ती च मनो मदीयमबला नेत्रोत्सवायाजनि ॥ ३४ ॥

अ—तर्हि सफलस्ते यात्रोद्योगः. ततस्ततः.

रा—ततश्च—

मध्यासेन्न चकितचकितं विष्वगालोकयन्ती
   साऽभूल्लज्जालुलितलुलितैरङ्गकैस्सङ्कुचन्ती ।
प्रत्यायाते मधुकरमिलन्मल्लिकामालिकाभाः
   तन्व्या मुक्ताः पुनरपि मयि प्रेमलोलाः कटाक्षाः ॥ ३५ ॥

अ—सिद्धान्तितमद्य ते रूपरामणीयकम्. ततस्ततः.

रा—ततश्च—

उत्कण्ठितेन मनसा परिणुद्यमानः
   तस्यास्समीपमगमं तरलायताक्ष्याः ।
आवृत्य सा किमपि वक्तुमभूच्चलोष्ठी
   तत्रान्तरे परिगतः परिवारवर्गः ॥ ३६ ॥

अ—अहह बलीयान् अन्तरायस्संवृत्तः, अहो दुर्दैवस्य असहिष्णुता. ततस्ततः.

रा—ततोपि शृणु मदीयं मन्दं भागधेयम्, सा मनोरथप्रियतमा सखीवर्गमालोक्य अवनतमुखी पुनः पुष्पापचयमेवारभत, सखीवर्गोपि समागत्य भर्तृदारिके! अलं पुष्पापचयेन, परिणतोयं दिवसः, दिदृक्षते च त्वां देवी, साधयामित्यभिधाय मिथस्समायोज्य कण्ठे भुजलतां मन्दंमन्दमयासीत्, सापि पुनःपुनः परावृत्य पश्यन्ती निरगात्. अहमपि सुचरितापगमे स्वर्गाद्विगलितः कर्मीव पर्याकुलेन मनसा शिबिरमासाद्य सहानुयायिभिः स्वपुरमयासिषम्. एष तद्दर्शनप्रकारः.

अ—यद्येवं तर्हि गूढमेव अङ्कुरितस्ते हृदयालवाले कोपि मनो-

रथाङ्कुरः । युज्यते स्वप्नदर्शनमपि तद्भावनाबलादेवेति.

रा—सखे! निपुणो भवान्. शृणोत्वेतदपि.

दृष्टो यथा प्रियजनः प्रथमावलोके
मुग्धावलोकमधुरः स मनोज्ञवेषः ।
अद्यापि तेन वपुषा मम चित्तवृत्तौ
भित्तौ विलेखित इवाचलितस्तथाऽऽस्ते ॥ ३७ ॥

इदन्तु मे मनः प्रतिक्षणमनुचिन्तयति.

उद्दामयौवनमपर्युषितं भजन्त्याः
तस्याः प्रभातसरसीरुहलोचनायाः ।
उन्नम्य वक्रमधरं मधुरं नताङ्ग्याः
कोवाभिपास्यति युवा कृतभागधेयः ॥ ३८ ॥

अ—(स्व) पल्लवितोऽस्य मनोरथाङ्कुरः. भवत्वेवं तावत् । (प्र) सखे! त्वमेव तां प्रियां प्राप्स्यसि.

रा—(विहस्य) किं वरदानेन मां प्रीणयसि.

अ—नहिनाहि प्रतिभापाटवेन.

रा—कथमेतत्?

अ—शृणु, यतस्सा प्रगल्भैः व्यापारैः त्वयि दर्शितहृदयभावा, यतश्चास्यां तव मनश्चक्षुषोर्निबन्धनं, यतश्च द्वयोरपि युवयोः परस्परानुरूपे रूपयौवने.

रा—अज्ञातकुलशीलनामधेयां तां प्रति कथमेवं प्रतिपद्यसे.

3

अ—शृणु तर्हि श्रोतव्यम्.

रा—अवहितोस्मि.

अ—सखीवर्गवचने भर्तृदारिके इत्यामन्त्रणात् देवी दिदृक्षते इत्यभिधानाच्च सा राजपुत्रीति परिज्ञायते, किञ्च शतकूटोपान्तभूमेर्वरदोपान्तभूमेश्च विदर्भान्तर्गततया तत्रत्येयं विदर्भराजपुत्रीत्यवगम्यते, स्वप्नदर्शने कन्यावेषोपलम्भात् इयमनूढेति चानुमीयते एवञ्च सर्वथा परिग्राह्येयं त्वया दुरासदा न भविष्यति.

रा—(विहस्य)–

सखासि पण्डितश्चासि सत्यमेव ब्रवीषि च ।
तथापि तादृशं वस्तु सुलभं कोनु मन्यताम् ॥ ३९ ॥

अ—अनुकूले दैवबले दुर्लभमपि सुलभमेव भविष्यति, पठ्यते च प्राचीनैः—

अघटितघटनं घटयति घटितंघटितञ्च दुर्घटीकुरुते ।
विधिरेव तानि घटयति यानि पुमान् नैव चिन्तयति ॥

इति । (नेपथ्ये कलकलः)

रा—(श्रुत्वा) क एष कलकलः.

अ—(निपुणं निरूप्य) सखे ! प्रमदवनसरस्तीरे वीतभयं विहरतां हंसकारण्डवादीनां कोलाहलोयम्.

रा—(परिक्रम्यावलोक्य च) अहो ! सुभगसुभगोयं सरस्तीरदेशः. इह हि—

मदमुखरमरालीपक्षविक्षोभजात-
श्चलति शिशिरवातश्चञ्चरीकानुयातः ।
निखिलजनसमूहानन्दनोप्येष चित्ते
किरति कमपि भावं कोमलं कर्कशं च ॥ ४० ॥

सखे ! पश्यात्र सरोवरे तिरश्चामपि कोप्येष भ्रमचमत्कारः.

अन्तर्दूरचरानुपर्युपरिगान् मत्वा ग्रहीतुं झषान्
तोयान्येव विघट्टयन्ति विहगाः त्रोटीपुटीकोटिभिः ।
तोयादूर्ध्वमनुद्गतेऽब्जमुकुले तिष्ठासया सम्पतन्
उड्डन्तुं सहसा जलाप्लुततया शक्नोति नो बम्भरः ॥ ४१ ॥

अ—सखे ! इतश्च पश्य.

आकुञ्च्य कण्ठमवनम्रमृणालशोभम्
पीतेन पक्षतिपुटेन पिधाय शीर्षम् ।
एकेन विद्रुमनिभेन पदेन तिष्ठन्
निद्राति कोऽपि निभृताकृतिरेष हंसः ॥ ४२ ॥

रा—(ससम्भ्रमम्) सखे ! अत्रैव तिष्ठ निभृतं गत्वा ग्रहीष्यामि मनोविनोदनाय क्रीडनीयकमिदम् (इति निभृतपदं निष्क्रान्तः.)

अ—(समन्तादवलोक्य) अहो महाराजमधुवनस्य रामणीयकम्.

निकुञ्जपुञ्जमञ्जुमञ्जुगुञ्जितारवोज्वल-
न्मिलिन्दबृन्दसम्मिलन्मरन्दबिन्दुसम्भृतम् ।
सुमन्दमन्दमारुतातिमन्दिताखिलश्रमम्
प्रजामनः प्रमोदयत्प्रकाशते प्रभोर्वनम् ॥ ४३ ॥

(इति परिक्रामति, प्रविश्य राजा) सखे! आश्चर्यमाश्चर्यं तिरश्चामपि मानुषी वागिति.

अ—कथमेतत्.

रा—श्रूयतामनुक्रमेण.

अ—अवहितोऽस्मि.

रा—त्वत्सकाशान्मयि निभृतं गत्वा निद्राणं तं राजहंसं निर्भरं गृहीतवति स बंधनान्मोचयितुं बहुधा प्रयत्यापि यदा निराशः तदा मदीयमान्तरं तत्त्वं करुणातरङ्गैस्तरङ्गयन् मानुष्या वाचा स्वजनानुस्मरणपूर्वकम् बहुधा व्यलापीत्.

मदेकपुत्रा जननी जरातुरा
नवप्रसूतिर्वरटा तपस्विनी ।
गतिस्तयोरेष जनस्तमर्दय-
न्नहो विधे त्वां करुणा रुणद्धि नो ॥ इति ॥

अ—ततस्ततः.

रा—ततश्च तमेवं विलपन्तं गच्छ यथेच्छमित्यभिधाय विमुञ्चति मयि स कृतज्ञतया पुनर्मत्सविधमेत्य राजन्! परित्रातोस्मि भवता प्राणापायात् तदात्मशक्तेरुचितां प्रत्युपकृतिं विधातुमभ्यर्थये त्वां ॥ श्रूयतां, यदस्ति विदर्भेषु कुण्डिनं नाम नगरं.

सा भुवः किमपि रत्नमनर्घं भूषणं जयति तत्र कुमारी ।
भीमभूपतनया दमयन्ती नाम या मदनशस्त्रममोघं ॥

भुवनत्रयसुभ्रुवामसौ दमयन्ती कमनीयतामदम् ।
उदियाय यतस्तनुश्रिया दमयन्तीति ततोऽभिधां दधे ॥

तामेतां मद्बुद्धिकौशलेन त्वय्येवादरमुत्पाद्य त्वयैव संघटयिष्यामि इत्यभिधाय आन्तरिक्षेण पथा प्रातिष्ठत.

अ– (सशिरःकम्पं) चतुरोयं हंसः, यतः स्वकार्यनिर्वहणाय मधुरमधुरैर्वचोभिराशामोदकान् प्रदर्श्य क्वापि पलायितः.

रा—(साक्षेपं) मैवं वादीः, कानामास्मत्प्रतारणेन तादृशस्य सतः स्वकार्यपरता नाम.

अ—तर्हि मन्ये स केनापि अध्याप्य भवत्सकाशं प्रेषित इति.

रा—मैवं। दिव्योऽयं हंसः सत्यवादी अनुभूतमदुपकारः प्रत्युपकारकरणार्थी चेति मे हृदयम्.

अ—(स्व) अहो ! दृढीभूतोस्य प्रत्ययः परमहंसे, भवत्वेवं तावत्, (प्र) सखे ! पुरा शत्रुविजयोद्योगे या वधूस्त्वया प्रत्यक्षीकृता, या च विदर्भराजपुत्रीति अस्माभिर्निर्णीता, सैवेयं दमयन्तीनाम स्यात्, हंसोपि तामेव सङ्घटयितुं प्रवृत्तइत्यहो ते भाग्यपरम्परा.

रा—यदि इयमेव दमन्तीस्यात्तदा तादृशस्त्रीरत्नवत्तया सविदर्भदेशएव सकलदेशातिशायीति मन्यामहे. श्रूयतामिदम्.

सधन्यस्स्यादस्याः प्रणयिनयने यत्र सजतः
स संसारस्सारो भवति भुवि सा यत्र गृहिणी ।

श्रुतिज्ञैयैस्स्वर्गाद्युपरितनभोगैः किमिह सा
यदि प्रीता दद्यात्सकृदपि पुनर्दर्शनसुखम् ॥ ४४ ॥

(प्रविश्य जयन्धरः) देव! सम्प्राप्तमिदम्.

रा—(उपश्रुतिमभिनीय सहर्षं) किन्तावत्सम्प्राप्तम्?

जयन्धरः—इदं चित्रफलकम्.

रा—कुतस्सम्प्राप्तम्.

ज—देव! इदमालेख्यं विस्मृत्य भगवती सिद्धिमती प्रातरेव देशान्तरमगादिति द्वारपालकाच्छ्रुत्वा मधुमुखस्तदिदं मद्द्वारा भवत्सकाशं प्रेषितवान्. दृष्ट्वा देवः प्रमाणम्.

रा—(सादरं गृहीत्वा) भद्र! विचीयतां तत्रतत्र तत्रभवती.

ज—यदाज्ञापयति देवः (इति निष्क्रान्तः.)

रा—(अशोकाभिमुखो भूत्वा) सखे! भगवती मामप्यननुयुज्य क्वगता स्यात्?

अ—सिद्धाः खलु जनाः निस्पृहाः स्वतन्त्राश्च. परानुयोगे तेषां किम्प्रयोजनम्. यदायदा यद्यत्स्मर्यते तदातदा तत्तत्तीर्थमधिगच्छन्ति. प्रोच्यते किल निस्पृहस्य तृणं जगदिति.

रा—युज्यते. (चित्रं विलोक्य) सखे! पश्य का वात्र लिखिता देवी वा मानुषी वा,

अ—ममाप्यत्र सन्दिग्धे मनः.

रा—(निपुणं निरूप्य) सखे! कासौ आकस्मिकी सुधावृष्टिः. पश्यात्र,

शैलोऽयं शतकूट एष लिखितः पूर्णः पटीरद्रुमैः
एषा सा वरदानदी कमलिनीश्रेणीमनोहारिणी ।
फुल्लन्मञ्जुलवञ्जुलद्रुमलताकुञ्जं तदेतद्वनम्
सैवेयं मम चित्तलुण्ठनकलापाण्डित्यपारङ्गता ॥ ४५ ॥

अ—वयस्य, तव श्रेयः पदात्पदान्तरमारूढं. श्लाघ्यतमैवास्या आकृतिः.

रा—(सश्लाघं) सखे! पश्यपश्य चित्रलेखननैपुण्यम्.

निम्नोन्नतस्थाननिरीक्ष्यमाण-
च्छायाप्रकाशच्छुरितं शरीरम् ।
स्वेदः कपोलात् स्खलतीव किञ्चि-
दायस्तभावं विवृणोति दृष्टिः ॥ ४६ ॥

अ—(निपुणमालोक्य) अये महाराज! दिष्ट्या वर्धसे. यतस्तत्रभवती भवदनुरक्तेवालक्ष्यते.

रा—(ससम्भ्रमम्) कथमेतत्?

अ—अन्यथा भवन्नामाङ्कितमिदमङ्गुलीयकं कथं धारयेदङ्गुल्या.

रा—(स्वाङ्गुलिमालोक्य सानुस्मरणं) सखे! तन्वङ्ग्याः प्रथमदर्शनकाले सञ्जातसात्विकस्य मम कराद्विगलितं धारयति नूनं प्रियतमा. अङ्गुलीयकमुद्दिश्य—

त्वमेव भुवि भाग्यभागसि सखेऽङ्गुलीय प्रिया-
कराङ्गुलिपरिग्रहोत्सवमुपेत्य यद्दीप्यसे ।

परोपकृतिपण्डितोप्यसि मदीयनामाक्षर-
प्रकाशनवशेन मां यदनया मुहुस्स्मारयेः ॥ ४७॥

अ—सखे! युवयोराकारविशेषः परस्परानुरूपो भवतीति युक्तः तवास्यामभिलाषः.

रा—तेन हि अस्याः पार्श्वे आत्मानं लिलिखिषामि अनया चित्रफलकावलम्बिन्या लेखनशलाकया. वर्णिकापूरणन्तु ततो भविष्यति. (इति लेखनमभिनयति.)

अ—(दृष्ट्वा) वयस्य इदानीमतिरमणीयाकृती युवां रतिरतीशाविव राराज्येथे.

रा—तर्हि त्वमेव वसन्तः.

(प्रविश्य पटाक्षेपेण सिद्धिमती.) आलेख्यमालेख्यम्.

रा—(ससम्भ्रममुत्थाय) भगवति! इदमासनमलङ्क्रियतां. इदं तच्चित्रफलकम्,

सिद्धिमती (चित्रफलकं गृहीत्वा वेत्रासने उपविश्य) राजन् नर्मदातटस्थप्रणवेश्वरदर्शनकुतूहलेन त्वरमाणया मया विस्मृतमिदमालेख्यं प्रत्यावर्तयदिमंजनम्. पुनस्तदिदमालोकयन्त्याः प्रत्यायातमिव मे प्राणैः.

रा—क्षम्यतां भगवत्या परिजनोपनीतेऽस्मिन् चाक्षुषः करचापलकृतश्चापराधः.

सि—कोत्रदोषः शुद्धमेवेदं नवलेखनशिल्पमपि.

रा—कः पुनरियान् आदरातिशयः चित्रफलके भगवत्याः, यत्प्रयत्नेनापि गवेष्यते भगवत्या.

सि—श्रूयतामायुष्मता. इदमालेख्यभूषणायमाना मानुष्यपि देवीभ्योप्यतिशयिता पातिव्रत्यप्रभावाद्भवितेति, प्रतिदिनमस्याः प्रातः प्रतिकृतिसन्दर्शनात् सकलदुरितक्षयो भवेदिति च, संरक्ष्यते मया इदमालेख्यम्.

रा—(अपवार्य अशोकं प्रति) सखे! सेयमालेख्यगता भगवतीव महाप्रभावा कापि ब्राह्मणीति परिज्ञायते. कृतं नश्चापलेन.

अ—(अपवार्य) न तथा, किन्तु पावनत्वातिशयं वर्णयितुमेवायमारम्भो भगवत्याः इत्यवधेहि.

रा—(सप्रमोदं सप्रश्रयं च) भगवति! यद्यस्मादृशामेतद्दीय चरित्रश्रवणार्हता, तर्हि शुश्रूषुरयं जनोऽनुग्राह्यः.

सि—(विहस्य) राजन्! किं लोकतन्त्रे व्यापारयसि माम्.

रा—(सभयं) भगवति मैवम्. मादृशलोकानुग्रहार्थं क्षणिकोयं सानन्दसमाध्यन्तरायः सोढव्यः इति विज्ञाप्यसे.

सि—तर्हि श्रूयताम्.

रा—अवहितोस्मि.

सि—भीमो नाम महीपतिर्नृपकुलालङ्कारचूडामणिः।

रा—एष विदर्भेषु कुण्डिननगरे विजयते.

सि—अथ किम्.

रा— ततस्ततः.

सि— तस्येयं तनया

(राजाशोकौ साकूतं परस्परमुखमालोकयतः)

सि—मनोज्ञवसतिर्लावण्यसारश्रियाम् ।

विद्याकेलिगृहं विवेकविपणिः वैदग्ध्यवारान्निधिः
सच्चारित्रवितर्दिका विनयभूस्सौजन्यरत्नाकरः ॥ ४८ ॥

रा— अहो तर्हि सकलललनाललामभूतैव सा.

सि—इदमपि श्रूयताम्.

विहरन्ती प्रमदवने पदतलसङ्क्रान्तमृदुलकुसुमेऽपि ।
कठिनोपलशकलधिया रुद्धगतिः खिद्यते तन्वी ॥ ४९ ॥

रा—अयमाकारविशेष एव संवदति सौकुमार्यम्. अपि नामेयं कल्याणी भगवत्या प्रणिधानेन प्रत्यक्षीकृता उत भौतिकचक्षुस्सन्निकर्षेण.

सि—(सस्मितम्) उभयमपि समानमेवास्माकम्. तथापि श्रूयताम्. सेयं कमलालयायाः प्रथमोऽवतारइति अस्मद्गुरुभ्यः श्रुत्वा तामेतां सम्भावयितुमागता राज्ञा परिपूज्य कन्यान्तःपुरे न्यवेशिषि.

रा—अलमलमतीव रसनामायस्य. उपरितनमखिलमवगतमेव.

सि—इदन्तु श्रूयताम्.

रा—अवहितोऽस्मि.

सि—कदाचिद्भीमनृपतिः दुहित्रा भगवतो दमनस्य महर्षेः पादार

विन्दमभिवन्दयमानः तेनेत्थमभिदधे,

यथा लक्ष्मीस्सिन्धौ समजनि तथेयं तव कुले
पवित्रीकर्तासौ जनयितृचरित्रोः कुलयुगम् ।
तवेयं कन्या स्यात् त्रिजगदभिनन्द्यैः निजगुणै-
ररुन्धत्यादिभ्योप्यतिशयितसौशील्यगरिमा ॥५०॥

रा—अहो! महान् पारिशुद्ध्यातिशयः, य एवं दमनेनापि श्लाघ्यते.

सि—अन्यच्चेदमाकर्ण्यताम्. सेयमाकर्णितभवत्कथा भवद्बद्धभावेति मे हृदयम्.

रा—(ससम्भ्रमम्) भगवति! कथमेतत्.

सि—आहूता पितृसन्निधौ मुनिजनानासेवितुं सम्मदा-
दायाति स्वपदाम्बुजाग्रनखरानालोकमाना शनैः ।
स्थित्वा पार्श्वतले पितुः नृपनुतिप्रस्तावनायां नले-
त्याकर्ण्याद्भुतहर्षकौतुकभयव्रीडाकुला तिष्ठति ॥५१॥

रा—(अवचनमधोमुखस्तिष्ठति.)

सि—राजन्! इदमपि शृणु.

रा—अवहितोस्मि.

सि—ताञ्च सुमहितवधूगुणशालिनीं वरयिता जनः सार्वभौमस्समतिशयितसकलदेवताप्रभावश्च भवितेति प्रसिद्धिवशात् मनुष्यदेवगन्धर्वप्रमुखाः तस्यां बद्धभावाः श्रूयन्ते.

रा—(सवैक्लब्यमात्मगतं) अहह! दारुणोयं वज्रपातः. शतधा विशीर्णमिव मे हृदयम्. (अपवार्य अशोकं प्रति) सखे! दुर्लभतरं संवृत्तं. का वा गतिरिदानीम्.

जगति विदिता तन्व्यास्तस्या जनिर्महदन्वये
निखिलभुवनश्लाघ्यं शीलं नवीनतरं वयः।
प्रकृतिसुभगं रूपश्चेति प्रहृष्टमभून्मनः
मदभिलषितं दातुं दैवं प्रसीदति वा न वा ॥५२॥

अ—वयस्य! किमेवमनवसरे हृदयकुसुमं ग्लपयसि. एतावदुपकर्ता भगवानेव ते प्रसेत्स्यति. उपरिष्टाच्छृणवाव.

सि—राजन्! इदं च श्रूयताम्.

अगणितगुणगणजलधिम्
स्मरसमरूपं भवन्तमनुरक्ता।
अन्यान् गुणधन्यानपि
कन्या सा मन्यते न सम्मान्यान् ॥५३॥

अ—(अपवार्य) अपि श्रुतं श्रोतव्यम्.

रा—मा त्वरस्व. तदनुरागपरिपाटीमवगच्छाव.

सि—राजन्! एतच्च श्रूयताम्.

दूरादेव रुणद्धि सा क्षितिभृतां दूतीजनाभ्यागमान्
तद्वृत्तान्तनिवेदनोद्यतसखीः सासूयमालोकते।

त्वद्वार्ताकथने सखीस्त्वरयति श्रुत्वा पुनःपृच्छति
त्वामालेख्यगतं विलोक्य कुरुते तुष्टा प्रणामाञ्जलीन् ॥५४

रा—(अपवार्य) सखे ! कियतीमुन्नतिमारोपयति सा निजगुणैः क्रीतदासममुं जनम्.

सि—राजन्! अन्यच्च श्रूयताम्.

नो वीणां समुपैति पञ्जरशुकीं दृष्ट्यापि नालोकते
न स्नाने न विभूषणे न कुसुमे नाक्षे च धत्ते मतिम् ।
ध्यायन्ती किमपि प्रसार्य नयने दिक्षु श्वसन्ती मुहुः
निर्निद्रा च भवद्गतेन मनसा नक्तंदिवं ताम्यति ॥५५॥

रा—अहह ! मत्कृते कियतीं कष्टां दशामनुभवति सा कल्याणी.

सि—राजन्! अपरञ्च श्रूयताम्.

सा बाला नवहंसतूलशयनं हित्वा धरायां स्थिता
चेलान्तेन निरुध्य चन्द्रकिरणान् वातायनव्यापिनः ।
हस्तन्यस्तमुखाम्बुजातविगलद्बाष्पाम्बुधाराकुला
त्वद्ध्यानैकपरायणाऽपनयते सर्वां त्रियामां बलात् ॥५६॥

रा—(अशोकाभिमुखीभूय) सखे !

मामुद्दिश्य मनोभवेन विशिखैस्सन्ताप्यमानां बला-
दत्युत्कण्ठितमानसाञ्च सुदतीमाकर्ण्य तां प्रेयसीम् ।
गाढस्नेहतरङ्गितं मम मनश्शोकाभितप्तं ततः

कारुण्यद्रुतमङ्गजावघटितं भीतिप्रभुग्नं पुनः ॥ ५७॥

अ—युक्तमेवेदं तादृशस्य स्नेहस्य.

सि–(सस्मितं) राजन्! उपरुध्यते मे तपोऽनुष्ठानम्. तदन्यत्र गमनार्थमनुमन्यतां अयं जनः.

रा—(साञ्जलिबन्धं) भगवत्यनुगृहीतसच्चरित्रश्रवणात् द्रवीभूतइव अन्तरात्मा मे संवृत्तः. तदद्य प्रतिवचनदानेपि परवशोस्मि. यथारोचते भगवत्यै.

सि—राजन्! स्वस्ति भवते. इष्टेन युज्यस्व. (इतिनिष्क्रान्ता.)

रा—(किञ्चिदन्तरमनुसृत्य सनिश्वासं) सखे! गता खलु भगवती, यस्याः प्रसादात् प्रियतमायाः सर्वोपि वृत्तान्तः परिज्ञातः.

अ—तदविलम्बेन यतस्व तत्रभवतीपाणिग्रहणाय.

रा—(सचिन्तं) सखे! केनोपायेन तां प्रियतमामुपलप्स्ये?

किं याचेय महीपतिं शशिमुखीं याच्ञा न राजोचिता
युध्वा किं वशयेय तां स्वजनसंक्षोभाद्विरज्येत सा।
आहोस्वित् प्रसभं हरेय दयितां दूष्यस्स रक्षोविधिः
कर्तव्यानि न मे स्फुरन्ति बहुधा चेतः परिभ्राम्यति ॥५८

अ—सखे! दैववशात् सोपानक्रमेण सिद्धे त्वदीप्सिते किमेवं विक्लबोसि.

रा—(अनाकर्णितकेन.)

मारतामिस्रशास्त्रोत्थमोहान्धतमसा वृतः ।
कदा विलोकयिष्ये तां जगन्मङ्गलदीपिकाम् ॥५९॥

अ—वयस्य ! प्रसद्य शृणु तत्रापि विवृतमेव द्वारं दैवेन.

रा—कथमिव.

अ—श्रूयते किल चारमुखात् दमयन्तीस्वयंवरार्थं राजन्यसमाह्वायकाः दूताः विदर्भेभ्यः प्रतिष्ठन्त इति.

रा—(सश्लाघं) तर्हि सन्निहित एव समालोच्य करणीयस्य कार्यस्यावसरः. तदिदानीं—

आलोच्य भूयोहममात्यवृद्धैः
यथानियोगं सह तैर्यतिष्ये ।
महत्सु कार्येषु महीपतीना-
ममात्यबुद्धिः खलु दिव्यमस्त्रम् ॥ ६० ॥

(नेपथ्ये—वैतालिकः) विजयतां महाराजः. मध्यस्थितखरकिरणतया मध्यान्हकालोयं सन्तापनस्संवृत्तः. तथाहीदानीम्—

मध्येकोटरलीयमानविहगाः कार्कश्यहीनच्छदाः
मूलोपाश्रितदेहिभिर्निबिडिता निष्कम्पशाखा नगाः ।
सद्यःपाचितवृन्तविच्युतसुमास्तान्ता नतान्ता लताः
कुञ्जात्कुञ्जमनुच्चलद्वनमृगैः पूर्णोदरा भूधराः ॥ ६१ ॥

किञ्च—

प्रौढोष्णैः प्रतिरोधिनि प्रतिदिशं प्रोत्सार्यमाणे हिमे
भानोर्भानुभरात्प्रभीतिभरिते लीनस्वभावे जले ।
उद्दण्डैस्तपनातपैः परवशे पङ्कृते मारुते
विध्यण्डार्पितचण्डिमा विजयते माध्यन्दिनप्रक्रमः ॥६२॥

रा–(श्रुत्वा) तदावामपि माध्यन्दिनान् नियमान् निर्वर्त्य प्रकृतोचितमनुतिष्ठाव.

(इति निष्क्रान्तौ)

इति भैमीपरिणये प्रथमोऽङ्कः.

ओं तत्सत्

अथ द्वितीयोङ्कः.

(ततः प्रविशत्यमात्यः)

अमात्यः—(सप्रमोदं)—

आदिष्टोस्मि महीभुजा क्षितिभुजां सम्भावनार्थं क्रमात्
कल्याणीं परिणेतुमुत्सुकधियस्तेते समभ्यागताः ।
प्रत्युद्गम्य सुपूजितास्समुचितस्थानेषु संवेशिताः
सर्वे ते प्रतिपालयन्ति निषधक्ष्मासार्वभौमागमम् ॥ १ ॥

तदस्मिन्नेव प्रत्युषसि सकलराजाधिराजवन्द्यमानचरणारविन्दः श्रीमान् वैरसेनिस्सार्वभौमः कुण्डिनं नगरं समेष्यतीति तदमात्यप्रेषितां पत्रिकामनुवाच्य प्रहृष्टधीरस्मत्स्वामी विदर्भेश्वरः तं सभाजयितुं पुराद्बहिः क्रोशमात्रे निवेशितबलभारःप्रतीक्षते. अहमपि तदनुशासनानुसारेण अस्मिन् गव्यूत्यन्तरे सह सभाजनोपकरणैः प्रतिपालयामि तदागमनम्. (प्राचीमवलोक्य) हन्त! स चोषःकालोपि अतीतप्रायएव. तथाहीदानीम्—

अयमुदयगिरीन्द्रोदग्रशृङ्गाग्रभागे
प्रथमदिशि दिनानां जायते सार्वभौमः ।
दिशिदिशि च समन्ताद्दीयते गोसहस्रम्
कमलमुकुलकारागारमुक्ताः द्विरेफाः ॥ २ ॥

(सभक्तिप्रकर्षमञ्जलिं बद्ध्वा)–

भौमं वारि करैर्निपीय निभृतं दिव्यामृतैस्सिञ्चते
प्रालेयत्विषि सङ्क्रमय्य किरणान् सस्यानि संबिभ्रते ।
कालुष्यं परिहृत्य वस्तुषु सदारोग्याय सन्नह्यते
दृष्टेर्दर्शयते च रूपमखिलं देवाय तुभ्यं नमः ॥ ३ ॥

सेनापतिः—(प्रविश्य पटाक्षेपेण) आर्य! महाराजस्समाज्ञापयति भवन्तम्. समतीतस्स समादिष्टकालः. कुतोद्यापि नालोक्यते सार्वभौमः, दीयतां तत्र प्रत्युत्तरमिति.

अमा—सखे जयसेन! ममापि सएव विचारश्चेतसि परिवर्तते, सोढव्य एव खलु सुदूरादागन्तॄणां आगमनकालातिपातः.

जय—युज्यतएवैतत्. तथापि ग्रहपतिप्रमुखाः ग्रहाइव राजानः कालनियमाननुरुद्ध्यैव प्रवर्तन्ते खलु.

अमा—युक्तमाह भवान्. अयमेव न्याय्यः पन्थास्सर्वेषामपि, यतः–

क्रियमाणकालनियमानुपालनं
श्रियमातनोति नयमादधाति च ।
नियमात्ययस्तु नयमाहनिष्यति
स्वयमादिहेतुरयमात्महानिषु ॥ ४ ॥

तथापि सत्यसङ्गरः स सार्वभौमः केनापि महता प्रत्यूहेन प्रतिबद्धस्स्यात्.

जय—आहोस्वित् कियानयमुद्यमः इत्युदास्ते किम्?

अमा—यद्युदासीनः अभविष्यत्तर्हि प्रत्रिकामुखेन नादेक्ष्यदेव.

जय—युज्यते. तर्हि तावत्प्रतीक्षणीय एव तदागमनावसरः.

राष्ट्रियः—(प्रविश्य पटाक्षेपेण) आर्य! अमात्य प्रज्ञासागर! महाराजस्त्वां समादिशति. 'व्यामान्तरमारूढस्सविता, कुतोद्यापि नायात स्सार्वभौमः? दीयतां तत्र प्रत्युत्तरम्' इति.

अमा—(सचिन्तमात्मगतं) अहो! कष्टतरमापतितम्. किमिवोत्तरयेयम्. आगमिष्यतीति कुतोद्यापि नायातइत्यस्य नोत्तरं भवेत्· नैवागमिष्यतीति आगमे सति असत्यं भवेत्. न ज्ञायते कारणमित्यसामर्थ्यं सूचयेत्. अहह! सर्वथा बुद्धिक्षोभायैवेदं मन्त्रिपदम्. अन्यच्च—

अवश्यं वक्तव्यः किमपि हितमुद्दिश्य नृपतिः
गुणज्ञश्चेत्सोयं ननु भवति सर्वत्र कुशलम् ।
तथा नो चेदेवं विघटयति वा कार्यसरणी-
रमात्यानामेव व्यतिषजति दोषो न तु गुणः ॥ ५ ॥

किञ्च—

स्वामी यद्यनुरुध्यते दृढतरं लुप्येत्प्रजाभीप्सितम्
लोकश्चेदनुवर्त्यते क्वचिदपि स्यात्स्वामिकार्ये क्षतिः ।
स्वेष्टे वर्त्मनि गम्यते यदि तदा स्वात्मा न सन्तुष्यति
त्रीण्येतानि तु दुर्घटानि तदहो कष्टोऽधिकारक्रमः ॥ ६ ॥

राष्ट्रियः—आर्य किमेवमनुत्तरयता भवता किमप्यनुचिन्त्यत इव. त्वरयते च स्वामी. तद्दीयतां प्रत्युत्तरम्.

अमा—(स्व) इदमपरं शिरश्शूलमुद्भूतं. किमिवोत्तरयेयं. भवत्वेवं तावत्. (प्रकाशं) भद्र! अजितवर्मन्! विज्ञाप्यतां महाराजः, 'केनापि निमित्तेन चिरयति स सार्वभौमः. तदहमेवागत्य तच्च निमित्तं रहसि विज्ञापयिष्यामि. तावद्विलम्बस्सोढव्यस्स्वामिना' इति.

अजि—यथाज्ञापयत्यार्यः. (इति निष्क्रान्तः).

जय—आर्य! यदि स सार्वभौमोद्य नैव समायायात्तदा सर्वेषामस्मदीयानामयमुत्साहः सम्भज्येत.

अमा—न तावदेव. अनर्थश्च संम्भवेत्.

जय—(ससम्भ्रमं) कथमिव.

अमा—श्रूयताम्. अत्र तावत्समाहूताः ससैन्याः युवानश्च क्षत्रियास्समवेताः. एकफलोद्देशेन ते सर्वेपि समष्टिवृत्तिनिमित्तमाग्रहारिका इव भर्तृदारिकानिमित्तं परस्परं कलहायमानाः प्रक्षोभयेयुर्जगदखिलम्. तदा भर्तृदारिकारक्षणमस्माकं दुष्करं भवेत्. तदागमेतु तएते विभावसोः पुरतः खद्योता इव प्रलीनाः प्रचलेयुः.

ज—युज्यते युज्यते. आर्य! ममोद्ग्रीविकया पश्यतः किमेवं अनवसरे वैद्युतेनेव प्रकाशेन प्रतिहन्यते चक्षुः.

अमा—(समन्तादवलोक्य) अहो! कोपि दिव्यतेजःपुञ्जः समवतरतीति परिज्ञायते.

उभौ—(समुत्सुकौ पश्यतः) आकाशे गीयते—

कृतनतजनताभरणं श्रुतिततिसुदतीशिरोधृताभरणम् ।
शरणं भवभयतरणं भजदघहरणं भजामि हरिचरणम् ॥ ७ ॥

जय—प्रशान्तगम्भीरोयं सरस्वतीप्रसरः.

अ—(निपुणं निरूप्य) सखे जयसेन !

शारदोपधृतकच्छपीसमाकारदोर्निहितवीणयोज्वलन् ।
शारदोडुपतिकान्तकान्तिमान् नारदोमुनिरयं विभाव्यताम् ॥

उभौ—(प्राञ्जली समुत्तिष्ठतः).

(ततः प्रविशति यथानिर्दिष्टवेषो नारदः).

नारदः—अहो ! मयि प्रसादातिशयः परमेश्वरस्य, यदीयपादारविन्दमिलन्मिलिन्दायमानो मदन्तरात्मा विषमेभ्यो विषयेभ्यः परावर्तमानः प्रसीदति. तथापि कलहदर्शनप्रत्याशा परं मां बाधते. प्रकृते तु दमयन्तीनिमित्तं बहूनां कलहस्सम्भवेदेव. परन्तु नलस्य पुरतः नकोपि प्रत्यवतिष्ठतइति दिव्यान् इन्द्राग्नियमवरुणानासाद्य कंचित्कलहाङ्कुरमुत्थापितवानस्मि. तेऽपि गुणज्ञा एवेति स कलहाङ्कुरो न सम्यक्प्रवर्धेत. तस्मात्कलिःकलिरिति कठिननीलशिलाकारः कोपि कोपी क्वापि प्रलीय वर्तते. स चान्वेष्टव्यः. तदद्य स्वर्गादवतीर्णोहं अस्यां वरदायां माध्यन्दिनान्नियमान्निर्वर्त्य सत्वरं पातालमनुयास्यामि.

(इति प्रमोदमन्थरं परिक्रामति).

उभौ—(साष्टाङ्गम् प्रणमतः).

ना—(दृष्ट्वा) वत्सौ विजयिनौ भूयास्तम्.

अ—भगवन्! अतर्कितोपनतेन भवद्दर्शनेन सुधावर्षेणेव आप्यायितोहं विस्मृतवेद्यान्तरस्संवृत्तोस्मि. तथापि किञ्चिदिदमभ्यर्थये.

ना—अलं रसनायासेन. अनिवेदितमपि विदितमेव भवदभिमतम्. शृणु युष्मत्स्वामिसम्भावनार्थमेव कुण्डिनपुरमुद्दिश्य अध्वनि समायाते नले—

कतिपयदिगधीशाः केन चिच्छद्मना द्रा-
क्किमपि किमपि सान्त्वं कल्पयन्तः क्रमेण ।
स्ववशमथ नयन्तस्सत्यसन्धं नरेन्द्रम्
कचिदभिमतकृत्ये प्रापयन् प्रेष्यभावम् ॥ ९ ॥

अ—(श्रुत्वा वैक्लब्यं नाटयन्) अहो! अस्मद्दौर्भाग्यं, यद्देवा अपि अस्माकमनर्थं परिकल्पयन्ति—

यमानेतुं राज्ञा क्षितिपपटलं मेलितमभू-
त्स एवान्यत्रासीदहह परदेयाऽजनि सुता ।
न दद्याच्चेत्कन्याम् ध्रुवमिदमनर्थोऽय भविता
महापङ्के मग्नो द्विरद इव खिद्येत नृपतिः ॥ १० ॥

ना—भद्र प्रज्ञासागर! उचितमनुचिन्तयासि. तथापि श्रूयताम्. महाराजनलस्य प्रेष्यभावस्तावदेकदिनावधिक एव. तदेष 'स्वयमेकक

एव समागत्य रहसि देवकार्यं निर्वर्त्य श्वः प्रभाते युष्मादृशैः दृश्यमानो युष्मत्स्वामिमनोरथं सफलीकरिष्यति.

अ—(सप्रमोदं साञ्जलिबन्धञ्च) भगवन्! अनुगृहीतास्स्मः, प्रीतास्स्मः, कृतार्थीकृतास्स्मश्च.

ना—वत्सौ! अलमलमस्मदुपरोधेन. प्रकृतकार्यनिर्वर्तनाय प्रयतामहे वयम्. (इति निष्क्रान्तः).

उभौ—(सोल्लासं) आवामपि एतद्वृत्तमस्मत्स्वामिने विदर्भराजाय निवेद्य कृतकृत्यौ भवाव. (इति निष्क्रान्तौ) (शुद्धविष्कम्भः).

(ततः प्रविशति यथा निर्दिष्टो राजा).

राजा—(सोल्लासं)–

स्वप्ने दिक्षु विदिक्षु च प्रतिदिनं या वीक्षिताऽभूद्भ्रमा-
देकैकक्षणमात्रमब्दसदृशं नीतं मया यत्कृते ।
आसन् यत्र मनोरथाश्च विविधास्सा कन्यकाऽस्मिन् दिने
द्रष्टव्येति कुतूहलाकुलतया चेतः पुरो धावति ॥ ११ ॥

तथापि मध्येमार्गं दैवं कार्यान्तरं समापतितमिति कृतार्थताहेतुरेवेदम्. (सानुस्मरणं) अहो! मयिप्रसादातिशयः त्रिभुवनसाम्राज्यधुरन्धरस्य पुरन्दरस्य, यतस्स एषः–

पौलोमीकुचकुम्भकुङ्कुमरजस्सङ्घर्षिणा पाणिना
स्पृष्ट्वा शीर्षमथोन्नमय्य चुबुकं प्रास्फालयन्नंसयोः ।

दृष्ट्वा प्रीतितरङ्गितेन सुचिरादक्ष्णां सहस्रेण मा-
मात्मीये महति न्ययूयुजदहो कस्मिंश्चिदाराधने ॥ १२ ॥

अहो! महानुभावास्तेपि यमवरुणानलाः सादरं मामनुगृह्णानास्सन्तो विनीतं मामुद्दिश्य—

मृदुहसितमुखेन सूचयन्तः
कमपि मनोरथमात्मनामवोचन् ।
शशिकुलतिलक! त्वमद्य केना-
प्यनवगतः पथि कुण्डिनं प्रयाहि ॥ १३ ॥ इति.

तदद्य मया सुविहितमेव प्रथममेव सर्वानानुयात्रिकान् स्वयंवरस्थानमनुप्रेषयता. इदानीमेकक एवस्वैरं निर्गत्य कन्यान्तःपुरमपि तदुपदिष्टेनैव मार्गेण प्रविशेयम्. (पुरोवलोक्य) अहो! रमणीयता कुण्डिनपुरस्य—

प्रकाशन्ते वीथ्यो जितयुवतिसीमन्तविभवाः
मणीपेटीतुल्याः पथिपथि गृहाः पङ्क्तिश इमे ।
लसद्रत्नाकाराः प्रतिगृहमिमाः पक्ष्मलदृश-
स्सुवर्णत्वं प्राप्तास्सुभगसुभगाश्चात्र गृहिणः ॥ १४ ॥

इतस्ततस्ससम्भ्रमभ्रमत्पुरजनपरिपूरितेयं पुरी तावत्—

संसिक्ता पथिपथि गन्धवारिपूरै-
स्संसक्ता दिशिदिशि तोरणध्वजाङ्कैः ।
संभिन्ना प्रतिपथमुत्थितैः प्रधूपै-
स्सङ्कीर्णा भुविभुवि मङ्गलप्रसूनैः ॥ १५ ॥

किञ्च—

घनैर्घुसृणराशिभिर्घुमघुमायते स्वापणै-
जैवक्कणितनूपुरैर्झणझणायते यौवतैः ।
घनध्वनितघण्टिकैर्घणघणायते स्यन्दनै-
र्ध्वनत्कनकदुन्दुभेर्धणधणायते निस्वनैः ॥ १६ ॥

अत्र तावद्विपणिगतानां आसां सुदृशां स्पृहणीयः एष भ्रमचमत्कारः—

स्रजं रचयितुं वधूर्झटिति गृह्णती चम्पकं
रदच्छदरुचाऽरुणं सृजति बन्धुजीवभ्रमात् ।
दरस्फुटितबन्धुकं सपदि मन्दहासाञ्चितं
सितोत्पलधियान्यया श्रवणपाशमारोप्यते ॥ १७ ॥

(अन्यतोवलोक्य) इतश्च वेशवाट्यां सायन्तने समये मधुरमधुरोऽयमासां वारविलासिनीनां विलासः. एताः किल.

प्रपदधुतदुकूलं देहलीदत्तपादाः
पथि जनमिह वक्रग्रीवमालोकयन्त्यः ।
स्ववशमथ नयन्ति श्रीमतां चित्तवृत्तिम्
नवमिव नवनीतं द्रावयन्त्यः कटाक्षैः ॥ १८ ॥

(समन्तादवलोक्य) अहो! रमणीयतरमेतत् प्रतिपथसङ्गतोत्तुङ्गमातङ्ग-शताङ्गजितकुरङ्गतुरङ्गतरङ्गनिरन्तरं पुरान्तरम्.

एते तावन्मेघशाबायमानाः
आयान्तः के किन्नु नागा भवेयुः ।

नो नो ज्ञातं भूभृता सङ्गताया-
मस्यां पुर्यामान्तरा गर्भशैलाः ॥ १९ ॥

(पार्श्वतोऽवलोक्य)

दीर्घः पादशिरोधिनि प्रतिकलं लम्बोष्ठतां प्रापितः
कोयं बन्धुरपृष्ठभागविनमत्कङ्कालकाण्डाश्रितः ।

(निपुणं निरूप्य)

राज्ञां कार्यधुरन्धरो बलवतामग्रेसरश्चाप्यसा-
वुष्ट्रोनाम स पश्यतामिह नृणामुद्ग्रीविकाचार्यकः ॥ २० ॥

अस्तु नामैतत्. दक्षिणेन सर्वमङ्गलायतनं उत्तरेण सहस्रस्तम्भप्रासादं प्रस्थाय अनेनैव पथा कन्यान्तःपुरं प्रविशामि. (परिक्रम्यावलोक्य च) अहह! नयनाभिराममिदमन्तःपुराजिरम्. यत्र च कुसुमितलतासनाथैर्बालपादपैः मणिवापिकाभिर्विहारवेदिकाभिः जलयन्त्रैर्दीपयन्त्रैश्च परिशोभितं गृहोद्यानमिदं विद्योतते.

उद्देशोऽयं नयनसुभगः पुष्पितारामकुञ्जै-
र्गुञ्जद्भृङ्गभ्रमणसभया यत्र भैमीविहाराः ।
एते भैमीमृदुलपदविन्यासधन्याः प्रदेशा
श्चैते तस्याः व्यतिकरलगद्गन्धसारास्समीराः ॥ २१ ॥

(पुरो गत्वा सश्लाघं) अये! महानत्यद्भुतश्च प्रभावो देवानाम्.

द्वारिद्वारि प्रभुनियमिताः सौविदल्लाश्चरन्ति
क्रूराकाराः कठिनहृदयाः खड्गिनोपि भ्रमन्ति ।

अन्तर्यान्तं सरभसमहो! कोपि नालोकते माम्
नो संरुन्धे तदहमधुना कोप्यदृश्योस्मि सिद्धः ॥ २२ ॥

तदहमिदानीं निश्शङ्कमनेन सोपानपथेन अन्तःपुरं प्रविश्य तत्रभवतीं ग्राहयामि दिविषदादेशम्. (सोपानपथमारुह्य निमित्तमभिनयन्)

शंसन्निव शुभोदर्कं स्पन्दते दक्षिणो भुजः ।
साधितादेवकार्यान्मे सुकृतं सिध्यति ध्रुवम् ॥ २३ ॥

(इति सपरितोषं परिक्रामति. नेपथ्ये)

[1] पूरयति तव मनोरथवृक्षं देवः फलेन मधुरेण ।
तस्मात्सखि! कथमपि धैर्यं गृहीत्वा स्वयं समाश्वसिहि ॥२४॥

रा—(समाकर्ण्य सहर्षं) अये! एषा तावदुत्कण्ठितां काञ्चित्समाश्वासयन्त्याः तत्प्रियसख्याः समाधानोक्तिः. (शब्दानुसारेण दृष्ट्वा) अहह! सफलीकृतं नश्चक्षुर्युगम्. यैषा अन्तःकक्ष्यावरण्डके सखीसहस्रपरिवृता तरुणीमयमिव कञ्चित्प्रपञ्चं दर्शयन्ती मणिमयमञ्चतलमधिशयाना कया चित्समाश्वास्यमाना स्तब्धेव लिखितेव उत्कीर्णेव लक्ष्यते, सैवेयं त्रिजगल्ललामभूता दमयन्ती.

इयं कमलिनी भवेन्मुखपदाक्षिपाणिच्छला-
त्सरोजपरिगुम्भिता नहि रवेः करास्पर्शनात् ।
न चेत्तटिदियं भवेन्नखलु निश्चलत्वान्न चे-
द्विधातृकरकौशलं जयति कस्य चिद्भाग्यजम् ॥ २५ ॥

---

[1] पूरेइ तुज्झ मणरहरुक्खं देव्वो फळेण महुरेण ।
तासहि कहं वि धीरं घेत्तूण सअं समाससिहि ॥

तदत्र मणिस्तम्भपार्श्वे तिष्ठन् श्रोष्यामि तावदासां विस्त्रम्भालापान्.

(इति यथोक्तं करोति.)

(ततः प्रविशति यथानिर्दिष्टा मन्त्रिपुत्र्या शारदया सह दमयन्ती विभवतश्च परिवारा:).

सखीनामेकतमा (दमयन्तीमुपवीज्य),

पूरयति तव मनोरथवृक्षं देवः फलेन मधुरेण ।
तस्मात्सखि! कथमपि धैर्यं गृहीत्वा स्वयं समाश्वसिहि ॥

(इति पूर्वोक्तं पठति).

दमयन्ती (कथञ्चित्समाश्वस्य) सखि कमलिनि! यद्यपि त्वं मदीयं हितमेवोद्दिश्य एवं भणसि. तथापि—

रा—(आकर्ण्य सस्पृहं)—

अयं न वनितागलध्वनिरपि त्वयं मान्मथ-
ज्वरज्वलितचेतसा मसमबाणमौर्वीरवः ।
न चेद्द्विधिकुटुम्बिनीविधृतकच्छपीनिक्कणो
न चेत्कनकवल्लरीकुसुमसङ्गिभृङ्गारवः ॥ २६ ॥

द—एवं मूलच्छेदे समुपस्थिते कथं मन्मनोरथतरुः फलेत् . कथं वा समाश्वसिमि. त्वं तावज्जलाभावेन शुष्यत्कण्ठं जनं वाङ्मयमेव पायसं पाययसि.

रा—निपुणेयं वधूः.

शारदा—सखि दमयन्ति! मैवं मंस्थाः. विज्ञप्तं खलु तातं प्रति

अमात्यशेखरेण मे पित्रा राष्ट्रियमुखात्, यथा "स महाराजः केनापि निमित्तेन चिरयते. तच्च निमित्तं स्वयमेवागत्य रहसि विज्ञापयिष्यामि." इति. तच्च विचारयामः.

रा—मामुद्दिश्यैवेयमुक्तिस्स्यात्.

द—सखि! किं वा विचारणेन. तदर्थमेव स्वयंवरे समुपस्थिते प्रथममेव तेन सन्निधातव्यम्. तथा नकृत्वा उदासीने अननुरक्ते अन्यासक्ते वा सति तस्मिन् महाभागे,

रा—(ससम्भ्रमं) सुन्दरि! नाहमुदासीनो नाननुरक्तो नाप्यन्यासक्तश्च देवकार्यवशाच्चिरायितं मया. क्षम्यतामयमपराधः.

(इत्यञ्जलिं बध्नाति).

शा—सखि! युक्तमाह भवती. तथापि त्वं मास्मान्यथा मन्यथाः. सर्वथा तमेव प्राप्स्यसि. उक्तमेव किल तातं प्रति ज्योतिर्विद्यानिधिना दैवज्ञवर्येण, "सुलक्षणेयं कन्या सार्वभौमी भविष्यति" इति.

रा—युक्तमाह दैवज्ञवर्यः. एष आकृतिविशेष एव महत्तां प्रतिपादयति. अस्याःखलु

मुखं शशिसखं महाविभवलक्षणे चेक्षणे
समा तिलसुमाकृतेर्वदनभासिका नासिका।
तनुस्सतनुचम्पकच्छविरिवाङ्गमङ्गं रतेः
कृताङ्गमदभङ्गमित्यनुपमानमालोक्यते ॥ २७॥

द—सखि! किं वा प्रयोजनमनुगतैर्वा सुलक्षणैः विपर्यस्त-

विधिविलसितानां अस्मादृशाम्. पश्य तदा दूत्याय प्रेषितायाः प्रियसख्याः केशिन्यास्समक्षं स महाभागः तथातथा सल्लप्य तथातथा स्वानुरागं प्रकाश्य स्वप्रतिच्छन्दपरिशोभितं आलेख्यञ्च मह्यमनुप्रेष्य समुपस्थिते कार्यसमये स्वयमन्यथाऽभूदित्यहो मे भाग्यविपर्ययः.

रा—(श्रुत्वा सावेगमात्मगतं) का वा सा केशिनीति प्रियसखी? कोवा तथातथा कृतवान्. अहह! परविषयेयं कथा. सर्वथा अन्यत्रानुरक्तेयमिति व्यक्तं भवति. एवं स्थिते किमिदमकाण्डताण्डवं मे मनसः. एवमेवास्याः परत्रानुरागं विभ्रम्य मद्विषयमवधार्य सा सिद्धिमती तदा तथातथा वर्णितवतीति ज्ञायते. अस्यास्सङ्घटनोद्यतः स हंसः क्व गतो वा न जाने. अथवा तदा उक्तमेव किल मे प्रियसुहृदा अशोकेन "मधुरमधुरैर्वचोभिराशामोदकान् प्रदर्श्य क्वापि पलायितः" इति. एवञ्च मे नास्त्यत्र विषये उभयथाप्याशावकाशः.

शा—सखि! समाश्वस्य विचिन्तय, तादृशः स महानुभावः कथमन्यथा भवेत्. किन्तु केन चित्कार्यान्तरेण निरुद्धस्स्यात्. समये सन्निधास्यत्येवेति मे मतिः.

रा—युक्तमाह शारदा.

द—युक्तमाह भवती. अहह! अहमेव दुर्जनीकृतास्मि कयाचिन्मनोनिर्वेदनया. कठिनानि किल स्त्रीचित्तानि भवन्ति. यतस्स महाभागः प्रथमदर्शनकाल एव मधुवने हार्दप्रेमपरिवाहिणा चक्षुषैव प्रकाशितान्तरभावसर्वस्वः प्रच्याव्य च्छद्मनैतदङ्गुलीयकं सखीजना-

न्तरायान्तरितः तदादि काङ्क्षां दशामनुभवति वा नजाने. तदेतदनालोच्य सहसा तमेवमुपालब्धवत्यस्मि निष्करुणा.

रा—(श्रुत्वा अङ्गुलीयकञ्च दृष्ट्वा) अहो ! वञ्चितोस्मि कथान्तरेण सरलहृदयेयं मदीयान्येव पूर्ववृत्तान्यनुस्मृत्य म्लायति. परन्तु मत्प्रतिच्छन्दप्रेषणव्यापारः प्रियसख्या केशिन्या सह मत्सल्लापश्च विमर्शनीयः.

(इति चिन्तयन् स्थितः).

(प्रविश्य पटाक्षेपेण चेटी राज्ञस्सङ्घट्टमासाद्य पतित्वा सभयसम्भ्रममुत्थाय) [1] भर्तृदारिके ! स एष महाराजः.

(इति निश्वसन्ती किञ्चिद्विरमति.)

रा—अहह ! प्रमादः. अनया सङ्घट्टनया परिज्ञातोस्मि. तद्देवकार्यसङ्घटनसन्दर्भो विरुध्येत. (इति किञ्चिदपसरन् विचिन्त्य) आः नाहमद्य केनापि ज्ञातुं शक्यः. दैववरकञ्चुकितस्य मे कोयं मतिविभ्रमः.

(इति यथास्थानमुपेत्य पश्यन् तिष्ठति).

द—(ससम्भ्रममुत्थाय कतिचित्पदानि गत्वा) हञ्जे विमले ! स महाभागः समागमनेन किमस्माननुगृह्णाति ? तर्हि क्व समायाति ? कुत्र दृष्टस्त्वया ? (इति पृच्छन्ती समन्तादवलोकयति.)

रा—अहो ! चेटीवचनान्मदागमनमाशङ्क्य समादरात्सरभसमुच्चलन्त्याः मधुरमधुरोयमस्याः सर्वोपि व्यापारः. तथाहि—

अभ्युत्थानं क्वणघणरणन्मेखलारावमिश्रं
पादन्यासः प्रचलनझणन्मञ्जुमञ्जीररम्यः ।

---

[1] भट्टदारिए सो एसो महाराओ.

दृष्टिक्षेपस्सरभसवलद्भृङ्गमालामनोज्ञः
सस्मेरास्यो मृदुलमधुरस्सादरो वाग्विलासः ॥ २८ ॥

विमला—[1]भर्तृदारिके सावशेषेपि मम वाक्ये किमेवमकाण्डे भ्रान्तासि.

द—(निराशं निवृत्य) मूढे! झटिति पूरय. किन्तत्सावशेषं वाक्यम्.

वि—(सभयं)[2] भर्तृदारिके! "स एष महाराजः स्वयंवरार्थं स्वपुरान्निर्गत्य मध्येमार्गमिन्द्रादिभिः देवैः कुत्रचित्प्रेष्यत्वं गमितः श्वः प्रभाते स्वयंवरस्थानमुपैष्यति" इति नारदोदितममात्यप्रज्ञासागरेण तातपादसन्निधाने विज्ञाप्यमानमाकर्ण्य केशिनी मन्मुखेन श्रीमतीं विज्ञापितवती. श्रुत्वा भर्तृदारिका प्रमाणम्.

द—(श्रुत्वा सवैक्लब्यम्) भवतु प्रियसखी केशिनी क्व चिरयति?

वि—[3]भर्तृदारिकामनोविनोदनार्थं तदालेख्यं तं हंसपञ्जरञ्च गृहीत्वा तेनैव वेषेण त्वरितमागच्छामीति सख्या कमलया सह चित्रशालां प्रविष्टा.

---

[1] भट्टदारिए सावसेसे वि मह वक्के किं एव्वं अकण्डे भन्तासि.

[2] भट्टदारिए सो एसो महाराओ सअंवरत्थं स्वपुरादो णिग्गमिअ मज्झेमग्गं इंदआदिहिं देव्वेहिं कुत्तावि पेसत्तणं गमिदो सुवो पहादे सयंवरट्ठाणं उवेइस्सदित्ति णारदोदिअं अमच्चपण्णासाअरेण तादपादसण्णिहाणे विण्णाप्पिजमाणं सुणिऊण केसिणी मम्मुहेण सिरिवदिं विण्णाविदवदी. सुणिअ भट्टदारिआ पमाणम्.

[3] भट्टदारिआमणोविणोदणत्थं तं आलेक्खं तं हंसपजरं अ गेह्णिअ तेण एव्व वेसेण तुवरिअं आअच्चम्मित्ति सहीए कमलाए सह चित्तसालं पविट्ठा.

रा—अद्य तावत्तदागमने मत्संशयनिवृत्तिपूर्वकं पूर्वोत्तरसन्दर्भः स्पष्टीभविष्यति.

द—सखि शारदे! ज्ञातमिदानीं तदागमप्रतिबन्धकम्. तदागमनविघटनेन तेषामिन्द्रादिदेवानां कस्स्वार्थलाभस्स्यात्?

शा—स्यादेव किञ्चित्.

द—एवञ्चेत् श्वस्समहाभागस्सन्निधास्यतीत्येतदपि न श्रद्धेयमेव.

शा—कथमिव?

द—तदपि ते विघटयेयुरेव.

शा—न तथा. नारदोदितमिति विश्वसनीयमेव तदागमनम्.

द—(सवैक्लब्यम्) आम शारदे! आम तथापि विघटकेषु सत्सु मे चेतः तदनागमनमेव प्रत्येति. आगमनं प्रति तु संशेते.

शा—न तथा मन्यताम्. अस्ति खलु भाग्यपरिपाको नियामकः.

द—परिज्ञायते कार्यत एव स भाग्यपरिपाकोऽपि. पश्य य एषः—

विषमेककरेण सङ्गिर-
न्नमृतञ्चान्यकरेण दर्शयन्।
त्वरयत्यसुमोचनाय मां-
हृदये सूचयते च मे शुभम् ॥ २९ ॥

रा—अहो! मदागमनविलम्बनं अनर्थावहमासीदस्याः. अय्यनभिज्ञे! किमर्थमेवं खिद्यसे? मत्तस्सहस्रगुणाधिकस्सहस्राक्षस्त्वां प्रीणयिष्यति.

शा—सखि! किमेवं विक्लबासि. आगताः किल रूपवन्तश्च

श्रीमन्तश्च युवानो राजानः. सर्वथा तस्य महाभागस्य अनागमपक्षे एतेष्वेव अनुगुणं कञ्चिद्वृणीष्व.

रा—(सश्लाघं) साधूपक्षिप्तं शारदया. श्रोष्यामि तावदिदानीं, किमुत्तरं दास्यतीति.

द–(सरोषं) मनसा वृतादन्यं त्रिभुवनपतिमपि स्वप्नेऽपि न स्मरेयम्.

रा —अहो! दृढसङ्कल्पेयमिन्द्रादीनपि नानुमन्यत इति ज्ञायते.

शा—मुग्धे! न तथा. शृणु, स महाभागस्सर्वथा यदि न सङ्घटेत तदा किं करिष्यसि?

रा—सारतरोयं प्रश्नः.

द—न वक्तव्यमेवैतत्.

शा—अनुचितमिदमालोचितम्.

"असुर्या नाम ते लोका अन्धेन तमसा वृताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः" ॥

इति दोषश्रवणात्.

द—तर्ह्युपायान्तरमप्यस्त्येव.

शा—कीदृशं तत्?

द—श्रूयतामत्र कुलवधूनां वृत्तिर्द्विविधा भोगो योगश्चेति. तयोः स्थानं भवनं वनञ्च. तत्साधनं रागो विरागश्च. तत्प्रापकवेषः पीताम्बरं श्वेताम्बरं च. तत्साधकजीवनं पक्वमपक्वञ्च. तयोः फलमैहिकमामुष्मिकञ्च. तत्रोपास्यदेवता पतिः श्रीपतिश्चेति. तत्र दैवात्प्रथमवृत्तेरसम्भवे

द्वितीया वृत्तिस्सिद्धैव. कात्र निर्वेदना.

रा—साधूपन्यस्तम्. ज्ञातमस्याः हृदयतत्त्वम्. मत्प्राप्तौ भोगरता अन्यथा योगरतेति.

शा—सखि! निरुत्तरास्मि संवृत्ता. सर्वथा भगवांस्त्वां परिरक्षतु.

(प्रविश्य प्रतीहारी प्रणम्य)

[1] विजयतां भर्तृदारिका. एताः रम्भा उर्वशी मेनका तिलोत्तमा चेति चतस्रोऽप्सरसः गगनादवतीर्य भर्तृदारिकादिदृक्षया द्वारदेशे तिष्ठन्ति.

द—(सादरं) अपि नाम देव्यो मां दिदृक्षन्ते? तर्हि त्वरितं सम्भाव्य प्रवेशय.

प्रतीहारी—[2] यथाज्ञापयति भर्तृदारिका. (इति निष्क्रान्ता.)

द—(ससम्भ्रममुत्थाय सह सखीभिः कतिचित्पदानि गत्वा प्रतिपालयन्ती तिष्ठति).

रा—पुरुषमुखेन न सङ्घटते सन्धिरित्यालोच्य तैरिन्द्रादिभिरिमाः प्रेषितास्स्युः. अनुकूलमेवेदम्. आभ्यो यान्युत्तराणि तान्येव मह्यमपीति अपनीतो मम प्रश्नायासः.

(ततः प्रविशन्त्यप्सरसः)

विमला—[3] इतइतो देव्यः.

---

[1] विजेदु भट्टदारिआ. एदाओ रम्भा उव्वसी मेणआ तिलुत्तमा एत्ति चेतसाओ अच्छराओ गगणादो ओदरिअ भट्टदारिआदिदक्खाए दुवारदेसे चिट्ठन्दि.

[2] जह आणवेदि भट्टदारिआ.

[3] इदो इदो देवीओ.

अप्सरसः—(दमयन्तीं दृष्ट्वा सादरं साञ्जलिबन्धं च) देवि! प्रणमामः.

रा—भविष्यदिन्द्राणीत्वगौरवादस्यां देवीशब्दप्रयोगस्स्यात्.

द—अपि स्वागतं देवीनां? इमान्यासनान्यलङ्क्रियन्ताम्.

(सर्वाः उपविशन्ति)

रा—(निर्वर्ण्य सबहुमानं) अहो! अस्याः अभिमुखस्थिताः एताः अप्सरसोपि उद्दामप्रभातरङ्गितस्य सुधांशोः पुरतः खद्योताइव दृश्यन्ते.

द—(सविनयं साञ्जलिबन्धश्च) अत्रभवतीनां कथं मयि देवीशब्दप्रयोगः प्रणामश्च? किं करिणीभिः पिपीलिका प्रणम्य स्तूयेत?

रम्भा—महाभागे! मैवं महेन्द्रप्रसादात्सर्वमर्हति भवती.

द—कथमेतत्?

रं—स किल सकलबृन्दारकबृन्दवन्द्यमानचरणारविन्दः श्रीमान् महेन्द्रः त्वामुरसि गाढं परिष्वज्य अनामयप्रश्नपूर्वकमेवमनुशास्ति.

द—अनुगृहीतास्मि महेन्द्रेण.

रा—अहो! महेन्द्रनामश्रवणादेव नवीनमभूदस्याः मनः. प्रोच्यते च प्राचीनैः—

"स्त्रीणां प्रेम यदुत्तरोत्तरगुणग्रामस्पृहाचञ्चलम्" इति

रं—(सपरितोषम्) भद्रे! बाल्येपि गुणज्ञासि. आत्महितज्ञासि च.

द—काऽत्र श्लाघा. युक्तमेवाभिहितं मया, यदस्मत्तातपादैरिव परिष्वज्यानुशासनीयास्मि महेन्द्रेण.

रा—अहह ! इयं तावत् महेन्द्रं तातसदृशं कलयति. अहन्तु मध्ये वृथैवान्यथा शङ्कितवानस्मि.

रं—(स्वगतं) किमेवमननुरूपं वदत्येषा. बाल्यमेव तत्र कारणं स्यात्. भवत्वेवं प्रोत्साहयामि. (प्रकाशं) सुमुखि ! शृणु, अनेकजन्मोपार्जितसुकृतसञ्चयप्रक्षीणकल्मषाणां महाभाग्यशालिनीनामपि एष महेन्द्रादेशो दुर्लभः.

द—(सादरं) तर्हि तादृशं किमनुशास्ति मां स महानुभावो महेन्द्रः.

रं—श्रूयताम्—

स्वर्दीर्घिकापरिसरे सुरवृक्षवाटी
रम्येऽत्र नन्दनवने विहरन्त्यभीक्ष्णम् ।
देवीजनैः पदनतैर्विनुता त्रिलोकी-
साम्राज्यसौख्यमनुभुङ्क्ष्व मया सहेति ॥ ३० ॥

रा—श्रोतव्यमिदानीं किमुत्तरं दास्यतीति.

द—(समुखभङ्गमपवार्य) सखि शारदे ! कोयमनौचित्यप्रसङ्गः.

शा—(अपवार्य) सखि ! किञ्चित्सहस्व. पुरस्तादवगच्छाव.

द—(रम्भाभिमुखीभूय सशिरःकम्पम्) उपरि कथय.

रं—(स्वगतं) अर्धाङ्गीकारेव प्रतिभातीयम्. भवत्वनेनैव मार्गेण प्रोत्साह्य द्रढयाम्येनाम्. (प्रकाशं) महाभाग्यशालिनि ! शृणु,

याता भवेदम्बुधिकन्यका ते
याता हरिर्देवरतां स देवः ।

माता भविष्यस्यचिरात्त्रिलोक्याः
मातावदन्यत्र मतिं विधेहि ॥ ३१ ॥

द—(साभ्यसूयं) किं मां भोगिनीं कर्तुमिच्छति वासवः ?

रा—नेच्छतीयं महेन्द्रम्.

रं—बाले ! न तथा मन्तव्यम्. प्राकृतं बुद्धिविभ्रमं विहाय पर्यालोचय. महर्षयोपि चिरात्कष्टतरैस्तपोभिः तमेव यजन्तस्तदनुग्रहमभिलषन्ति.

द—काऽत्र ! पूज्यता महेन्द्रस्य ? तत्तत्कर्मणि फलप्रदायिनि सति.

रं—न तथा. तत्रापि स एव नियामक इति त्रिभुवनपावनचरित्रस्य तस्य पूज्यतायां कस्सन्देहः.

द—न कश्चिदपि. अहो ! सत्यं त्रिभुवनपावनमेव तदीयं चरित्रम्. श्रूयतामिदम्—

विश्वास्य प्राग्ब्रह्महत्यां विधत्ताम्
भृत्वा शस्त्रं भ्रूणहत्यां तनोतु ।
शास्त्रं हित्वा स्त्रीवधं वा विदध्या-
त्पूज्यो लोके पुण्यशाली जनो यः ॥ ३२ ॥

रं—बाले ! मा प्रकोपय महेन्द्रम्. न जानासि तदीयं प्रभावम्. श्रूयताम्, एष कुलवधूभिः परिपूज्यमानस्सौमङ्गल्यं प्रदाय परापायेभ्यः परित्रायते सदा तास्सर्वाः.

रा—सत्यमिदं विवाहकर्मसु विहित एव शचीपुरन्दरपूजाविधिः.

द—(समन्दहासं) देवि रम्भे ! तिष्ठतु पररक्षणम्.

स्वदाराणां तादृश्यवमतिरभूज्जातु नहुषा-
दगस्त्यो न स्याच्चेदहह भविता का परिणतिः ।
परित्राता स्त्रीणां परपरिभवेभ्यः प्रतिदिनं
सहस्राक्षो वज्री त्रिभुवनपतिः क्वाऽऽस्त स तदा ॥ ३३ ॥

रा—अहो! प्रगल्भेयं वधूः सुललितेनैव मार्गेण मुखभङ्गं करोति.

रं—कदाचिदसन्निधानेन तस्य भगवतस्तथा संवृत्तम्. तावता श्रुतिशतस्तूयमानस्ववैभवस्य तस्य का वा न्यूनता.

द—नकापि. सत्यं श्रुतयोपि स्तुवन्त्येव तद्वैभवम् पश्य—

मुनेर्दारानिन्द्रः कपटवपुषा मोहयतु तान्
ततोऽत्यर्थं दैन्यादनुभवतु तांस्तान् परिभवान् ।
तथापि प्रोज्झित्य ह्रियमतिजुगुप्साञ्च भगव-
त्यहल्यायै जारेत्यहह परिणौति श्रुतिरियम् ॥ ३४ ॥

रा—इदं तावज्जातानां जनिष्यमाणानाञ्च जनानां प्रकटनार्थमुद्घोषणमेव.

रं—(सावज्ञं मुखं परावर्त्य) सखि उर्वशि! नेच्छतीयं महेन्द्रम्. किमुक्तिप्रत्युक्तिभिः?

उर्वशी—भद्रे! यदि नेच्छसि महेन्द्रम्, तर्हि महानुभावं देवताग्रेसरं वीतिहोत्रं वृणीष्व.

द—किं सोपि मां अभिलषति?

उ—अथकिम्.

द—अये वैश्वानर! साधु समालोचितं त्वया.

द्विमुखं त्रिपदं चतुश्शिखं
रसनासप्तकसप्तहस्तभाक् ।
वररूपमिदं विलोक्य ते
जरती चाप्यनुरज्यते त्वयि ॥ ३५ ॥

किञ्च–

स्वयमन्नहरोसि सर्वदा
द्युसदां तत्परिणीय मामपि ।
घृतकुम्भनवोदकुम्भयो-
र्वहने किं विनियोजयिष्यसि ॥३६ ॥

उर्वशी—(मुखं परावर्त्य) सखि मेनके! ज्ञातोऽस्याः हार्दोऽभिप्रायः. तत्त्वमपि किञ्चिदाभाषयैनाम्.

रा—अहह! महेन्द्रेपि निरस्ते किमयमाग्निः अस्याः मनः समाकर्षेत्.

मेनका—सखि भैमि! किञ्चिदाख्येयासि मया.

द—(सविनयं) विधेयास्मि दिव्यतेजोनियोगस्य.

मे—अस्ति खलु भगवतश्छन्दोमयस्य विवस्वतो वंशमुक्तामणिर्धर्मराज इति.

द—अत्र भूमण्डले क्वापि सूर्यवंशजस्तन्नामको राजन्यः न श्रूयते खलु.

मे—न तथा. स दिव्यस्य द्युमणेरौरसः पुत्रः.

द—किं यमः ?

मे—अथ किम्.

द—अहह! विरम विरम. भीतास्मि तन्नामश्रवणादेव. एष मृत्युरेव सकललोकशोकदायीति निखिलैर्निन्द्यमानो निष्करुणश्च. पश्य,

क्रन्दत्सु बालतनयेषु निराश्रयेषु
गर्भालसां प्रियतमां रुदतीमपश्यन्।
वृद्धौ च काणबधिरौ पितरौ निरस्यन्
मुख्याश्रयं हरति हन्त कृतान्तकोयम्॥ ३७॥

अपि च—

विद्याः काश्चिदुपार्जिताः श्रमभरास्सोढाः समूढा प्रिया
क्षेत्रारामगृहादिकं विधिवशादेकैकमासादितम्।
सर्वश्चाद्य ममानुकूलमिति तद्भोक्तुं प्रवृत्ते जने
श्येनापातमसौ पतन् वितनुते सद्यस्तदुन्मूलनम्॥ ३८॥

अये वैवस्वतकुलतिलक! लोकविलक्षणा ते वैभवशैली—

वासो वैतरणीतटे तव पुनर्वाहः खरः कासरो
भ्राता ते शनिरन्यमारणविधिर्नित्यश्च कृत्यं तव।
प्रेतेष्वेव तवाधिकारविभवो दूताश्च ते व्याधयो
देवस्यानुचितं तवेदमथवा युक्तं शिवद्वेषिणः॥ ३९॥

अस्त्येवैतादृशोपि कश्चिन्महानुभावः. देवि! ततस्ततः.

रा—(समन्दहासं) मेनके! किं ब्रूयाः. निरुत्तरासि संवृत्ता.

मे—सखि तिलोत्तमे! प्रमुखनिष्ठुरवचनेयं वज्रहृदया मे वचनावकाशं न दित्सति, तत्त्वमेव किञ्चिदभिधत्स्व.

तिलोत्तमा—भद्रे ! यदि गुणज्ञासि, भगवन्तं प्रचेतसं वृणीष्व.

द–(स्वगतं) तत्कुट्टिनीयं स्यात्. भवत्वेवं तावत्. (प्रकाशं) स एष भगवान् वरुणः साक्षात्पितामहसदृशइति श्रुतवत्यस्मि. सोऽपि मानुषीमभिलषतीति विडम्बनमेवैतत. अयि भगवन्नपांपते !

चिराय वेदोक्तविधीन् चरित्वा
वेदान्तशास्त्रे च विचार्य तत्त्वम् ।
आचार्यभूतस्य विधिर्ललाटे
स्त्रीचापलं ते किमिदं लिलेख ॥ ४० ॥

राजा—अहो ! सम्यगाहेयं सुदृक्मणिः कियदौचित्यं जानाति?

द–अहो ! कैषा प्रवृत्तिरेषां देवानां किमस्मत्परीक्षार्था, उत स्वारसिकी, अथवा कृतमेतैर्देवैः यावदधिकारमवस्थितिशालिभिराधिकारिकैः.

विमला—(श्रुत्वा सरभसमुत्थाय साञ्जलिबन्धं) प्रसीदत, देव्यो मा निर्बध्नीत. ज्ञातमिदानीं भर्तृदारिकाहृदयम्. इयं तावच्चतुर्दशभुवनैकनायकं महेश्वरं विहाय नान्यं वरयते.

द—(साक्षेपं) अय्यनभिज्ञे ! किमेवं कदापि मन्त्रितासि मया?

विमला—[2] नहिनहि.

द—तर्हि किमेवमसम्बद्धं प्रलपसि.

---

[1] पसीदह देइओ मा णिब्बन्धह. जाणिदं दाणिं भट्टदारिआहिअअं. इयं दाव चउद्दहभुवणेक्कणाअअं महेसरं विहाय ण अण्णं वरइ.

[2] णहिणहि.

किं जिग्राहयिषे: कपालमजिनं भस्मानुलेपं मया
भूतप्रेतगणैर्विवासयिषसे किंवा श्मशानेषु माम् ।
प्रोत्सार्य प्रभुतां बिभिक्षयिषसे भिक्षाकपालेन किं
त्र्यक्षं प्रापयितुं वराकि ! वद मे कांकां दशां कांक्षसि ॥४१

विमला—(सभयं साञ्जलिबन्धं च) [1] भर्तृदारिके ! क्षम्यतामयमपराधः. मया पुनः महाविष्णुं विहायेति वक्तव्ये महेश्वरमित्यज्ञानादुच्चरितम्.

द—तर्हि किं स महाविष्णुः वरणीय इति मन्यसे? पश्य,

जडाजडात्मा तनुरस्य तस्याः
कार्श्यं कदाचित्प्रथिमा कदाचित् ।
न कामना नास्य गुणोपि कश्चि-
त्पुरातनोऽयं पुरुषो न गम्यः ॥ ४२ ॥

तिलोत्तमा—भद्रे ! किमेवं सर्वानपि देवान्निराकरोषि ?

द—देवास्तावद्वन्दनीया एव न वरणीयाः.

तिलो—तर्हि कुत्र ते भावबन्धः.

द—(लज्जावनतमुखी तिष्ठति)

शारदा—देवि तिलोत्तमे ! शृणु, कस्मिंश्चित् क्षत्रियकुमारे बद्धभावेयं नः प्रियसखी.

---

[1] भट्टदारिए खमिज्जदु अयं अवराहो मए उण महाविण्हुं विहइअत्ति वत्तव्वे महेसरंदि अण्णाणादो उच्चरिदं.

ति––किन्नामधेयं तस्य महाभागस्य?

रा––इदानीं संशयनिवृत्तिर्भविष्यति.

शारदा––निष्करुणस्य तस्य नाम न जिघृक्षति मे मनः.

विमला––(ससम्भ्रममुत्थाय) [1] देव्यश्शृणुत नलइति.

अप्सरसः––(साकूतमन्योन्यमालोकयन्ति)

रा––श्रुतं श्रोतव्यम्.

द––(साक्षेपं) मूढे! किमेवमसम्बद्धं प्रलपसि.

रा––हन्त? पुनरपि संशये पातितोस्मि.

निर्दिश्य मयि निरस्ते हृष्टस्य हृदो महानयं खेदः।
विद्युत्प्रकाशभाजः पुनरपि गाढान्धकार इव दृष्टेः॥४३॥

तिलो––सुमुखि दमयन्ति! किमेवमधिक्षिपसि चेटीम्? अस्याः वचने को दोषः?

द––आलोच्यतामिदं देव्या नलइति निरुपपदमुच्चरन्त्याः अस्याः महाराजनलसार्वभौमइत्युच्चारणे किं शतधा विशीर्येत जिह्वा.

रा––(सामोदं) अस्याः कल्याण्याः मयि एतावति प्रेमानुबन्धे सत्यपि अन्यथा सम्भाव्य वृथैव शङ्कितोऽभवम्.

अप्सरसः––(सश्लाघं) महेन्द्रादिषु प्रार्थयमानेष्वपि मनसा वृता दन्यत्र मनो न चलितमित्यहो अस्याः अनुपहतं पातिव्रत्यम्.

रंभा––भद्रे दमयन्ति! शशिवंशमुक्तामणेः श्रीमतो वैरसेनेर्वरणं कस्य वा नानुमतं भवेत्? श्रूयतामिदम्–

---

[1] देईओ सुणुह नळो एत्ति.

देवानामयमन्नदः क्रतुभुजां कन्दर्पकोटिद्युतिः
सत्यस्यायतनं पराक्रमखनिः कारुण्यवारांनिधिः ।
एतं प्राप्य महोदयेन मिलता सङ्गच्छमाना स्वयं
पातिव्रत्यपरायणा भव चिरं धर्मान् प्रजाश्चाप्नुहि ॥ ४४ ॥

इतराः अप्सरसः—प्रियंनः प्रियंनः. भैमि ! सत्यमेवं भव.

द—(अवनतमुखी तिष्ठति).

रा—एतद्देवीवचनमाकर्ण्य, लज्जाप्रमोदपरवशं मे मनः.

अप्सरसः—भद्रे वैदर्भि ! महदुपकृतं देवैरिन्द्रादिभिरस्माकं पुंदूत्यं निषिध्य अस्मान् भवत्सन्निधिमनुप्रेषितवद्भिः, यन्महापतिव्रतादर्शनेन कृतार्थीकृतास्स्मः.

रा—अहो महत्सौशील्यमस्याः दिष्टचा मद्दूत्यपरिहारेण अनुगृहीतोऽस्मि देवैः. इदानीमस्यां साभिलाषं प्रवर्तते मे मनः.

(सोत्साहं हृदयमुद्दिश्य)

धन्योसि हृदयहरिण ! क्रतुभुग्भिर्बन्धवागुरा गलिता ।
स्वैरमिदानीं सञ्चर संशयपङ्काद्विनिर्गतश्चासीः ॥ ४५ ॥

द—भवतीनां सौजन्येन प्रसादातिशयेन च बहुधा सम्मानितास्मि.

अप्सरसः—सर्वमर्हति भवती. साधयामो वयम्.

द—(सादरं सर्वाः प्रणमति)

अप्सरसः—स्वस्ति भवत्यै. (इति निष्क्रान्ताः)

द—(उपविश्य सवैक्लब्यम् सविमर्शञ्च) सखि शारदे! किन्ते देवाः देवीभ्यो मत्कृतस्वनिरासवृत्तान्तं श्रुत्वा प्रकुप्येयुः?

शा—सखि! मनोरथभङ्गे सति को वा न कुप्येत्.

द—न तथा. ते देवाः तस्मिन् महाभागे स्नेहवन्तः किल?

शा—अयि मुग्धे शृणु, स्त्रैणस्य धनस्य धरणेर्वा विषये किञ्चिन्मनोवैकल्ये सति स्नेहदयादाक्षिण्यादयोपि विकला एव भवन्ति.

द—सत्यंसत्यं. तर्हि किं करणीयमिदानीम्?

शा—(विचिन्त्य) सखि! मा बिभीहि. तं नलसार्वभौममुपेतया त्वया स्वाहाकारवषट्कारैः परितोष्यमाणास्ते प्रसीदेयुरेव.

द—(किञ्चिद्ध्यात्वा) सखि शारदे! तेषां देवानां प्रसादकारणमन्यदप्यस्ति.

शा—कथयकथय.

द—स महाभागः तेषां देवानां समरकालसहायभूतस्तदंशसम्भवश्चेति तद्वरणान्नकुप्येयुः, प्रत्युत प्रहृष्येयुरेव.

शा—आं इदमपि युज्यते.

रा—(श्रुत्वा सपुलकम्) अयि विदर्भनन्दिनि!

मयि विनिहितभावैर्मञ्जुलैर्वाग्विलासैः
मधुरमधुरमेवं मन्त्रयन्त्यां भवत्याम् ।
मम सपदि समुद्यद्धर्षनाडीविकासा-
दमृतसरसि गाढं मज्जतीवान्तरात्मा ॥ ४६ ॥

(प्रविश्य सचित्रफलका केशिनी) सखि दमयन्ति! गृह्यतामिदं मनोविनोदनाय चित्रफलकम्.

द—(आलेख्यं गृहीत्वा दीर्घं निश्वस्य) सखि केशिनि! किं वा फलमिदानीमत्र दृष्टेनाप्यनेन दुर्लभजनेन, तथापि पश्यायं जनः दृष्टोपि पुनःपुनः नवांनवामेव प्रीतिमादधाति.

(इति सानुरागमालेख्यं पश्यन्ती स्थिता).

रा—(आलेख्यं दृष्ट्वा) किमिदमाश्चर्यं! यत्तदा भगवत्या सिद्धिमत्या विस्मृतं, मया च कुतुकान्मत्प्रतिच्छन्दसनाथीकृतं पुनस्तयैव नीतञ्च, तदेतत्प्रियाविभूषितम् चित्रफलकम्. तदत्र सिद्धिमत्यपि सन्निहिता स्यात्.

केशिनी—सखि साधु दृश्यतां हृदयहरः.

द—(सलज्जं मुखं परावर्त्य) सखि! त्वं हंसपञ्जरं गृहीत्वा पूर्वगृहीतेन तेनैव वेषेण समागमिष्यामीति सन्दिश्य चित्रशालां प्रविष्टासि किल. किमेवमालेख्यमात्रपरिकरा समागताऽसि?

रा—कोसौ वेषः? (विचिन्त्य) भवतु स्पष्टमग्रे भविष्यति.

के—सखि! श्रूयताम्, समागतेष्वप्यानुयात्रिकेषु स सार्वभौमः परमद्यापि न समागतइत्यालोच्य तातः कुमारदमदमनादयश्च म्लानमुखास्तिष्ठन्तीति कमलामुखाद्विज्ञाय सम्भ्रमात्समागताऽस्मि.

द—तर्हि का वा गतिरिदानीम्.

के—दैवमेव नः शरणम्.

द—सखि! किमेवं ताटस्थ्यमालम्बसे? पूर्वमेव तं हंसं तथातथा अध्याप्य तत्सन्निधौ विसृज्य तन्मुखेन तं महाभागं तथातथा

प्रोत्साह्य स्वयमपि सिद्धिमतीवेषेण तमुद्बोध्य मदर्थमनुभूतपूर्वान् महा-यासानपि किमेकपदे निरर्थीकरोषि.

रा—निरस्तस्संशयग्रन्थिः. स हंसोऽनयैव तथाऽध्याप्य प्रेषितः. इयं केशिन्येव सा सिद्धिमतीरूपप्रतिच्छन्ना कपटयोगिनी. एवमुपा-यकल्पने कोस्या अभिसन्धिरित्येतत्परं ज्ञातव्यमास्ते.

के—सखि! त्वदनुषङ्गं प्रति याच्यमानस्स सार्वभौमः कदाचिदव-धीरयेदिति भिया मया तथाऽनुष्ठितम्. तथापि दैवात्प्रतिबद्धे कार्ये किं मया करणीयमिदानीम्.

रा—ज्ञातोऽभिसन्धिः. यद्यपि निराकरणभिया एवमनुष्ठितम्. कथमेतदुपपद्यते, अस्याः कटाक्षपात्रैकाभिलाषिणि मयि.
प्रोच्यते च प्राचीनैः.—

"लभेत वा प्रार्थयिता न वा श्रियं
श्रिया दुरापः कथमीप्सितो जनः" इति।

द—यद्रोचते तत्क्रियताम्. किं बहुना श्रूयतामिदम्—

श्रुतश्च दृष्टश्च हरित्सु मोहा-
द्ध्यातश्च नीरन्ध्रितबुद्धिधारम्।
ममाद्य तत्प्राप्तिरसुव्ययो वा
हस्ते तवास्ते द्वयमेव शेषः॥

रा—इयमसुनिरपेक्षं व्याहरन्ती स्वचित्ते
किमपि किमपि कृत्वा दीनभावं भजन्ती।

नवमिव नवनीतं द्रावयत्यन्तरङ्गं

गमयति च दशां मां काञ्चिदानन्दसान्द्राम् ॥ ४७ ॥

के—(विचिन्त्य) सखि! मा खिद्यस्व. यथाशक्ति पुनर्यतिष्ये. परन्तु तातस्तं महाभागमनागतमालोच्य त्वामन्यस्मै दित्सेदिति शङ्कते मे हृदयम्.

रा—प्रकृतोचितमिदमालोचितम्.

द—श्रूयतां तर्हि—

अनैषधायैव जुहोति किं मां
तातः कृशानौ न शरीरशेषाम् ।
ईष्टे तनूजन्मतनो स्तथापि
मत्प्राणनाथस्तु नलस्स एव ॥

रा–हृदयभावसर्वस्वनिवेदनमिदम्. ज्ञातस्सारः. तृप्तं मनः. तत्केनोपायेन प्रकाशीभूय प्रियतमया सह सल्लापसौख्यमनुभवेयम्.(इति चिन्तयति)

के—(मणिदर्पणमालोक्य ससम्भ्रमं समन्तादवलोकयति)

द—सखि! किमेवं भ्रान्तासि?

के—सखि दमयन्ति! दिष्ट्या वर्धसे. पश्य, मणिमुकुरान्तराले कुसुमशरशतातिशायिसौन्दर्यम् प्रतिबिम्बमालोक्यते.

द—(दृष्ट्वा सविस्मयमात्मगतं) अहो! परिपक्वमिव मे भागधेयेन. फलितमिव च मे मनोरथेन. यन्मया हृदि भाव्यमानं नलनामधेयमेवेदं रूपधेयम् (प्रकाशं) सखि! विमृश्यतां किमेतदिति. (ससम्भ्रममुत्थाय समन्तात्पश्यति.)

रा—अयमेवावकाशः स्वात्मानं प्रकाशयितुम्.

अलमलमतिदीर्घापाङ्गभङ्गीप्रचारै-
श्चकितहरिणचक्षुर्विभ्रमाक्षेपदक्षैः ।
अयमहममराणामाज्ञया नास्मि दृश्य-
स्तदपि तवगुणौघाकृष्ट एषोस्मि दृष्टः ॥ ४८ ॥

(इति ससम्भ्रममुपसर्पति. दृष्ट्वा सर्वास्सत्वरमुत्तिष्ठन्ति.)

द—(दृष्ट्वा सखीजनान्तरिता अधोमुखी तिष्ठति.)

के—(दृष्ट्वा सविनयं साञ्जलिबन्धं च) स्वागतं महाभागस्य. इदं पीठमलङ्करोतु महाराजः. अपि कुशलं तत्रभवतः?

रा—(उपविश्य) भगवत्यास्सिद्धिमत्याः प्रसादादद्य विशेषतः.

के—(समन्दहासम्) का सा सिद्धिमती नाम?

रा—(हसन्) या किल पुरा अस्मद्गृहदेवतेव प्रत्यक्षीभूय सिद्धमन्त्रानिव युष्मत्सखीकथामुपदिश्य तत्परेण मया युष्मत्सखीसामीप्यसौख्यमिदानीमनुभावयति, सा.

के—(सस्मितम्) तर्हि सा सायुज्यसौख्यमप्यनुभावयेदेव.

रा—तदनुगृहीतेन किं वा दुष्प्रापं भवेत्.

के—क्व पुनरद्य सा योगिनी?

रा—मदभिमुख एव.

द—(अपवार्य) सखि! तिरोहितेन महाभागेन सर्वोप्यस्मत्सल्लापः त्वत्कपटवेषवृत्तान्तश्च प्रत्यक्षीकृतः. तदद्य प्रसाद्यतां महाभागः.

के—(सस्मितं साञ्जलिबन्धञ्च) महाराज! क्षम्यतां सिद्धिमती-कारिताभिवादनाद्यपराधः.

रा—महोपकारः एषः. कथमपराधस्स्यात् ?

के—प्रियं मे. अथ कथं प्रविष्टं कन्यान्तःपुरं महाभागेन ?

रा—भद्रमुखि! श्रूयताम्, इन्द्राग्नियमवरुणैर्देवैः युष्मत्प्रियसखीसमुत्सुकैः स्वेच्छाधीनामन्तर्धिसिद्धिमनुगृह्य दूत्याय प्रेषितोऽहं अत्रागत्य भवतीनां सौजन्यपात्रीभूतोस्मि. तस्मान्मत्तस्सहस्रगुणाधिकेषु तेषु कञ्चिद्दिव्यं वरं वरयतु वः प्रियसखी.

द—(सरोषं सधार्ष्टयञ्च) सखि केशिनि! कुलवधूविरुद्धे विषये किं प्रस्तावयसि महाभागम् ?

शा—महाराज! श्रुतमेव खलु भवता अन्तर्हितेन रम्भादीनां प्रत्युत्तरम्.

रा—श्रुतं ज्ञातञ्चास्याः मनोभावः. सर्वथा अनुगृहीतमस्मत्कुलं युष्मत्प्रियसख्या.

के—भवता च विदर्भराजकुलम्.

शा—मुक्ताफलस्य गुणयोजनमिव रत्नस्य सुवर्णयोजनमिव च अनुरूपसङ्घटनमिदं सञ्जातम्.

रा—सर्वमुपपन्नमेवेदम्. तथापि देवानां मयि कीदृशी शङ्का जायेतेति विशङ्कते मे हृदयम्.

द—(सभयमपवार्य केशिन्याः कर्णे एवमिव)

के—(सस्मितं सशिरःकम्पञ्च राजाभिमुखीभूय) श्रीमन्! युक्तमे-

वेदं शङ्कितम्. तथापि श्रूयतामिदम्, स्वयंवरस्थाने सकलजनसमक्षं वृतेऽनया भवति, सर्वं सुविहितं भवेदिति तर्कयामि.

रा—(सश्लाघम्) अयमुदारः कल्पः.

सर्वाः—प्रियं नः प्रियं नः!

रा—(केशिनीमुखमवलोक्य) भद्रे ! किमपि वक्तुकामेवासि.

के—सत्यं, सरलोयं महानुभाव इति निश्चित्य यथा नः प्रियसखी बन्धुजनशोचनीया न भवेत्तथा निर्वहणीयं श्रीमतेति विज्ञप्तुकामास्मि.

रा—भद्रे! किं बहुना? श्रूयताम्—

किं राज्येन धनेन किन्तु विभवेनान्येन मान्येन वा
  हित्वाऽस्याः हृदयानुरञ्जनविधिं कस्स्यात्पुमर्थः परः ।
अन्तः प्राणसमीरणो निवसतीत्येषा कथा वर्तता-
  मन्तर्बाह्यचरी च वः प्रियसखी मत्प्राणनाडी ध्रुवम् ॥४९॥

सर्वाः—प्रियं नः प्रियं नः!

(नेपथ्ये) अहो! चिराय नः प्रसन्नो विधिः. समाह्रियन्तां स्वयंवरसम्भाराः.

के—(श्रुत्वा) अहो! अत्रत्यवृत्तान्तं चारमुखादाकर्ण्य स्वयंवराय त्वरमाणः तातस्समादिशति. तदद्य कन्यानयनाधिकारं शारदायाः प्रदास्यन् अन्तःपुरमायास्यति.

रा—तर्हि वयमपि निर्गमनाय युष्मत्सखीमाज्ञां प्रार्थयामहे.

द—(सव्रीडमधोमुखी तिष्ठति.)

रा—प्रिये! किमेवं जोषमास्यते?

द—केशिनीमवलोकते.

के—महाभाग! श्रूयताम्,

यद्याख्यास्यति गम्यतामिति वच स्तत्स्यादनास्थापरम्
मा गच्छेति न साधु यत्परवती यच्चेदमन्तःपुरम्।
स्वेच्छासम्मतमाचरेति भणितिस्ताटस्थ्यहेतुर्भवे-
त्तद्वक्तव्यमपास्य नः प्रियसखी मौनच्छलात्ताम्यति॥५०॥

रा—(सस्मितं सानुकम्पञ्च) सुकुमाराङ्गीयं मा ताम्यतु मा ताम्यतु. वयमपि स्वयंवरमण्डपमधिगन्तुं स्वशिबिरमासाद्य सर्वं सज्जयितुं सन्नाहयामः सेनापतीन्. (इत्युत्तिष्ठति.)

(सर्वास्ससम्भ्रममुत्तिष्ठन्ति.)

रा— (निर्गमनमाभिनयन्)

अस्यां मनस्सूत्रमिदं मदीयम्
प्रसङ्गमावेष्ट्य दृढं विलग्नम्।
अन्तःपुराद्गच्छति मय्यसाव-
प्याकृष्यते मे हृदयेन नूनम्॥ ५१॥

(इति परिक्रम्य निष्क्रान्तास्सर्वे.)

इति भैमीपरिणये द्वितीयोऽङ्कः.

ओं तत्सत्.

अथ तृतीयोऽङ्कः.

(ततः प्रविशति सलेखपाणिः सेनापतिः)

सेनापतिः—(लेखानुवाचनमभिनयन् सशिरःकम्पम्) अहो! महती कार्यव्यग्रता अस्मत्स्वामिनो महाराजपुष्करस्य, यदुपर्युपरि प्रेष्यन्ते शासनाक्षराणि पत्रिकामुखेनाऽस्माकम्. भवतु कष्टतरेणापि तदाज्ञानुवर्तनेन सफलीकर्तुमात्मानं अवसरः प्राप्तः. (इति ससम्भ्रमं परिक्रामति.) (प्रविश्य ससम्भ्रममन्यस्सेनापतिः) सखे चण्डसेन! त्वर्यतां त्वर्यताम्. महाराजपुष्करः साहसे कर्मणि आज्ञापयत्यस्मान्.

चण्डसेनः—सखे पृथुसेन! सावधानं ब्रूहि किमाज्ञापितवान् महाराजः.

पृथुसेनः—श्रूयतां ह्यस्सायन्तने समये स सादरं समाहूय मां 'भद्र पृथुसेन! भवता सद्यस्सफलयितव्यः अयमस्मदादेशः. शृणु, श्वस्तावत् अस्मात्स्वयंवरस्थानादारभ्य अस्मत्पुरपर्यन्तम्,

कल्प्यास्सद्यः पथि वसतयो योजने योजनेऽपि
स्थानेस्थाने दशशतमितास्सैनिकाः स्थापनीयाः ।
जागर्तव्यं पथि मम रथस्यागमश्चेत्तदा तैः
नोचेत्सर्वैस्त्वरितगतिभिस्सन्निधातव्यमत्र ' ॥ १ ॥ इति.

चं—(सशिरःकम्पम्) युज्यते समाज्ञापनम्.

पृ—कथमिव?

चं—श्रूयतां दैवादद्यापि नलमनागतमाकर्ण्य प्रहृष्टमनाः अस्मत्स्वामी नलकल्पमप्यात्मानं यदि भैमी न वृणुयात्तदा सर्वानपि महीपतीनवधूय स्वयमासुरेण विधिना तामपहृत्य परिणेतुं एवमाज्ञप्तवान्.

पृ—युज्यते. तर्हि "नोचेत्सर्वैस्त्वरितगतिभिस्सन्निधातव्यमत्र" इति पक्षान्तरसमाज्ञापनस्य किंवा फलं पश्यति महाराजः?

चं—आत्मनि दमयन्त्या वृते सति विवाहकाले कुण्डिनपुरे स्ववैभवप्रदर्शनमेव.

पृ-इदमपि युज्यते. तर्हि सर्वथा दमयन्तीपतिः पुष्करराजएवेति सिद्धम्.

चं—तथैव. अथ तथा महाराजाज्ञप्तेन भवता किंकिमाचरितम्?

पृ—मया तु चण्डभानुवीरभानुप्रभृतीन् गुल्माधिपान् विदितार्थान् कृत्वा सर्वं तथैव निर्वर्तितम्.

चं—तर्हि किमत्रागमनप्रयोजनम्?

पृ—भवन्तं सह सैन्यैः प्रथमे स्थाने नियोक्तुमागतोस्मि.

चं—नैतत्सङ्घटते.

पृ—(किञ्चित्सकोपं) ननु राजाज्ञया ब्रवीमि, किं शत्रुघातपात्रतामनुबुभूषसि?

चं—नैतदपि सङ्घटते.

पृ—कुतः?

चं—शृणु, महाराजेनैवाहं विधेयान्तरे समाज्ञप्तपूर्वोस्मि, यथा श्रूयतां—पूर्वेद्युर्निशीथ एव देवस्सानुग्रहमाहूय मां 'भद्र चण्डसेन! ससैन्येन सशस्त्रेण सरथेन च भवता प्रातस्स्वयंवरगृहद्वारि सन्निहितेन भवितव्यम्' इति. तदिदं पत्रारूढं पश्यतु भवान्. (इति लेखमर्पयति).

पृ—(गृहीत्वाऽनुवाच्य सशिरःकम्पम्) साधु समाज्ञप्तं महाराजेन. तर्ह्यहमेव प्रथमे स्थाने स्थित्वा भवत्साहाय्येन रथमारोप्याऽऽनीयमानां अस्मत्स्वामिनीम् क्षणमात्रेण नेष्यामि पौष्करीं राजधानीम्.

चं—तर्हि माहाराजस्य प्रसादस्य पात्रीभूय लप्स्यसे राजसत्कारान्.

पृ—(सस्मितं) आं यदि कार्यसिद्धिस्स्यात्तदा सर्वे वयं सत्करिष्यामह एव.

चं—कथं नभवेत्कार्यसिद्धिर्महाराजे स्वयमुद्युक्ते.

पृ—अस्तु तथैव. तथापि पश्यत्सु तां विवरयिषुषु महावीरेषु साहसकृत्यमिदं महाराजस्य गुणाय वा स्याद्दोषाय वा स्यादिति शङ्कते मे हृदयम्.

चं—सखे! किमनेन विचारणेन? श्रूयताम्—

भृत्यैस्तत्तदनुष्ठेयं यद्यदादिशति प्रभुः।
गुणदोषविचारे तु के वयं सत्सु मन्त्रिषु ॥ २ ॥

पृ—अनुस्मृतमिदानीं, स मुख्यामात्योवा किमिति न निवारयति अस्मात्साहसान्महाराजम्.

चं—सोपि सविनयं विज्ञप्तवानेव, यथा 'देव! मिषतां सर्वभूभृतां बलादपहरणसाहसमिदं महतीं शङ्कां जनयति' इति.

पृ—ततस्ततः.

चं—ततो महाराजेन विहस्य स प्रत्युक्तः. श्रूयताम्—

यद्भैमीपरिरम्भतीव्रकुतुकं तद्विप्रयोगेऽपि य-

न्नो शीर्णं न विभक्तमद्रुतमतो वज्रीभवद्वर्तते ।

तस्य स्वस्य भवन्मुखादभिनवं श्रुत्वाद्य भूभृद्वयम्

बाहुभ्यां सह सस्मितं सदधिकं जिह्रेति वक्षो मम ॥ ३ ॥

पृ—साधु प्रत्युक्तस्स मुख्यामात्यः. एवञ्च मन्ये भैम्यामत्युत्कण्ठितो महाराज इति.

चं—असीमा प्रवहति सा चोत्कण्ठा.

पृ—क्व दृष्टा सा महाराजपुष्करेण?

चं—मृगयाप्रसङ्गेन विन्ध्याटव्यां मिलता विदर्भेश्वरेण प्रार्थितः कुण्डिनं पुरमेत्य सभायां मुनिजनाभिवन्दनाय समाहूतां भैमीमद्राक्षीत्.

पृ—ततस्ततः.

चं—ततस्तद्दर्शनात्प्रभृति महाराजः,

निराहारश्शेते क्व चन जनगोष्ठीं न सहते

स्वपन् जागर्ति द्राक् क्वनु चलसि भैमीति विलपन् ।

महामोहावर्तैर्भ्रमित इव भैमीमनुसरन्

स्तुवन्निन्दन्नन्दन्भवति स सदा तन्मयइव ॥ ४ ॥

पृ—एवमत्युत्कण्ठितत्वादेव महाराजः समापतिष्यतः स्वानर्थानप्यगणयन् तामपजिहीर्षतीति मन्ये.

चं—सत्यम्. तथापि यदि नलः परं नैवायायात्तदा सर्वमप्यनुकूलमेव भवेन्महाराजस्य.

पृ—तत्रापि दैवं वैमुख्यमेव दर्शयतीति मन्ये.

चं—(ससम्भ्रमम्) कथंकथम्?

पृ—"नलोपि निशीथात्परं स्वशिबिरमयासीत्" इति, "विदर्भराजोपि तं प्रत्युद्गम्य स्वयंवरमण्डपमानेतुं तदुपकार्यां गतः" इति च अस्मत्प्रणिधिना चैापटेकनाभिहितमिदानीम्. तदिदं स्वामिने निवेदयितुमप्राप्तसमयः.

चं—अतःपरं दैवमेव नश्शरणम्.

(नेपथ्ये)—अहो! अस्मद्भाग्यात्सन्निहितोद्य महोत्सवकालः.

चं—(आकर्ण्य नेपथ्याभिमुखमवलोक्य समन्तात्पश्यन्) अहो! अतीतप्रायः उषःकालः. एष वन्दी स्वयंवरस्थानं प्रविशति. सर्वे च राजानः सम्मिलिताः. तदद्यास्मत्स्वामी महाराजपुष्करोपि सामात्यस्सभां प्राविक्षदेवेति मन्ये. तदावामपि स्वस्वनियोगानुपालनाय सज्जीभवाव. (इति निष्क्रान्तौ.) शुद्धविष्कम्भः.

(ततः प्रविशति वन्दी.)

वन्दी—(सानन्दम्) अहो! अस्मद्भाग्यात्सन्निहितोद्य महोत्सवकालः. (समन्तादवलोक्य) अहो! प्रभूणां परिजनानां पुरजनानाञ्च महानयं सम्मर्दः. योयमस्मत्स्वामिनो विदर्भेश्वरस्य महद्वैभवमभिव्यञ्जयन् क्षणे क्षणे प्रवर्धते. (नेपथ्याभिमुखमवलोक्य) इतः स्वयंवरगृहे तावत्—

अस्मत्स्वामिसुता वरं वरयते प्रेयांसमस्मिन् दिने

भूयानद्य महोत्सवोपि भवति स्वामिप्रसादोपि नः ।
इत्युत्कण्ठितमानसाः परिजनाः श्रद्धान्वितास्सम्भ्रमा-
त्तत्तत्कार्यपरायणाः धुरि समासीदन्ति धावन्ति च ॥५॥

(पुरतोवलोक्य) इतः पौराणां जानपदानां च जनानां स्पृहणीयः एष सम्भ्रमातिशयः.

एते प्राप्तमहोत्सवोत्सुकतया सङ्घीभवन्त्यग्रतो
भूयो वेत्रलताप्रहारचकिताः दूरीभवन्त्यन्यतः ।
पङ्क्तीकृत्य निवेशिता अपि पुनः पन्थानमावृण्वते
प्राकारेष्वपि गोपुरेष्वपि भवन्त्युद्ग्रीविकाऽध्यायिनः ॥६॥

(अन्यतोवलोक्य सश्लाघम्) अहो! पुरालङ्कारवैभवम्.

सिच्यन्ते सलिलैर्गृहाङ्गणभुवः संयोज्यते चासनं
कीर्यन्ते कुसुमानि केतनगणः सद्यस्समुत्तम्भ्यते ।
द्वारिद्वारि निवेश्यते च कदलीस्तम्भावलिस्सम्भ्रमा-
द्धूप्यन्ते च ततस्ततः पुरपथाः धूमोद्गमैर्धूपजैः ॥ ७ ॥

(सर्वतोवलोक्य) अहो! ततस्ततश्चलिता एव राजानस्स्वस्वशिबिरात्. इदानीं हि—

वलत्करिघटारवैर्विचलिताश्वहेषारवैः
स्फुरद्रथघनारवैस्सह भटार्भटैरुद्भटैः ।
चकच्चकितकुण्डले चलति मण्डले भूभुजा-
मपूर्वनयनोत्सवः पुरि महान् समुज्जृम्भते ॥ ८ ॥

(पुनर्नेपथ्याभिमुखमालोक्य) अये! सम्मिलिता एव राजानः स्वयं-वरमण्डपे. नयनानन्दकारिणी परिषदेषा—

वेवीज्यन्ते धरणिपतयश्चामराणां सहस्रैः
तोष्टूय्यन्ते स्तुतिभटशतैः स्वापदानानि राज्ञाम्।
देदीप्यन्ते मणिमयभुवो भूषणानां प्रभाभिः
दंध्वन्यन्ते पणवपटहाः पाणिकोणाभिघातैः ॥ ९ ॥

इह हि—

प्रकीर्णपुष्पोत्करगन्धलुभ्य-
द्भृङ्गावलिर्भूपसभावमर्दात्।
वितानमालां स्वयमुत्पतिष्णु-
र्बिभर्ति कृष्णागुरुधूपलक्ष्मीम् ॥ १० ॥

समीरवेगेन समीर्यमाणा
नानस्यते रङ्गपताकिकालिः।
भैमीदिदृक्षाकुलमानसानाम्
महीपतीनामिव चित्तवृत्तिः ॥ ११ ॥

(अन्तरतोऽवलोक्य) अहो! स्वयंवरगृहे तावत् प्रविष्टानां प्रविशतां प्रवेक्ष्यताञ्च महीभृतां महान् सम्मर्दः परिवर्तते. इतस्तावत्—

रङ्गस्थानममी विशन्त्यधिकृतैस्सम्मान्यमानाः मुहु-
र्दिव्यालङ्करणोज्ज्वलाः स्तुतिभटैस्संस्तूयमानाः नृपाः।
भव्यालंकृतिभासुरा च वरणस्रग्धारिणी सादरं
कन्या शारदया सुवर्णशिबिकारूढा समानीयते ॥ १२ ॥

(निपुणं निरूप्य) एषा तावत् समुद्धृतखड्गाभ्यां कुमारदमदमनाभ्यां अग्रजाभ्यां पार्श्वयोरनुगम्यमाना सहसखीजना भर्तृदारिका इतएवाभिवर्तते. तदेनामुपसर्पामि. (इति परिक्रामति.)

(ततः प्रविशति यथानिर्दिष्टपरिवारा दमयन्ती राजानश्च.)

दमः—वत्से! धीरं विलोकय, मा लज्जस्व. स्वयंवरः खल्वेषः.

दमनः—वत्से! मा बिभीहि, बन्धुसमाजः खल्वेषः.

दमयन्ती—(लज्जावनतमुखी शारदामवलोकयति.)

शा—सखि दमयन्ति! सम्भावय युवराजस्य आर्यदमनस्य च वचनम् .

दमयन्ती—(शिरश्चलनेनानुमोदते.)

युवराजः—(शिबिकायाः अग्रतो भूत्वा सप्रश्रयमञ्जलिं बध्वा) सर्वे बन्धवस्सानुग्रहाःशृण्वन्तु, श्रावयाम्यद्य तातस्य विज्ञापनाक्षराणि.

सर्वे—(सावधानाश्शृण्वन्ति.)

युवराजो दमः—(उच्चैः)

" अस्मद्भाग्यवशादिदं गृहममी यूयं समभ्यागताः
सर्वे मानधनाः पराक्रमधनास्सर्वेऽपि सर्वोन्नताः ।
एकोस्मत्सुतया मनोरथरथं सद्यस्समारोप्यते
क्षन्तव्येयमनुग्रहात्तदितरैरेवं हि राज्ञां क्रमः " ॥ १३ ॥

(सर्वेपि समं करास्फालनेनानुमोदन्ते.)

शारदा—सखि वैदर्भि! वन्दस्व महतीं सभाम्, यत्र देवर्षयो

ब्रह्मर्षयो राजर्षयो द्वीपाधिपाः देशाधिपाश्च दिवि सुरासुराप्सरोगन्धर्वकिन्नरैरवलोक्यमानास्तिष्ठन्ति.

दमयन्ती—(वरणमालां शारदाकरे वितीर्य शिबिकायाः अवतीर्य सभक्तिप्रकर्षं सभामभिवन्दते.)

वन्दी—(सरभसमुपसृत्य उच्चैः) एषा अस्मद्भर्तृदारिका सर्वान् वः प्रणमति.

(सर्वे समुत्सुकाः पश्यन्ति.)

दमयन्ती—(सखीकरान्मालां गृहीत्वा मन्दंमन्दं परिक्रामति.)

पुष्करः—(दृष्ट्वा सश्लाघं सस्पृहं ससम्भ्रमश्च) अये! आयाता भैमी. समारब्धश्च स्वयंवरोद्यमः. (निपुणं विभाव्य सोल्लासम्.) आः नेयं भैमी. किन्तु—

साकारो नयनोत्सवस्तनुभृतामाद्यो वपुष्मान् रसः
सञ्चारी स्मरविभ्रमाब्धिरथवा लीलावतारो रतेः ।
चेतोलुण्ठनफक्किका युवततेः विश्वं वशे कुर्वतः
पुष्पेषोर्नवमोहनास्त्रमथवा सृष्टिर्विधातुर्नवा ॥ १४ ॥

अस्याः खलु—

हासो नासापुटतटलसन्मौक्तिकाभां विधत्ते
कर्णाभ्यर्णे कुवलयरुचिं चक्षुषी सन्दधाते ।
लाक्षापेक्षां त्यजति चरणश्चारुशोणाम्बुजश्रीः
भूषाऽशेषाऽप्यवयवरुचा नीयते निष्फलत्वम् ॥ १५ ॥

(सोन्मादमुत्थाय किञ्चिदुपसृत्य साविनयम्) अयि सुन्दरि!

सकृदपि मयि दृष्टिं सङ्किर त्वत्प्रसादात्
ललितकुसुमदालाऽलङ्कृतोहं भवेयम्।
वितर वचनमेकं व्रीडया यान्त्वरण्यम्
पिकनिनदविपञ्चीपञ्चमोदञ्चनानि ॥ १६ ॥

दमयन्ती—(मुखं परावर्तयति)

दमनः—(ससम्भ्रममुपसृत्य) न केनाप्युत्थातव्यमत्र.

पुष्करः—तर्हि त्वयापि स्थीयताम्.

दमनः—वयं दातारः.

पु—वयं हर्तारः.

दमनः—(सकोपं सरभसञ्च तत्पाणिं गृह्णन्) किं यूयं हर्तारः?

(इति खड्गमुद्धरति.)

सर्वे—(ससम्भ्रमोद्वेगमालोकयन्ति.)

दमः—(ससम्भ्रममुपसृत्य) वत्स! किमिदमस्थाने कुप्यसि? कोऽत्र दोषः? ये च वरयितारस्तएव हर्तारः. तदेते गृहागताः पूज्याः खलु.

दमनः—(रोषमुपसंहरन्) आर्य युवराज! युक्तमाह भवान्. (तत्पाणिं विसृजन् साञ्जलिबन्धं पुष्करं प्रति) पूज्यपादैः क्षन्तव्योस्मि बालकः. अतिथयो यूयं, आतिथेयाश्च वयम्.

पुष्क—तर्हि किं भुक्तिमात्रप्रयोजनोहं संवृत्तः?

(सर्वे हसन्ति.)

दमयन्ती—(समन्दहासं पुरः परिक्रामति.)

पुष्क—अये! अतिक्रामति किल मामियम्. (इत्यनुगच्छति.)

(तदमात्यः **प्रज्ञासेनः**–पश्चादागत्य सप्रश्रयं) प्रभो! किञ्चिद्विज्ञापनीयमस्ति. (कर्णे एवमिव.)

पु—युज्यते. भवतु, प्रतिपालयामः. (इति यथास्थानमुपविशति.)

शारदा—सखि दमयन्ति! एते किल अङ्गवङ्गकलिङ्गकाश्मीरकाम्भोजादिदेशाधिपाः चीणहूणाद्यपरराष्ट्राधिपाश्च त्वदर्थमेव कृतनिरीक्षास्तिष्ठन्ति. तदेतेषु कुत्रचिदभिमते निक्षिप क्षोभितयुवजनाक्षान् कटाक्षान्.

दमयन्ती—(अपवार्य) सखि शारदे! किं परपुरुषनिरीक्षणेन? शीलभङ्गभयादपत्रपया च सङ्कुचति मे हृदयम्.

शा—(अपवार्य) मैवं मंस्थाः. कन्यकासि. स्वयंवरकालश्चायम्.

दमयन्ती—(अपवार्य) तर्हि दर्शय तमेव हृदयहरं महाभागम्.

शा—(अपवार्य) स नाद्यापि सन्निहितः.

दमयन्ती—(अपवार्य) हा! हतास्मि मन्दभाग्या. तर्ह्यन्तःपुरायैव प्रतिनिवर्तावहै.

शा–(अपवार्य) साम्प्रतं न साम्प्रतं तत्. शृणु, तातःखलु तमानेतुं गतः. तदानेष्यत्येव. तावदत्रैव सभायां मनो विनोदयाव.

दमयन्ती—(अपवार्य) यथा रोचते सख्यै.

शा—सखि वैदर्भि! दृश्यतामेष काम्भोजाधिपतिः—

क्षोणीभारं स्वसदृशभुजेनैककेनैव धर्तुं
शेषःश्रुत्वा दशशतयुगेनाक्षिभिः दक्षमेनम् ।
आनम्रस्स्यात् फणधृतमहिः लज्जयेतीव नेता
धाता तावत् दिशिदिशि गजान् स्थापयामास नूनम् ॥१७

काम्भोजः—(दमयन्तीं निर्वर्ण्य सकौतुकम्)

सकृदपि परिदृष्टा स्नेहमुद्दीपयन्ती
दृढमपि मम धैर्यं द्रावयन्ती कटाक्षैः ।
मतिमपि मम शश्वन्मोहयन्ती मदन्तः-
करणहरणमेषा कोमलाङ्गी करोति ॥ १८ ॥

दमयन्ती—(अपवार्य) सखि ! क्षोणीरक्षणविचक्षणे अस्मिन् जनैः स्वपितरीव भक्तिः प्रदर्शनीयैव. तत्पुरो गम्यताम्.

शा—सखि ! एष कुन्तलाधिपतिः नेमीश्वरो नाम—

सदाधिकमुदाऽश्रयद्विबुधकाङ्क्षितार्थप्रदं
प्रकाशितसुनन्दनं द्विजकुलायलब्धश्रियम् ।
अदृष्टमधुपागमात् अकृतपल्लवाह्लादनात्
विलक्षणसुरद्रुरित्यनुमिनोमि नेमीश्वरम् ॥ १९ ॥

नेमीश्वरः—(सकौतुकमालोकयन्,)

शस्त्रीकृत्य युवावलीं वशयितुं सैषा स्मरेणेरिता
माल्यंमाल्यमिति प्रतार्य जनतां मूल्यं दधाना करे ।

एकं दासजनं समागतवती क्रेतुं सभायामियं
कं क्रीणाति निषेवणार्थमथवा क्रीणीत मामेव किम् ॥२०॥

दमयन्ती—(अपवार्य) सख्येष दास्योचितः तत्पुरस्ताद्गम्यताम्.

शा—राजपुत्रि! एष मगधाधिपतिः श्रीसिंहोनाम.

अस्मिन् वर्षति जीवनौघमवनौ श्रीसिंहकृष्णाम्बुदे
शान्तस्सज्जनसंघसंगतमहादारिद्र्यदावानलः।
सन्तुष्टाः द्विजचातकाः ववृधिरे भाग्याङ्कुरास्तत्क्षणं
चित्रं चित्तगृहाङ्गणं समभवत्कस्यापि नो पङ्किलम् ॥२१॥

श्रीसिंहः—(सानुरागम् दमयन्तीमवलोकयन्,)—

विधिस्त्रिलोकीभवसुंदरीद्रा-
गेकैकशोङ्कैः विगणय्य भैम्याः।
आद्यावधित्वावगमाय चक्रे
शीर्षे कुरीरच्छलशून्यबिन्दुम् ॥ २२ ॥

द—(अपवार्य) सखि शारदे! एषोपि धर्मैकपरः छलवादी च. तत्पुरो गम्यताम्.

शा-- सखि! भूतिलोत्तमे! प्रेक्षस्व केरलदेशाधिपतिमेतम्,

यत्कीर्तिश्शरदिन्दुकुन्दधवला स्वाज्ञेव भूव्यापिनी
यन्मूर्तिस्सुदृशां सदापि हृदये कामागमाध्यापिनी।
यद्दोष्णोररिचक्रविक्रमशमोपक्रान्तविक्रान्तयो
गर्जत्पर्वतनिर्जयोद्यतहरे र्दम्भोलिदम्भापहाः ॥ २३ ॥

केरलः—(सविलासमालोकयन्)

एतां विनिर्माय विधिर्हरिद्रया
  सुधां न्यधात्पाणिपदाधरे ध्रुवम् ।
दृग्दोषशान्त्यै युवमोहनाय वा
  दृगन्तरम् क्ष्वेलमषीकणाङ्कितम् ॥ २४ ॥

द—(अपवार्य) सख्येष गुणवानपि क्ष्वेलप्रयोगी मोहनवादी च. तत्पुरो गम्यताम्.

(सर्वे परिक्रामन्ति.)

पुष्करः—(अपवार्य) आर्य अमात्य महामते! त्वया यदभिहितं कर्णे, "नलो नैवायातः. तदियं सर्वानालोक्य प्रतिनिवृत्ता त्वामेव वरिष्यति किञ्चित्सहस्व" इति. तदेतावत् प्रतीक्षितम्. इतःपरम् न सहेय. यदियं मनोरथप्रियतमा परैः पुरुषैः सानुरागमालोक्यते, समभिवर्ण्यते च, तदेतामद्यैव बलाद्गृहीत्वा रथमारोपयामि.

अमात्यः—(अपवार्य) स्वामिन् किञ्चित्सहस्व.

पुष्करः—यदि इयं मौग्ध्यादन्यं वृणुयात्तदा सोऽपि कश्चित्प्रतिपक्षः समुत्तिष्ठेत.

अ—इदानीं हरणे तु सर्वेऽपि प्रतिपक्षास्सन्तः समुत्तिष्ठेरन्.

पु—(सधैर्यम्) यद्भावि तद्भवतु. (इत्युत्थाय विकटं परिक्रामति.)

(नेपथ्ये) महाराजाधिराज राजपरमेश्वर! इतइतः.

(सर्वे समुत्सुकाः पश्यन्ति.)

अ—(ससंभ्रमं पुष्करमुपसृत्य) देव! विदर्भराजानुगम्यमानः सकंचुकी नलः प्रविशति, किंचित्सहस्व.

पुष्करः—(सकोपं) "नलः नैवायातः" इति कर्णे पिटपिटितं किल त्वया, अद्य किमेवमुपदिशसि? एवं खलु परैर्वञ्चयमानाः प्रभवोपि स्वकार्यं नाशयन्ति. भवतु पश्यामः. (इति यथास्थानमुपविशति)

(ततः प्रविशति यथानिर्दिष्टपरिवारो नलः)

कञ्चुकी महाराजाधिराज राजपरमेश्वर! इत इतः.

(सर्वे–ससम्भ्रममुत्तिष्ठन्ति.)

वैदर्भः—(सप्रश्रयम्) सार्वभौम! इदमासनमलङ्क्रियताम्.

नलः—(उपविश्य सर्वानालोक्य सादरं समन्दहासञ्च) सर्वानस्मत्प्रियसुहृदः सम्मिलितानालोक्य प्रमोदमेदुरं मे मनः. सर्वैः स्थीयताम्.

(**सर्वे** मञ्चेषूपविशन्ति.)

दमयन्ती—(सोल्लासं पितुः पार्श्वमुपसर्पति.)

शारदा—सखि वैदर्भि! पश्य, सकलराजाधिराजवन्द्यमानचरणारविन्दं नैषधसार्वभौमम्. अस्मिन्नखण्डभूमण्डलाखण्डले वहति रज्यधुराम्,

पातालेशः फणधृतमहिस्सोपि शेषाभिधानो
विष्टैः कार्याद्विरतसुफणात्यक्तभारप्रयासः।
गेहे स्वीये प्रमुदितमना गेहिनीभिस्समेतः
किंकिं सौख्यं गलितमिलितं नोपभुङ्क्ते द्विवृत्तम् ॥२५॥

दमयन्ती—(सोल्लासं शिरःकम्पेनानुमोदते.)

वैदर्भः–वत्से! वृणीष्वाभिमतं वरम्.

दम–मन्दं मन्दं नलमुपसर्पति.

कंचुकी–अहो! रमणीयोऽयं सन्दर्भः.

विकसितवदनं कन्या
वक्रितकण्ठं वराभिमुखमेत्य।
उन्नम्य बाहुयुगलं
मालां कण्ठे निबन्धुमुद्युङ्क्ते ॥ २६ ॥

(**नेपथ्ये**)—महाराजाधिराज राजपरमेश्वर! इत इतः.

(सर्वे समुत्सुकाः पश्यन्ति.)

(ततःप्रविशति विदर्भराजानुगम्यमानः सकञ्चुकी द्वितीयो नलः.)

कञ्चुकी—(महाराजाधिराजेत्यादि पूर्वोक्तं पठति.)

(सर्वे–ससम्भ्रममुत्तिष्ठन्ति.)

द्वितीयो वैदर्भः—सार्वभौम! इदमासनमलंक्रियताम्.

नलः–(उपविश्य सर्वानालोक्य सादरं समन्दहासञ्च) सर्वानस्मत्प्रियसुहृदः सम्मिलितानालोक्य प्रमोदमेदुरं मे मनः. सर्वैः स्थीयताम्.

(सर्वे–विस्मयस्फीताक्षं उपविशन्ति)

शारदा—(सस्मितं साकूतञ्च) सखि! पश्य, सार्वभौमं अपरं नैषधम्.

दमयन्ती—(सविस्मयं सव्रीडञ्च प्रतिनिवृत्य अपवार्य.) सखि शारदे! किमिदमाश्चर्यम्? संशये निमग्नास्मि.

शा—द्वौ तातौ द्वौ नलौ वर्तेते. अनयोः तत्त्वं क्रमेण जानीवहे. किंचित्सहस्व.

द्वितीयो वैदर्भः–(प्रथमं वैदर्भं नलञ्च दृष्ट्वा किंचित्सासूयमिव) कावेतौ कपटवेषच्छन्नौ? भवतु, विचारयिष्यामि.

(इति मुकुलिताक्षं ध्यानमभिनीय सशिरःकम्पम्.)

ज्ञातमिदानीम्. वत्से! दिष्ट्या वर्धसे, यदैन्द्रजालिकौ विहाय प्रतिनिवृत्ताऽसि.

शा—(अपवार्य) सखि! अयमेव तात्त्विकस्तातः.

द—(सहर्षं तमुपसर्पति.)

द्वि–वै—वत्से! वृणीष्व एतं नलम्.

(इति द्वितीयं नलं निर्दिशति.)

द–(सकौतुकं तमुपसर्पति.)

कञ्चुकी—अहो! रमणीयोयम् सन्दर्भः.

विकसितवदनं कन्या
वक्रितकण्ठं वराभिमुखमेत्य ।
उन्नम्य बाहुयुगलं
मालां कण्ठे निबन्धुमुद्युङ्क्ते ॥

(नेपथ्ये)—महाराजाधिराज राजपरमेश्वर! इत इतः.

शा—(श्रुत्वा नेपथ्याभिमुखमवलोक्य सरभसं दमयन्तीमुपेत्य,) सखि! मा त्वरस्व. एते त्रयो नलाः त्रिभिस्तातैः अनुगम्यमानाः सकञ्चुकिनः प्रविशन्ति.

द—(दृष्ट्वा सवैलक्ष्यं प्रतिनिवर्तते.)

(ततः प्रविशन्ति यथानिर्दिष्टपरिवाराः त्रयो नलाः.)

नलाः—(पूर्ववदाभाष्य सर्वैस्सहोपविशन्ति.)

तृतीयो वैदर्भः—(इतरान् नलवैदर्भान् दृष्ट्वा साश्चर्यं सशिरःकम्पश्च.) किमेतदिन्द्रजालम्? अथवा अस्मदालेख्यलिखिता मदाकृतिः नलाकृतिश्च किमेवं चतुर्धा सजीवा संवृत्ता? अथवा किं भूतैराक्रान्तं, अस्मद्गृहं? भवतु सर्वं समीकरिष्यामि, (सधैर्यम् सावष्टंभश्च दृष्ट्वा) वत्स दमन! अन्तःपुरं गत्वा देवीं नन्दां ब्रूहि, उषसि सार्वभौममानेतुं निर्गच्छता मया भगवता दमनमहर्षिणा प्रासादीकृतं सकलमायानिवारकौषधीगर्भितं रविप्रभनामकमङ्गुलीयकं यत्त्वदंगुलौ निवेशितम्, तदद्यैव त्वरितं प्रेष्यतामिति.

दमनः—यदाज्ञापयन्ति तातपादाः. (इति निष्क्रान्तः.)

शारदा—सखि दमयन्ति! उषसि तातेन मत्समक्षमेव तदङ्गुलीयकं देव्याः करे निवेशितम्. तदनेनाभिज्ञानेन अयमेव परमार्थस्तातः.

दमयन्ती—(सोल्लासं तत्पार्श्वमुपसर्पति.)

तृ. वै—वत्से! मा बिभीहि. सर्वं समीकरिष्यामि एष ते चिरकाङ्क्षितो वरस्तिष्ठति. तमेनं बहुमन्यस्व. (इति तृतीयं नलं दर्शयति.)

दमयन्ती—(सव्रीडं तृतीयं नलमुपसर्पति.)

युवराजः—(सरभसमुपेत्य) वत्से दमयन्ति! मा त्वरस्व. दमनस्समायातु.

दमयन्ती—(प्रतिनिवर्तते)

चतुर्थो नलः—(चतुर्थं वैदर्भं प्रति साक्षेपम्) आर्य! किमिदं अयुक्तमिव प्रतिभाति, किमेवमपमान्यामहे? क एते मद्रूपधारिणः? नैतादृशं स्थानं अस्माभिः प्राप्यं, कियानयमुद्यम इति उदासितमेवास्माभिः, तथाप्यमात्यहतकेन प्रोत्साह्य प्रेषितास्स्मः. अस्मादृशैः क्षणमपि न स्थातव्यमत्र. (इत्युत्थाय कञ्चुकिनं प्रति) भद्र जयन्धर! मदाज्ञया ब्रूहि मत्सेनाध्यक्षं चन्द्रसेनं, "सद्योनिर्गमनाय सज्जीक्रियन्तां सैन्यानि" इति.

कञ्चुकी—(यदाज्ञापयति देव इति निष्क्रान्तः.)

चतुर्थो वैदर्भः—(सभयं सप्रश्रयञ्च) प्रभो क्षन्तव्यं अस्मद्दैववैपरीत्यम्. अनुग्राह्येयं बाला, यद्बहुदिनान्यारभ्य भवन्तमेव मनसा निरन्तरमुपास्ते.

चतुर्थो नलः—(किञ्चिदालोचयन्निव तिष्ठति.)

दमयन्ती—(अपवार्य) सखि शारदे! गमिष्यति खलु अयं महाभागः. किमत्र प्रतिविधेयं मन्दभाग्यया मया?

शारदा—यदीदानीं निर्गच्छेत् तर्हि पुनः कदापि न सम्भावयेदेव त्वाम्. तदद्यैव प्रसादनीयोयम्.

चतुर्थो वैदर्भः—वत्से! यदीच्छसि सम्भावय महाराजं नैषधम्.

(इति चतुर्थं नलं दर्शयति.)

दमयन्ती—तात! इयमहं आराधयाम्येतम्.

(इति सत्वरं तमुपसर्पति.)

युवराजः—वत्से! किमेवं त्वरसे? चपलाहि स्त्रीबुद्धयो भवन्ति. संशयनिर्णयमप्राप्य कथमेवं प्रगल्भसे?

दमयन्ती—आम् स्मारितास्मि संशयावस्थां भ्रात्रा.

(इति निवर्तते.)

पञ्चमो वैदर्भः—अहो! दैवदुर्विलसितमस्माकम्. किमिदं बन्धुजनमध्ये प्रहसनम्? सर्वथा निष्फलीकृतगौरवोस्मि. यद्यप्यहमेव गत्वा सार्वभौममानयम्, तथाप्येते नलरूपप्रतिच्छन्नाः चत्वारस्सङ्गताः. त एते मामिव महासार्वभौममपि अपमानयन्ति. किमद्य करवाणि मन्दभाग्यः?

सर्वानिमानहमपास्य नलान् परस्मै
दद्यां यदीदमभिनन्दति नैव वत्सा।
ज्ञातुं नशक्य इह तत्त्वनलस्तदद्य
वाचं नियम्य हृदये व्यथितव्यमास्ते ॥ २७ ॥

अपरञ्च—

कन्यामिमां गुणयुताय वराय दत्वा
राज्यं दमाय सुतयोर्विनिवेश्य राज्ञीम्।
सद्यो वने जिगमिषा महती ममास्त
हा हन्त तावति महान् प्रलयोऽयमासीत् ॥ २८ ॥

युवराजः—(सरभसमुपेत्य) तात! मयि तिष्ठति मा स्म खिद्य-

12

थाः. (अपवार्य) यदि समाज्ञापयसि, एकैकेनैव प्रहारेण एकैकं निहन्यां एतान्मायाविनः.

पञ्चमो वैदर्भः—(अपवार्य.) वत्स! मैवं वादीः आकृतिःखलु बहुमन्तव्या?

दमयन्ती—(सप्रत्ययं तमुपसर्पति.)

पञ्चमो वैदर्भः—वत्से! सम्मानय एतं मयैवानीतं सार्वभौमम्.

दमयन्ती—(सविस्रम्भं पञ्चमं नलमुपसर्पति.)

कंचुकी—("विकसितवदनं कन्या" इत्यादि पूर्वोक्तं पठति.)

शारदा—(ससम्भ्रममुपसृत्य) सखि दमयन्ति! किमेवमस्थाने भ्रान्ताऽसि? किञ्चित्सहस्व.

दमयन्ती—(स्वगतम्) अहो! स्मारितास्मि प्रकृतावस्थां प्रिय सख्या. (प्रकाशम्) सखि शारदे! एवम्भूते अस्मद्भाग्यविपर्यये किमद्य करवाव?

शारदा—सखि! न किञ्चित्प्रतिभाति. पश्य सावधानं निरूपितमपि एतेषां वैलक्षण्यं न किञ्चित् ज्ञायते. यदेते खलु,

आकारेण स्वरेणापि भूषणैर्भाषणैरपि ।
परस्परं न भिद्यन्ते चिह्नचेष्टेङ्गितैरपि ॥ २९ ॥

दमयन्ती—अहो! संशये पातिते स्वः.

शारदा—हा! हा! कष्टम्, कष्टम्.

त्वं बालासि न वेत्सि कैतवमिदं बाला च मूढास्म्यहम्
भ्राताप्येष न वेत्ति कैतवमिदं तातोपि जातोऽन्यथा ।
राजा मोहनतत्परोऽयमभवत् देवोपि दावोभवत्
चेतोभ्रान्त्युदधिं तरीतुमधुना नौका तु नौ का भवेत् ॥३०॥

(इति शोचतः.)

(सर्वे—सविस्मयकरुणम् पश्यन्ति.)

दमयन्ती—(स्मरणमभिनीय) सखि शारदे! स्मारितास्मि किञ्चिद्दैवेन.

शारदा—कथय कथय, किं तत्?

दमयन्ती—किं ते देवाः रम्भादिमुखात् मत्कृतस्वनिराकरणं श्रुत्वा किमपि प्रतिकर्तुं एवं कपटरूपच्छन्नाः भवेयुः?

शारदा—आम् युज्यते युज्यते.

दमयन्ती—कथमिव?

शारदा—यत्ते देवाः इन्द्राग्नियमवरुणाश्चत्वारः, एतेपि मायाविनः चत्वारः. यच्च अन्यदीयाकारस्वरचिह्नचेष्टादिग्रहणं देवेतरदुर्लभमेतेषाम्. तदेते तएव देवाः.

(सर्वे—(सश्लाघम्) शारदे! शारदैवासि, (इति श्लाघन्ते.)

दमयन्ती—तर्हि किमद्य करणीयम्?

शारदा—उपश्लोकय देवान्, स्तुतिप्रिया हि देवाः.

दमयन्ती—तर्ह्यार्षैरेव स्तवैः प्रार्थये देवान्.

शारदा – समीचीनोऽयं पन्थाः.

दमयन्ती—(सभक्तिप्रकर्षम् अञ्जलिम् बध्वा)

मनसा वचसा चैव यथा नाभिचराम्यहम् ।
तेन सत्येन बिबुधाः नैषधं प्रदिशन्तु मे ॥
यथा देवैस्स मे भर्ता विहितो निषधाधिपः ।
तेन सत्येन मे देवास्तमेव प्रदिशन्तु मे ॥
यथेदं व्रतमारब्धं नलस्याराधने मया ।
तेन सत्येन मे देवास्तमेव प्रदिशन्तु मे ॥
स्वश्चैव रूपं कुर्वन्तु लोकपाला महेश्वराः ।
यथाहमभिजानीयां पुण्यश्लोकं नराधिपम् ॥

(ततस्सन्तुष्टास्समुत्तिष्टन्ति नलरूपं विहाय स्वेन स्वेन रूपेण देवाः)

सर्वे—(प्राञ्जलयः समुत्तिष्ठन्ति.)

देवाः—(दमयन्तीमालोक्य) भवत्यास्सत्यव्रतेन प्रीतास्स्मः. वृणीष्वाभिमतं वरम्.

दमयन्ती—पुण्यश्लोकं नलमेव वृणे.

देवाः—प्रियं नः प्रियं नः.

दमयन्ती—(ससम्भ्रमं नलमुपसर्पति.)

वैदर्भः—अहो! देवानां प्रभावः, अन्तर्हितास्सर्वे मायामयाः. वत्से! पूरय मनोरथम्. सुमुहूर्तोयम्.

दमयन्ती—(सप्रमोदं नलस्य कण्ठे मालामर्पयति. आकाशात् पुष्पवृष्टिः पतति. दिव्याः दुन्दुभयश्च ध्वनन्ति.)

दमयन्ती—(नलस्यपार्श्वमनुसरति. नलस्सप्रमोदं दमयन्तीं करे गृह्णाति.)

सर्वे—(करास्फालनैरभिनन्द्य प्रणमन्ति.)

दमनः—(प्रविश्य वैदर्भमुपसृत्य) तात! अम्बया प्रेषितमिदं रवि-प्रभाख्यमङ्गुलीयकं गृह्यताम्.

वैदर्भः—(सश्लाघम्.) अहो! समये उपस्थितमिदम्.
(गृहीत्वा नलस्य कराङ्गुलौ योजयति नलस्तु दमयन्तीकराङ्गुलौ याजयति.)

सर्वे—(सकौतुकमालोकयन्ति.)

इन्द्रः—(दम्पत्योस्समीपमुपसृत्य) महाभागे दमयन्ति! सखे महाराज नल! भवतोस्सत्यशीलतां परीक्षितुमागतैरस्माभिः दूत्यनियोगकृतकरूपप्रदर्शनादिभिः क्लेशितौ युवाम्.

नलः—नायं क्लेशः, किन्तु अनुग्रहएव, यद्भवद्भावनाविषयीकृतौ स्वः.

इन्द्रः—प्रियं नः. साधयामो वयम्.

(उभौ—प्रणमतः:)

इन्द्रः—भद्रे! अनुपहतन्ते पातिव्रत्यं भूयात्. सखे नल! शतं वर्षाणि यज्ञैस्साक्षान्मां प्रीणयन् अन्ते महोन्नतां गतिं प्रतिपद्यस्व.

अग्निः—सखे नल! तव अग्निस्पर्शेन बाधा मा भूत्. स्पर्शमात्रेण पाकसिद्धिस्ते भूयात्.

यमः—सखे नल! त्वया पक्कमन्नम् अमृतरसं भूयात्. कृच्छ्रेपि सत्यपथात् मा स्खालीः.

वरुणः—राजन्! मरावपि इच्छाधीना जलसिद्धिस्ते भूयात्. त्वद्गात्रसंसर्गात् कुसुमान्यम्लानानि अतिसुरभीणि च भवन्तु. किञ्च त्वत्कथाश्रवणमात्रेण निर्धूतकलमषाः सुखयन्तु प्रजाः.

उभौ—अनुगृहीतौ स्वः.

देवाः— (निष्क्रान्ताः.)

वन्दी—(सप्रश्रयमुपसृत्य) प्रेयस्या भर्तृदारिकया सनाथोयम् महाराजनलः श्रिया युतः श्रीपतिरिव, राकया युतः चन्द्रमा इव च सकललोकलोचनपारणां करोति.

(**सर्वे**—सप्रमोदं जयजयेति पुष्पैः विकिरन्ति. नेपथ्ये)

पूज्यन्ताम् पुरदेवताः प्रतिकलं प्राज्यैः प्रसूनादिभिः
भोज्यन्तामवनीसुराः प्रतिदिनम् भोज्यैस्सहाज्यैर्मुहुः ।
अर्च्यन्ताश्च सुवासिनीसमुदयाः सार्घैर्नृपस्त्रीजनैः
वत्सायाः परिवर्धतेद्य सुमहान् पुण्यो विवाहोत्सवः॥३१

वैदर्भः—(श्रुत्वा ससम्भ्रमं नलमुपसृत्य.) महाराज! मदाज्ञया सामात्यः पुरोहितो यथाविधि विवाहमङ्गलनिवर्तनाय सर्वं सज्जीकरोति. तदभ्यन्तरम् प्रविशतु महाराजः.

नलः—यथाज्ञापयन्ति गुरवः (इति सत्वरमुत्तिष्ठति.)

(सर्वे—ससम्भ्रमं तमनूत्तिष्ठन्ति.)

वैदर्भः—(राजसभाभिमुखीभूय साञ्जलिबन्धम्) सर्वान् वो बन्धून् राज्ञो विज्ञापयामि, सर्वैस्सानुग्रहम् अस्मिम् दिने मद्गृहे स्थित्वा महोत्सवमनुभूय मत्पूजामङ्गीकृत्य गन्तव्यम्.

सर्वे—प्रियं नः प्रियं नः.

पुष्करः—(सकोपोद्रेकम्) अमात्य! सज्जीकुरु रथम्. गृहं गमिष्यामः. सर्वथा मन्मनोरथघातिनीं एतां यथाकथञ्चिद्वशीकृत्य निग्रहीष्यामि. भुक्तिलोलुपास्त एते प्रविशन्तु राजमन्दिरम् परान्नैकप्रवणाः ब्राह्मणा इव.

(इति परिक्रम्य निष्क्रान्तास्सर्वे.)

इति भैमीपरिणये तृतीयोऽङ्कः.

ओं तत्सत्

अथ चतुर्थोऽङ्कः.

(ततः प्रविशन्ति ब्राह्मणाः.)

एकः—अहो! दमयन्तीविवाहमहोत्सवे भोजनैर्भोजनैर्मणिकनकाम्बरादिभिश्च प्रमोदितानां स्वस्वगृहाभिमुखं निर्गच्छताम् ब्राह्मणानां दर्शनीय एष समुदायः एते खलु—

प्राज्यैस्सुभोज्यैः परिपूरिताज्यै
स्सन्तर्प्यमाणास्सहदक्षिणैश्च ।
परामृशन्तः पथि पूर्णतुन्दम्
बृन्दैस्सहायान्ति च मन्दमन्दम् ॥ १ ॥

अन्यः—अहो! विवाहमहोत्सवस्य रमणीयता. अहो! भीमराजस्यौदार्यम्. अहो! भोजनवैभवम्. अहो परिवेषणपौनःपुन्यम्. अहो! पाकस्य रुच्यता.

अपरः—कस्सन्देहः, नालिकेरमात्रकाः लड्डुकाः. चन्द्राबिम्बपरिपाटयश्चिरोटयः. शूर्पप्रमाणकाः फेणकाः. मुग्धदुग्धमण्डकानीव मण्डिकाः. किमु वक्तव्यं सूपशाकपाकादिकम्.

एकतरोवटुः—तेमनस्य परं किञ्चिल्लवणाधिक्यमिव.

अन्योवटुः—नहि नहि व्यञ्जनं परं किञ्चिदधिकलवणम्.

प्रथमः—(सरोषं) कोयं वटुः प्रतिवदति वाचाटः ?

द्वि—त्वमेव वाचाटः.

प्र—त्वं मूढः.

द्वि—त्वं मूढः.

प्र—त्वं शुण्ठः.

द्वि—त्वं शुन्ठः.

प्र—अनेन मुष्टिना प्रहृत्य पातयेयम्.

द्वि—अनेनैव दण्डकाष्ठेन प्रहृत्य पातयेयम्.

(उभौ केशाकेशि दण्डादण्डि मुष्टीमुष्टि कुर्वतः.)

अन्यो वृद्धः—(मध्ये सन्निधाय) कोयमस्थाने सम्भ्रमः? सूपस्य वा व्यञ्जनस्य वा लवणाधिक्यं भवतु, किमनेन शुष्ककलहेन? (इति निवारयति.)

प्र—तात! पश्य वयसा अधिकमपि मामेष धिक्करोति.

द्वि—तात! पश्य किं वयसा ब्राह्मणस्य? किञ्चिद्विद्याधिकमपि मामेषः न गणयति.

वृद्धः—किञ्चिद्विद्यैव एवमकारयत्. अपसरतम्.

(उभौ अपसरतः.)

अन्यतमो वटुः—(वृद्धं प्रति) तात! तिष्ठत्वनयोः कलह-वृत्तान्तः. पलिताशिराः पण्डितश्चासि. ब्रूहि भैमीपरिणयवृत्तान्तम्. मया तु भोजनशालायामेव कालो नीतः. अतो नविशेषमज्ञासिषम्.

वृ—सुशर्मन् श्रूयताम्—

सु—अवहितोस्मि.

वृ—दमयन्त्या वरणमालिकासमर्पणपूर्वकं, वृतं नलमभ्यन्तर-मानीय विदर्भाधिपः यथाविधि विवाहमङ्गलं निर्वर्तयितुमारभत. ततः पुरोधसा सज्जीकृतेषु विवाहोपकरणेषु,

विरचितनवमङ्गलाभिषेकः
प्रियतरकाञ्चनभूषणोज्वलाङ्गः ।
प्रभुजनकरसङ्गतात्मपाणि
र्मणिमयमासनमाससाद राजा ॥ २ ॥

सुवासिनीजनैस्ततस्समन्ततोप्यलङ्कृते
रसालसालपल्लवै र्विशालमङ्गलप्रदे ।
अवारितप्रजान्तरे विवाहमण्डपान्तरे
सकौतुकौ वधूवरौ सकौतुकौ व्यराजताम् ॥ ३ ॥

सभाभ्यन्तरे वेदिमभ्यर्च्य पुष्पैः
सगन्धैः कुशैश्चाक्षतैर्लाजमिश्रैः ।
निवेश्याग्निमस्यामहौषीद्धृतादी-
नजापीच्च मन्त्रान् विधिज्ञः पुरोधाः ॥ ४ ॥

स तां नृपसुतां कान्तां प्रत्यगृह्णत पाणिना ।
कन्याकृतिमतीं साक्षाद्राज्यलक्ष्मीमिवात्मनः ॥ ५ ॥

तदानीं खलु—

भेरीभांभांध्वनिभिरतुलैः ब्राह्मणाशीर्वचोभिः
हृद्यैर्वाद्यैर्विविधनिनदैस्तैश्शतघ्नीरवैश्च ।
वीणालापैर्ललितललितै र्नर्तनैर्नर्तकीनाम्
आसीत्संसत् सततविलसच्छब्दरूपः प्रपञ्चः ॥ ६ ॥

सुशर्मा—साधुतरं सञ्जातम्. ततस्ततः—

वृ—ततश्च,

अन्योन्यमर्धमिलिताक्षि विलोकयन्तौ
एकासने व्यलसतामथ दम्पती तौ ।
तौ वीक्ष्य तत्र मुदितैरखिलैर्नरेन्द्रै
र्भक्त्यानतैर्धुरि सुमाञ्जलयः प्रकीर्णाः ॥ ७ ॥

सु—अहो ! महान् विभवः. ततस्ततः—

वृ—ततस्स महाराजो नैषधो लाजहोमादिकं प्रधानं कर्म परिसमाप्य सर्वैर्मणिकनकाम्बरादिभिस्सम्मान्यमानः सर्वानभिनन्द्य स्वगृहं प्रवेष्टुकामः पुरोहितानीयमानवैवाहिकमङ्गलाग्निकः सर्वैर्नृपतिभिः चतुरङ्गसेनया च परिवृतः परिवृतपीताम्बरमणिहारादिभिरधिककान्तः कान्तया सह कान्ताकारं काञ्चनमण्डपपरिशोभमानं मदगजमारुक्षत्.

सु—अहो ! आभिजन्योचितोयं क्रमः ततस्ततः—

वृ—ततश्च,

तौ दम्पती गजपते रुपरि प्रदीप्तं
सौवर्णमण्डपवरं सहसाधिरुह्य ।

प्राग्भूधरे द्युमणिबिम्बमुपेत्य लक्ष्मी-
नारायणाविव दृशोर्मुदमादधाताम् ॥ ८ ॥

ततः—

पौरस्त्रीभिर्नयनकमलैरर्च्यमानस्तदानीं
मुक्ताजालैः कनककुसुमैः कीर्यमाणस्समन्तात् ।
वारस्त्रीभिर्व्यजनपवनैर्वीज्यमानः प्रमोदात्
वध्वा सार्धं क्षितिपतिरयं राजवीथीमयासीत् ॥ ९ ॥

ततश्च—

नव्योद्वाहो नलनरपतिः कौतुकाकृष्टचित्तः
कान्तायोगाद्द्विगुणितरुचिर्याति सेनासमेतः ।
आयात श्रीविजितमदनं पश्यताद्य प्रमोदा-
दित्यागन्तुप्रियजनयुताः पौरवर्गास्समायुः ॥ १० ॥

ततश्च—

फीत्कारैर्मददन्तिनां हयभवैर्हेषारवैस्स्यन्दन-
स्वानैः पत्तिघनस्वनैर्घनरवन्यक्कारिढक्कारवैः ।
भेरीभाङ्कृतिभिर्भयान्वितहृदां भीमैश्शतघ्नीरवै
श्चण्डैर्डिण्डिमडम्बरैर्निबिडितं ब्रह्माण्डभाण्डोदरम् ॥ ११

सुशर्मा—क्वेदानीं स महाराजः?

वृ—इतः पश्य, प्रस्थाप्य नृपतीन् प्रस्थितां दमयन्तीं समाधातुं सह दमनेन अनुगच्छन्तं पुरस्कृतपुरोधसं वैदर्भमभिनन्द्य निवर्तयिष्यन् इदंसरस्तीरमनुसरति.

सु—(दृष्ट्वा सपरितोषम्) वयमपि तत्रैव गत्वा दूरे पश्यामः. (इति निष्क्रान्ताः.)

(इति शुद्धविष्कम्भः.)

(ततः प्रविशति राजा यथानिर्दिष्टो वैदर्भश्च.)

वैदर्भः—अहो! कष्टं, कष्टं! (सकरुणम्, दमयन्तीमालोक्य)—हा वत्से! मां मन्दभाग्यं परित्यज्य स्वभवनं प्रस्थितासि. (सवैक्लव्यं)—

यातायां त्वयि हा सुते पतिगृहं शून्याः किलास्मद्गृहाः
वत्से! त्वामपहाय केवलमहं स्थातुं कथं शक्नुयाम् ।
त्वच्चिन्तापरिशोषितं मम मन श्शोकेन दन्दह्यते
यः कन्यापितृतां प्रयाति स महापापो हि लोके जनः ॥१२

(सदृष्टिक्षेपम्) वत्स दमन! प्रस्थिता ते भगिनी. तदनुनयैनां बन्धुजनविरहदुःखिताम्.

दमनः—(सकरुणमुपसृत्य) वत्से! आपांसुक्रीडनात्सहचारिणावावामद्य वियुज्यावहे किं करोमि मन्दभाग्यः?

वै—वत्स दमन! भगिन्यास्ते परिचरणाय प्रेषय केशिन्यधिष्ठितान् सहस्रं दासीजनान्. अन्यच्च धनकनकवस्तुवाहनादिकं यद्यदपेक्षते इयम् तत्सर्वमपि.

दमनः—यदाज्ञापयति तातः.

दमयन्ती—(सगद्गदं)–भ्रातर्दमन! मद्विरहदुःखितौ मातापितरौ प्रतिक्षणमवेक्षस्व. निष्करुणाहं दूरवर्तिनी भवामि मन्दभाग्या.

(इति पर्यश्रुमुखी तिष्ठति.)

पुरोधाः, जागरायणः—वत्से! मारोदीर्मङ्गलकाले. राजन् विदर्भराजेन्द्र! अतिवर्तते कालः! तदिमामादेष्टव्यं आदिश्य प्रतिनिवर्तताम् भवान्.

वै—गुरो जागरायण! वत्सां विहाय, कथं वा प्रतिनिवर्ते निर्घृणः?

पुरोधाः—वत्से, दमयन्ति! अभिवन्दस्व पितुश्चरणौ.

दमयन्ती—(मातृदत्तानि मङ्गलसमालम्भनानि सख्या ग्राहयन्ती सादरं प्रणमति.)

वै—(सुतां परिष्वज्य शिरसि स्पृशन् सगद्गदम्!) अयि वत्से!

रमेवास्मद्भाग्यात्त्वमियमधिजाता मम गृहे
क्षणं स्थित्वा गच्छन्नतिथिरिव यासि स्वभवनम्।
सुखे वा दुःखे वा न तव सहभोक्ताहमभवम्
स्वकैः पुण्यैर्जीयाः क्वचिदपि सुशीला च सुखिनी ॥ १३

जाग—युक्ततरमिदमाशंसनम्.

वै—वत्से! स्वतस्सकलगुणपरिपूर्णाया अपि ते किञ्चिदादिश्यते, तदिदमवधार्यतां हृदये.

दमयन्ती—(सादरम्) अवहितास्मि.

वै—अनालस्यात्पत्युः परिचरणसज्जा भव सदा
हठासूयाक्रोधान् परिजहि समाधेहि सततम् ।
कुलं शीलं कालं सकलजनजालञ्च मनसा
प्यनुल्लङ्घन्ती स्वां मतिमनुगता जागृहि सुते ॥ १४ ॥

जाग—कुलवधूजनोचितोयमुपदेशः.

वै—(नलाभिमुखीभूय)—महाराज! अस्मद्गृहजनोसि. तदिदमावेद्यते किञ्चित्.

नलः—(सविनयम्) विधेयोस्मि गुरुजनानुशासनानाम्. तदसङ्कोचमाज्ञापयन्तु पूज्यपादाः.

वै—गुणोदारो धीरश्शशिकुलकुमारोसि विदितो
भवन्मातास्माकं भवति खलु मातृष्वसृसुता ।
तव न्यस्ता हस्ते शिशुरियमिदानीं करुणया
यथास्माकं शोच्या न भवति तथा पालय विभो ॥ १५ ॥

नलः—अहो! पूर्वानुबन्धोपि ज्ञापितः. सर्वथाप्यधीन एवास्मि युष्मदनुशासनानाम्.

वै—अपरश्चेद मभिधीयते.

नलः—सज्जोस्मि श्रोतुमनुष्ठातुञ्च.

वै—अजानाना पत्युः परिचरणमार्गान् मम सुता
प्रमादाद्वा मौग्ध्याद्वा स्खलति यदि किञ्चित्स्वयमियम् ।

तदाऽस्यास्स्खालित्यान्यपरिगणयन् मर्षय तथा
ह्युदाराणां चेतो भवति परदोषानभिमुखम् ॥ १६ ॥

दमनः—भावक! मयापि किञ्चिदाख्येयमस्ति.

नलः—अलं शङ्कया. विस्रब्धमभिधीयताम्.

दमनः—नोत्सङ्गादवतारिता सकृदपि प्रीतेन तातेन या
याऽस्माभिश्शयनासनादिषु कदाप्येकाकिनी नोज्झिता ।
जानीते न परानुवर्तनमियं बाला च दूरे वयम्
भीमा पालय वा वने विसृज वा न्यस्तस्समस्तोभरः ॥

शारदा—प्रतिहतममङ्गलम्.

नलः—कोत्रदोषः? वत्सेन अनूदितो लोकवादः.

शा—(दमयन्तीं परिष्वज्य)—सखि! त्वामनुगच्छन्ती केशिनी कृतार्था संवृत्ता. मन्दभाग्याहं त्वयाविरहितमात्मानं क्व वा कथं वा विनोदयेयम्?

दमयन्ती—सखि शारदे! मा विषीद. वैक्लव्यमनासाद्य विक्लवां देवीमम्बां प्रतीक्षस्व. तस्यां मद्विरहदुःखितायां क्रीडाशुकशारिकाः स्वयमवेक्षस्व. इदन्तु स्मृतिपथमारूढमिदानीम्.

शारदा—कथय किन्तत्?

दमयन्ती—मदन्तःपुरोद्याने नूतनारोपितायाः यूथिकायाः सद्यः छाया परिकल्पनीया. तपस्विनी सा आतपवेगं न सहते. तत्सविध एव उपघ्नतरुरेकश्च आरोपणीयः.

शारदा—(सबाष्पं) भवतु तथैव कारयामि.

दमयन्ती—अन्यच्च मे मनसि वर्तते.

शारदा—सर्वं कथय यद्याद्विवक्षितम्.

दमयन्ती—मदीयलीलागृहभित्तिकायां मयैव लिखितेषु तातस्य दमदमनयोश्च प्रतिच्छन्देष्वपूर्णभागाः त्वयैव साधु वर्णिकाप्रदानेन पूरणीयाः. मत्क्रीडापर्वतकस्य स्वर्णच्छाया रत्नच्छाया वा लुप्येत. तदवश्यं तस्य आवरणमण्डपं परिकल्पनीयम्. तातः पुनःपुनर्बोधितोपि विस्मरति. तत्त्वयैवैतत्कारयितव्यम्.

शारदा—सन्नद्धास्मि तदेतत्सर्वं तथैव निर्वर्तयितुम्. मान्यथामन्यथाः. परन्तु हा वयं सर्वास्सम्मिलन्त्यः पुनः कदा वा तांस्तान्विनोदविहाराननुभवेम?

दमयन्ती—तदिदं तातमापृच्छस्व.

शारदा—(वैदर्भाभिमुखीभूय)—तात! कदा वा प्रियसख्याः पुनरागमनोत्सवस्समनुभवितव्यः?

वै—वत्से, युवयोरालापं शृण्वतो मे हृदयं शतधा विशीर्णमिव. तथापि ब्रवीमि श्रूयताम्—(दमयन्त्यभिमुखीभूय)—वत्से! शृणु त्वं, तावदितो मद्गृहात्पतिगृहमुपेत्य——

सुतं सूत्वा सम्राट्श्रियमनुभवन्ती चिरतरं
सुतप्राणेशाभ्यां सह सकलसैन्यैः परिवृता।
प्रहृष्यन्ती भेरीधणधणधणात्काराविभवैः
स्नुषीकर्तुं नप्त्रीं मम गृहमिदं प्राप्स्यसि पुनः॥ १८॥

शारदा—अहो तातस्तावद्भविष्यतो दौहित्रस्य भविष्यन्त्याः पौत्र्याश्च परस्परानुयोजनमुत्कण्ठते.

जाग—(सश्लाघं सामोदञ्च हस्तमुद्यम्य) तथास्तु.

वै—वत्से! पुरोधसं जागरायणमभिवन्दस्व.

दमयन्ती—(सादरं तत्पादौ प्रणमति.)

जाग—(पुनः हस्तमुद्यम्य सादरं)—वत्से, दमयन्ति!

सम्राज्ञी श्वशुरे ननान्दरि भव श्वश्र्वां तथा देवरे
सौमङ्गल्यमवाप्य वत्सरशतं वंशद्वयोत्तारिणी।
पुत्रानष्ट समेत्य शीलभरिता भर्तुस्सदानन्दिनी
शक्रस्येव शची हरेरिव रमा गौरीव शम्भोर्भव ॥१९॥

(इत्यक्षतान् शिरसि विकिरति)

वै—वत्से! प्रतिष्ठस्वेदानीम्.

दमयन्ती—(सगद्गदम् इयमहं गमिष्यामीति पुनःपुनः पादग्रहपूर्वकं परिष्वज्य पितरं पुनःपुनः परावृत्य पश्यन्ती सह पत्या निष्क्रान्ता.)

वै—(सुचिरमालोकयन्)—हा हन्त! अन्तर्हिता तरुपङ्क्तिभिर्वत्सा. कथमिदानीम् अतिविक्लबमात्मानं सन्धारयामि? क्व वा विशेयम्? हा सर्वा दिशः शून्या इव. (इति मूर्च्छति)

जाग—राजन् समाश्वसिहि.

वै—(समाश्वस्य मन्दमुत्तिष्ठति.)

दमनः—(तरुमारुह्य पश्यन्) अहह दूरं गता वत्सा तरुभिरन्तर्हि-

ता च. हा गता किल आबाल्यसहचारिणी. कथमेकाकी निवसेयम्? (वैदर्भमुपसृत्य)–तात! अहमपि वत्सामनुगच्छामि.

वै—न युक्तमिदम्. वत्सो दमस्तावद्बहुधा निवारितोपि भगिनीस्नेहात्पुरःपुरएव गच्छन् कानिचिदहानि तत्र स्थित्वा प्रत्यागमिष्यामीति वदन्नेव चलितः. इदानीं किं त्वमपि मां परित्यजसि?

जाग—वत्स! अनुचितमिदमालोचितम्. युवराजोपि न सन्निहितः. तनयानूतनविरहविक्लबं तातमनुपालयन् वर्तस्व. अन्यच्च प्रकृते सन्दर्भे प्रतिहतमनोरथेषु क्षितिपतिषु युष्माकं प्रतिचिकीर्षया कदा वा कोवा कमपि कलहमुत्पादयेदेव. तत्र प्रतिविधातुं भवता अत्र तातसन्निहितेनैव भवितव्यम्.

वै—(सावज्ञं सावष्टम्भश्च) जागरायण! पूज्यो गुरुरसि, सर्वमनुरूपमेव वदसि च. तथाप्यन्ते किमेवमजानन्निव मन्त्रयसे?

श्रूयताम्—

यस्याज्ञा सुममालिकेव शिरसा सन्धार्यते राजभि-
र्यद्दोर्विक्रमएव पाति सकलानासेतुशीताचलम्।
यन्नामश्रवणं भुवि प्रशमयेद्दुर्नीतिमुर्वीभुजां
तस्मिन् जाग्रति वीरसेनतनये कस्माद्भवेन्नः कलिः॥२०॥

(इति परिक्रम्य निष्क्रान्तास्सर्वे.)

इति भैमीपरिणये चतुर्थोङ्कः.

ओं तत्सत्.

अथ पञ्चमोऽङ्कः

(ततः प्रविशति विकृतोद्धतवेषः कलिः)

कलिः—(साटोपं परिक्रम्य सहर्षम्) अहो! सम्प्रति सम्पादितान्येव-समग्राणि समीहितसाधनानि. तदद्य सन्निहितां कार्यसिद्धिमनुभविष्यामि. (समन्तादवलोक्य) क एष पुरतस्समायाति?

(निपुणं निरूप्य) कोयं लोकविलक्षणः पुरुषः? य एषः

सितासिते द्वे वसने वसानः
कोपप्रसादौ च मुखे दधानः।
उष्णश्च शीतश्च वचो ब्रुवाणः
मार्गेप्यमार्गेपि पदं ददानः ॥ १ ॥

(प्रविश्य पुरुषः सस्मितं) अये कलिराज! वर्धतां भवान्.

क—(सानुस्मरणं सप्रत्यभिज्ञं च) अहो! द्वापर एषः. अयि द्वापर! कालतः किञ्चिज्जचेष्ठ इत्यभिवन्द्यसे.

द्वापरः—(किञ्चित्सकोपं) किं न महानिति?

क—(साटोपं) मत्पुरतः कोन्यो महान्?

द्वा—कथमेतत्?

क—श्रूयताम्—

महत्त्वकारणान्याहुः प्रज्ञाधनपराक्रमान्।
वर्तन्ते मदधीनास्ते मत्समो नास्ति भूतले ॥ २ ॥

अन्यच्च श्रूयताम्—

सौन्दर्यं मयि साधुता मयि जगत्सम्भाव्यता सा मयि
स्वामित्वं मयि सौम्यता मयि तथा मय्येव सर्वज्ञता ।
दाक्षिण्यं मयि दातृता मयि महावंशीयता मय्यतो
राजन्ते सकला गु ण मयि ततो मत्तो निकृष्टाः परे ॥ ३ ॥

द्वा—(स्वगतं) अहो! विकत्थनोयं वटुः. तदाशयजिज्ञासुना न कोपयितव्यः, परन्तु प्रोत्साहनीयः. भवत्वेवं तावत्. (प्रकाशं) अहो! कलेः प्रभावः, महाराज! सर्वं सम्पद्यते त्वयि.

क—(सहर्षं सानुरागश्च) इदमासनम्. आस्यतामार्येण.

द्वापरः—(उपविश्य) महाराज! चिराद्दृष्टोसि. तत्र तत्र विचीयमानोपि न लब्धोऽभूः. तदेतावन्तं कालं क्वोषितं भवता?

कलिः—अत्रैव.

द्वापरः—विशिष्य कथय, किङ्कुर्वन् कुत्र वससि?

कलिः—श्रूयतम्—

आभिवर्धयन्ननङ्गं रागद्वेषौ चिरायुषौ कुर्वन् ।
उत्सारयन् विवेकं दुर्जनहृदयेषु निवसामि ॥ ४ ॥

द्वापरः—साधु सखे! साधु, किञ्चित्पृच्छामि; किमेवं विक्लबइव त्वरित इव प्रहृष्ट इव च प्रतिभासि? तदद्य कोयं नूतनो वृत्तान्तः?

क—नारदप्रसाद एषः.

द्वा—कथमिव?

क—प्रियसुहृदः तव अनाख्येयं किमस्ति? श्रूयतामनुक्रमेण.

द्वा—अवहितोस्मि.

क—कदाचिन्महर्षिर्नारदस्समागत्य दमयन्तीं त्रिलोकैकसुन्दरीमवर्णयत्.

द्वा—(स्वगतं) कलहप्रियेण तेन समारोपितः कोपि कलहाङ्कुरः.

(प्रकाशं) ततस्ततः—

क—ततस्तदभिनिविष्टमनाः तां परिणीय वशयितुं कुण्डिनं नगरमगमम्. तावदेव सा नलेन परिणीतेति स्वयंवरस्थानात्स्वर्गमधिगच्छतो महेन्द्रादनुश्रुत्य प्रज्वलितः तदपजिहीर्षया निषधानयासिषम्.

द्वा—ततस्ततः—

क—ततस्तत्र एकाकिन्यास्तस्याः बहिर्निर्गमनं प्रतिपालयतो विभीतकतरुमावसतो मम गतेपि बहुतिथे काले न लब्धस्तद्दर्शनावकाशः.

द्वापरः— युक्तमेवेदम्.

कलिः—(सकोपोद्रेकं) अरे वैधेय! हतक! मूर्ख! चण्डाल! तव कथं युक्तमिदम्? (इति प्रहर्तुमिच्छति).

द्वा—(निवारयन्) सखे कोयमस्थाने कोपः? असूर्यंपश्याः राजदारा इत्यभिप्रायेण तथाभिहितं मया. अन्यच्च श्रूयताम्. पतिव्रतानामेकाकिनीनां बहिर्निर्गमनं न सम्भवत्येव. उक्तमेव किल प्राचीनैः,

"पदन्यासो गेहाद्बहिरहिफणारोहणसमो
निजावासादन्यद्भवनमपरद्वीपतुलितम्।

वचो लोकालभ्यं कृपणधनतुल्यं मृगदृशः
पुमानन्यः कान्ताद्विधुरिव चतुर्थीसमुदितः" ॥इति.

क—(सानुनयम्) एवञ्चेन्महाभाग! क्षम्यतां मदपराधः.
(इतिप्रणमति)

द्वा—(स्वगतं) क्षुल्लकोयं सुलभकोपप्रसादः. (प्रकाशं) भवतु पुरस्तादभिवर्ण्यताम्.

क—अथ तयोर्विघटनोपायं विचिन्तयन् कञ्चित्कालमपानयम्.

द्वा—अत्र किञ्चित्पृच्छामि, शुद्धान्तं प्रविश्य कुतो बलान्नापहृता सा?

क—सखे श्रूयताम् तत्र मत्प्रतिपक्षाः बहवः तौ परिवार्य वर्तन्ते. तएते मम प्रवेशावकाशं न दित्सन्ति. तेषामेकैकशो निग्रहस्सुलभ एव मम. तथापि कार्यसिद्धेर्विलम्बो भवेदित्येष भेदोपायश्चिन्तितः.

द्वापरः—साधु सखे! "उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः" इति नीतिमन्वसरः. भवतु कएते त्वत्प्रातिपक्षाः तत्परिवाराश्च?

कलिः—सत्यशौचशमदमतितिक्षासमाधानश्रद्धादयः.

द्वा—त एते नखच्छेद्यास्ते. ततस्ततः.

क—ततः कदाचित्प्रसुप्ते सदाचारद्वारपाले किञ्चिदन्तरं प्रविश्य तयोर्विवेकप्रध्वंसनाय मत्पक्षीयान् भ्रमप्रमादालस्यादीन् तत्र नियुज्य नलस्य निपातनाय तत्प्रतिकूलः पुष्करः प्रोत्साहितः. तदिदानीं सुखेन तामपहृत्यानुभविष्यामि.

द्वा—अहो! हन्त निहता सा तपस्विनी.

क—कथं करुणया सन्तप्यसे ?

द्वा—अनौचित्यप्रसङ्गे सति तटस्थस्यापि जन्तोस्स्वाभाविक एष तात्कालिकस्सन्तापः. शृणु प्राचीनाभिहितम्,

'यद्यपि का नो हानिः परकीयां चरति रासभे द्राक्षाम् ।
अनुचितमिदमिति मत्वा हाहा हन्तेति दूयते हृदयम्' ॥ इति

क—कथमनौचित्यप्रसङ्गः?

द्वा–(स्वगतं) अद्यैनमकोपयन्नेव यथायमकार्याज्जुगुप्सेत, तथा प्रत्युत्तरयामि. भवत्वेवं तावत्. (प्रकाशं) श्रूयतामिदं, भैमीतावन्नलेनानुभूतपूर्वा, इन्द्रसेनेनेन्द्रसेनया च पुत्रवती च संवृत्ता. कथं भवादृशो यातयाममपेक्षते वस्तु?

क—येन केनाप्युपायेन तां कष्टां दशां प्रापय्यानुभविष्यामि. ततस्सा नदीव नौरिव सर्वसाधारणी भवतु. कोदोषः? किन्निहतं मम?

द्वा—(स्वगतं) अकारणकोपोयमयुक्तकारी दुर्जनः.

(प्रकाशं) सखे! नैतत्सम्भाव्यम्.

कलिः—कुतः?

द्वापरः—श्रूयताम्–

प्रलोभेन भयेनापि कृच्छ्रेण हननेन वा ।
पतिव्रतानां सुदृशां प्रकृतिर्न विचाल्यते ॥ ९ ॥

क–(सक्रोधं) हताश! किमेवमपशकुनं ब्रवीषि ? (सकोपोद्रेकम्)

पपपपपरमाप्तीभूय मे वक्षि भद्रम्
किकिकिकिकिमपि द्राग्भाषसे चाप्यभद्रम् ।

दुदुदुदुदुदुदुष्टैः प्रेषितोऽभूरतस्त्वं
ककककककदलीवद्धूयसे क्षक्षणेन॥ ६ ॥

(इति खड्गमाकृष्य हन्तुमिच्छति.)

द्वा-(तत्करं गृह्णन् सभयमात्मगतम्) असमीक्ष्यकारी हनिष्यत्येवायम्, किमिदानीं करणीयम्? (विचिन्त्य) भवत्वेवं तावत्. (प्रकाशं) सखे! गृहाणेमान् महाप्रभावान् चतुरश्शारान्. त्वत्साहाय्यकरणाय समागतं मां किमेवमन्यथा सम्भावयसे?

क—(शारान् गृहीत्वा सपरितोषं) सखे! कुतस्त्याश्शाराः? कीदृशस्तत्प्रभावश्च?

द्वा—(साश्वासम्) श्रूयताम्—भगवता मारेण मारिते शम्बरे तदस्थिखण्डैः मायाविना मयेनैव विनिर्मिताः. तेन च कस्याश्चित् कपटप्रौढिपरीक्षायां प्राथमिकोत्तीर्णाय मह्यं पारितोषिकतया वितीर्णाः.

प्रयुङ्क्ते यइमान् शारान् स मूढोपि जनस्स्वयम्।
सुखेन कितवान् सर्वान् जयत्येव न जीयते ॥ ७ ॥

तदेतान् पुष्करं प्रापय. स ते वशीकरिष्यति तां रूपगर्विताम्.

कलिः—(सप्रमोदं) युज्यते तदेतत्सर्वं. सखे! प्राणसमोसि. मर्षय मदपराधम्. (सावष्टम्भमुच्चैः) कः कोत्र भोः?

(प्रविश्य पुरुषः) [1] आज्ञापयतु स्वामी.

क—दुर्मते! पुष्करं द्रष्टुमिच्छामि.

---

[1] आणवेदु सामी.

दुर्मतिः—[1]प्रभविष्णो! स मन्मुखेन भवदाज्ञप्तः ह्यएव नलनिग्रहार्थं निषधानभिप्रस्थितः.

क—(विचिन्त्य). भवतु त्वरितं गत्वा इमान् शारान् नलदर्शनादर्वागेव पुष्करं प्रापय्य मदागमनपर्यन्तं तमेवानुपालयन् वर्तस्व.

दु—[2]यदाज्ञापयति देवः (इति सपाशको निष्क्रान्तः).

द्वा—तर्हि त्वामिदानीं क्व प्रस्थितोऽसि?

क—वयं तु मत्प्रियसुहृदं कर्कोटकं, व्याधयूथाधिपं दुर्गसेनं, वणिक्प्रवरं कामदासं, प्राड्विवाकं शठमतिं व्यवहारनिवेदकं चण्डवर्माणं, अन्यांश्च मत्पक्षीयान्, स्वयं प्रोत्साह्य प्रकृतकार्यसाधनाय प्रयतिष्यामहे. त्वया च मत्सन्निहितेनैव भवितव्यम्.

द्वा-युक्तमिदमनुमन्यामहे च वयम्. (ऊर्द्ध्वमालोक्य सानुतापमात्मगतं) अये! शारप्रदानामिदं मुग्धहरिणीं बाधितुं क्रूरकर्मणे व्याधाय वागुरार्पणमिवासीत्. किं करोम्यतीते कार्ये? भवतु तदिमामस्य सर्वां प्रवृत्तिं महेन्द्राय निवेदयामि. स एव किञ्चित्प्रतिकरिष्यति. अथवा—

यत्र सत्यञ्च शीलञ्च यत्र पूता सरस्वती ।
स परैर्हन्यमानोपि जयत्येव न जीयते ॥८॥

(इति परिक्रम्य निष्क्रान्तौ) मिश्रविष्कम्भः.

---

[1] पहविण्हु सो मम्मुहेण भवदा आणत्तो हिओ एव्व नळनिग्गहत्थं निसधा अहिप्पत्थिदो.

[2] जं आणवेदि देव्वो·

(ततः प्रविशति पुष्करः)

पुष्करः—(सानन्दं सावष्टम्भश्च)

कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे ।
एति,जीवन्तमानन्दो नरं वर्षशतादपि ॥

अहो! अनुकूलस्य विधेः प्रसादोन्मुखता, अहो! पुरुषकारस्य-माहिमातिशयः, यत्प्रकृतकार्ये यत्र स्वारसिकी मे प्रवृत्तिस्तत्रैव कले-स्स्वयमागत्य प्रबोधनं इदंशारप्रेषणश्च सर्वथा सान्निहितं मे मनोरथ-फलमिति सम्भावयामि.

(सानुस्मरणं सौत्सुक्यश्च)

सा सुन्दरी त्रिभुवनैकमनोज्ञमूर्ति-
स्तस्याः कटाक्षविशिखैस्सकृदाहतोस्मि ।
तस्माद्धृदि व्रणमभूदचिकित्स्यमन्यैः
आर्द्रं तदद्य तु तयैव चिकित्सयामि ॥ ९ ॥

अहो दैववशात्संसिद्धान्येव समग्राण्युपकरणानीति सम्प्रति नलं प्रति निश्शङ्का मे प्रवृत्तिः. अतः—

युद्धैरन्यदुरासदो नल इति ख्यातिस्तथैवैधताम्
अक्षैरेव विजित्य तं सदयितं प्रच्याव्य राज्यात्स्वकात् ।
निस्स्वौ तौ विघटय्य भर्तृविरहादेकाकिनीं तां प्रियां
तैस्तैश्चाटुशतैः प्रलोभ्य वशयन्भोक्ष्यामि मोक्ष्यामि किम् ॥१०॥

(पुरोवलोक्य) इदं तद्राजमन्दिरं यावत्प्रविशामि. (पार्श्वतोऽवलोक्य) कोयं गभीराकारः पुरुषः त्वरितमितोमुखः समुपैति.

पुरुषः—(प्रविश्य प्रणम्य) देव! भवत्प्रेषितदुर्मतिनामकचारमुखादाकर्णितभवदागमनवृत्तान्तः सः नो देवः भवन्तं सत्कृत्य समानेतुं मामादिक्षत्.

पुष्करः—प्रियं नः, तत्रभवान् अत्र कस्मिन्नधिकारे नियुक्तः? किंनामधेयश्च?

पुरु—देव! अयमहमष्टमोऽमात्यो मतिसेनः.

पुष्करः—(सादरं) आर्य मतिसेन! प्रत्यभिवन्द्यसे. इदानीं किमाचारस्सः श्रीमान्.

मतिसेनः—देव! कुतोपि कारणाद्विमनायमानो महाराजनैषधो मनोविनोदनाय मुख्यामात्येन प्रज्ञाशेखरेण सह सल्लपन् मितपरिवारः चन्द्रशालामध्यास्ते.

पुष्करः—भवतु तत्रैव गच्छामि, चन्द्रशालामार्गमादर्शय.

मति—इत इतो देवः. (पुष्करः परिक्रामति)

(ततः प्रविशति यथानिर्दिष्टो नलः)

नलः–(वैक्लब्यं नाटयन्) आर्य! अमात्यप्रज्ञाशेखर! केन चिद्वैमनस्येन पीड्यमानं मे मनो न किञ्चिदधिगच्छति भवदुपदेशम्.

अमात्यः—देव! कथमिदं सर्वतस्सम्पूर्णे त्वयि अनिमित्तं खलु वैमनस्यस्य. पश्य—

श्लाघन्ते पृथिवीभुजः प्रतिदिशं सौराज्यहृष्टाः प्रजाः
पत्नी प्राप्तपतिव्रताग्रिमपदा श्लाघ्यश्च पुत्रोदयः ।
कान्तं रूपमिदं मतिर्धृतिमती प्रौढं वयो यौवनं
साम्राज्यश्रियमेत्य भासि सुगुणैः भूमण्डलाखण्डलः ॥११॥

तदीदृशस्य ते वैमनस्यकारणं न किञ्चित्पश्यामि.

नलः—युक्तमुक्तमार्येण. तथापि श्रूयताम्, दुस्स्वप्नदूयमानमानसेन मया एवमभिहितम्.

अमात्यः—कीदृशो दुस्स्वप्नः ?

नलः—ह्यः खलु रात्रेस्तुरीये यामे निद्रामुद्रितकलेबरोहमभवम्. तदानीन्तु—

पुरुषेण करालमूर्तिना
गिरिकूटादहमेष पातितः ।
उपगम्य भुवि प्रलोठितः
तमथो वीक्ष्य भयादजागरम् ॥ १२ ॥

अमात्यः—दुष्ट एवायं स्वप्नः.

न—कीदृशं वा दुष्फलमनुभावयेदयम् ?

अमात्यः—न किञ्चिदपि.

राजा—कथमिव ?

अमात्यः—विज्ञापयामि. अप्यस्य वृत्तस्य श्रुतार्था देवी?

रा—अथ किम्.

अ—तत एव सा स्वयं सन्निधाय ब्राह्मणमुखेन शतरुद्रीयशान्तिहोममन्त्रजपादिकं कारयन्ती स्वहस्तापचितैः बिल्वैः भगवन्तं मृत्युञ्जयं अर्चयन्ती च भवतो मङ्गलमाशासाना तिष्ठति.

रा—अभिज्ञा सा. पतिप्रणयिनी च.

अ—अतो अकिञ्चित्कर एष स्वप्नः.

रा—युज्यते.

अ—अपरञ्च.

लोकेस्मिन् शकुनस्वप्नप्रश्नोपश्रुतयस्स्वयम् ।
कचित्कचित्फलन्ति द्राक् न फलन्ति कचित्कचित् ॥१३॥

राजा—इदमपि युक्तमेव.

अमात्यः—तन्निरर्थकं वैमनस्यं परित्यज्य लोकहितार्थं स्वस्थेन चित्तेन प्रवर्ततां देवः.

रा—इमे वयं नवीकृतास्स्मः. (नेपथ्याभिमुखमवलोक्य) कः कोत्र भोः ?

(प्रविश्य द्वारपालः) [1] आज्ञापयतु देवः.

रा—अये सदाचार ! मद्दर्शनाकाङ्क्षी कस्तिष्ठति द्वारदेशे ?

सदाचारः–[2]देव ! एष पुष्करो राजा देवपादमूलोपसेवनार्थं समयं निरीक्षमाणः तिष्ठति.

रा—त्वरितं प्रवेशय.

सदा–(तथेति निष्क्रान्तः).

---

[1] आणावेदु देव्वो.

[2] देव्व एसो पुक्खरो राआ देव्वपाउमूलोवसेव्वणत्थं समअं निरिक्खन्तो चिट्ठइ.

(प्रविश्य पुष्करः साञ्जलिबन्धम्.)

विजयतां विजयतां महाराजः.

रा—(सप्रणयम्) एह्येहि वत्स! स्थीयतामासने.

पुष्करः—(सविनयमुपविशति).

रा—अपि कुशलं सहपरिवारस्य भवतः?

पुष्क—देवपादप्रसादात्.

रा—चिराद्दृष्टोसि, किमेवं परिम्लानइव लक्ष्यसे?

पुष्क–देव! श्रूयताम् पुरा कुण्डिननगरमासाद्य यदा प्रतिनिवृत्तोस्मि, तदादि केनापि हृदयशूलेन पीडितोहं एवं कृशीभूतोस्मि.

रा–तर्हि चिकित्स्यताम् महाभिषग्भिः.

पुष्क–चिकित्स्यमानो वर्ते.

राजा—तर्हि तादृशस्य ते दूरात्किमिदमतर्कितमागमनम्?

पुष्क—देव! श्रूयताम्—

अरोगता गाढमपेक्ष्यते चे-
देकत्र मास्वेति भिषग्भिरुक्तः।
देशेषु देशेषु चरन् क्रमेण
देवस्य पादाब्जसमीपमापम् ॥१४॥

तदितःपरं मे सर्वमनुकूलमेव भविष्यतीति मन्ये.

राजा—तथास्तु.

पुष्क—(स्वर्णभस्त्रिकातः शारानादाय) देव! परिगृह्यन्तामिमे चत्वारश्शाराः.

रा—(दृष्ट्वा) अहो! रमणीयतराः बहुमूल्याश्च त एते. कुतस्त्याः?

पुष्क—एते तावदस्मत्कुलकूटस्थेन वनायुषा राज्ञा प्रयोज्यमाना अवर्तन्त.

रा—(सश्लाघम्) अहो! तत्रभवता वनायुषा परिगृहीता इति बहुमन्तव्यमेवैतत्. ममापि स एव कुलकूटस्थः. श्रूयताम्—

देवस्य तत्रभवत श्शिवशेखरस्य
वंशेऽजनि त्रिभुवनप्रथितो वनायुः।
तस्यात्मजात् मम धृतेः तव तु प्रधर्षात्
द्वेधा क्रमात्प्रवहति स्म कुलप्रवाहः ॥१८॥

तद्बहुपुरुषान्तरितस्त्वं मे गोत्रेण ज्ञातिरसि मासावरश्च.

अमा—अहो! पूर्वोत्तरचरित्राभिज्ञता देवस्य.

रा—ततस्ततः—

पुष्क—त एते तत्परिगृहीता इति गौरवेण अस्मत्कुलमहत्तरैः वंशपरम्परया परिरक्ष्यमाणाः क्रमेण मद्वशं गताः. मम अक्षविद्याविशेषानभिज्ञतया निरर्थकाश्च संवृत्ताः. तदद्याहमेतान् अक्षशिक्षाविचक्षणं मद्वंशजं भवन्तमेव प्रापयम्.

राजा—अहमप्यश्वहृदयवत् नाक्षहृदयमखिलं जानामि. जिज्ञासा परं वर्तते. गुरुस्तु न लब्धः.

अमात्यः—तदपि सम्भवेदेव देवताप्रसादात्.

पुष्करः—तदेते स्वीक्रियन्ताम्.

रा–(सादरं कराभ्यां गृहीत्वा सभक्तिप्रकर्षं ललाटे नेत्रयोश्च स्पर्शयन्) सुदिनमिदं सञ्जातम्.

पुष्क–अहञ्च कृतार्थोऽस्मि.

रा–(सकौतुकम्) वत्स पुष्कर! अक्षानानयिष्यामि. आवामद्यैव एतैश्शारैः विहराव.

पुष्क–(कर्णौ पिधाय) शान्तं पापम् शान्तं पापम्.

रा–(विहसन्) किमेतत् तादृशं पातकम्?

पुष्क–नहि नहि.

अमात्यः–देव! भवद्गौरवेण भवता समं क्रीडितुं लज्जतेऽत्रभवानिति मन्ये.

पुष्क—नहि नहि.

रा–तर्हि किमन्यत्?

पुष्क—अनर्थकारि द्यूतं खल्वेतत्? श्रूयताम्. अत्र व्यवहारिणां तावत्—

श्राव्यं दुर्वचनं प्रयोज्यमनृतं कार्यं महत्कैतवम्
न स्नाने न च भोजने न शयने नालङ्कृतौ वा रुचिः।
देहश्शुष्यति नाश्यते धनचयः कार्यक्रमो बाध्यते
कालोऽत्येति वृथैव यत्र तदिदं द्यूतं निगूढो रिपुः ॥१६॥

अमा–सत्यमभिहितम्.

रा–(साक्षेपं) निरन्तरद्यूतव्यवसायिनां केषाञ्चित्प्राकृतानामेवं स्यात्. न तु सर्वेषाम्.

पुष्क–(सभयं) बाढं ममापि स एवाभिप्रायः.

रा–तर्हि परिक्रीडस्व. वंशेन वयसा च समानोसि मे. अपरञ्च अयमहमद्य केन चिन्निमित्तेन विमनायमानो वर्ते. तत्कञ्चित्कालमक्षैर्मनो विनोदयेयम्.

पुष्क–एवञ्चेदवश्यं सन्नद्धोस्मि.

रा–(नेपथ्याभिमुखमवलोक्य) कः कोत्रभोः! समानीयतामक्षपेटिका.

(प्रविश्य पुरुषः अक्षपेटिकां निधाय शारिफले अक्षान्प्रसार्य निष्क्रान्तः.)

रा–शारान् विकिरति.

पुष्क–(साञ्जलिबन्धम्) देव! किञ्चिद्विज्ञापयामि.

रा–निर्भयमभिधीयताम्.

पुष्करः—

पणेन रहितं द्यूतं जलेन रहिता कृषिः ।
शस्त्रेण रहितं युद्धं त्रयमेतन्न शोभते ॥ १७ ॥

राजा—न्याय्यमेवैतत्. तर्हि कस्तवाद्य पणः?

पुष्क–इमे कण्ठगता हाराः.

रा–ममापि तथैव.

अमात्यः–देव! मनोविनोदनाय प्रवृत्ते द्यूते किमिदं पणकल्पनम्? नानुमन्यामहे वयम्.

रा–न निवर्तामहे वयम्.

अ–(आत्मगतम्) किमिदमद्य नूतनइवाधिक्षिप्तोस्मि? अहो! दैव गतिः; (इति तूष्णीं तिष्ठति.) (उभौ क्रीडतः.)

पुष्क–अहो! जितं जितं महाराजेन. (स्वकण्ठादपसार्य हारानर्पयति.)

रा—(हसन्) अपरः पणः क्रियताम्.

पुष्क–(स्वगतम्) पुनरपि किञ्चित्प्रत्याशां जनयामि. (प्रकाशं) क्षत्रियोस्मि नापसरामि. ग्लहीकृतमिदं प्रकोष्टगतममूल्यं कटकद्वयम्.

रा–ममापि तथैव. (उभौ क्रीडतः)

पुष्क–अहो! जितं जितं महाराजेन. (स्वबाहुभ्यामपकृष्य कटके समर्पयति.)

रा–(हसन्) किमपरोपि पणः क्रियते?

पुष्क–(सकोपं) कस्सन्देहः? मद्गृहे राज्ये च यानि यानि रथतुरगगजादीनि मणिकनकाम्बरादीनि च चराणि वस्तूनि, तानि सर्वाणि पणीकृतानि.

रा–ममापि तथैव.

अ–देव! कर्तव्यमनालोच्य न कर्तव्यं खलु?

रा–आलोच्यैव कृतम्. (उभौ क्रीडतः.)

रा–अहह! जितं पुष्करेण राज्ञा. (सवैलक्ष्यं) त्यक्तान्येव मया सर्वाणि चराणि वस्तूनि.

पुष्क–अहो सत्यसन्धता महाराजस्य. (स्वगतम्) इदानीं तन्महाराजपदमपहरामि. (प्रकाशम्) अथ अपरः पणः क्रियताम्. क्षत्रियोहं युद्धाद्वा द्यूताद्वा न निवर्तेय.

रा–(स्वगतम्) एवमाहूतेन मया किं कर्तव्यमिदानीम्? (ध्यानमभिनीय) किमिदं न किञ्चित्प्रतिभाति. भवत्वेवं तावत्. (प्रकाशम्)भवतैव पणः क्रियताम्.

पुष्क–मदधिकारवशंवदां सकलां महीं पणीकरोमि.

रा–ममापि तथैव.

अमात्यः–देव! किमेवमजानान इव मुह्यसि? अपरः पणः क्रियताम्.

राजा–(सकोपं) कोयं निर्बन्धः? यद्भावि तद्भवतु. मुखान्निर्गतं वचनं नान्यथयेयम्.

पुष्करः–साधु समर्थितं महाराजेन. प्रोच्यते खलु प्राचीनैः—

उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुश्शीततां याति वह्निः।
विकसति यदि पद्मं पर्वताग्रे शिलायाम्
न भवति पुनरुक्तं भाषितं सज्जनानाम् ॥ इति.

अ–अयमेवं प्रोत्साहयति. महाराजस्तु मद्वचनमधिक्षिपति. अयन्तु कोपि विपरीतः कालः. वयमत्रस्थिता अपि न स्थिता एव.

(इति तूष्णीं तिष्ठति.)

रा–अहह! जितं पुष्करेण राज्ञा. (सधैर्यम्)

मया सत्यवशेनाद्य त्यक्ता सागरमेखला।
सह साम्राज्यसम्पत्त्या पुष्करं प्राप्य मोदताम् ॥ १८ ॥

पुष्क–साधु राजन्ननुमन्यामहेतराम्. अथापरोपि पणः क्रियताम्.

रा–त्वयैव क्रियताम्.

पुष्क—(सहर्षमात्मगतम्)अद्य तामङ्कमारोपयितुमवकाशः प्राप्तः. (प्रकाशम्)मया तावत्सकलान्तःपुरपरिवारपरीता देवी पणीक्रियते.

रा—ममापि (इत्यर्धोक्ते)

अ—(त्वरितं हस्तमुद्यम्य) राजन् ! मा त्वरस्व. सहसा कृतं कर्म दुष्परिणतं स्यात्.

प्रोच्यते च प्राचीनैः—

सहसा विदधीत न क्रिया-
मविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं
गुणलुब्धाः स्वतएव सम्पदः ॥ इति.

अन्यच्च—'देयं दारसुतात् ऋते' इति शास्त्रमनुरुध्य अन्यः पणः क्रियताम्.

रा—आं युज्यते, किमन्यत्करवाणि ?

पुष्क–(सवैक्लब्यमात्मगतम्) अयममात्यहतकस्स्वयमन्तरायः संवृत्तः.

(प्रविश्य पटाक्षेपेण प्रतिहारिणी)

[1]देव ! देवी विज्ञापयति, पौरा जानपदाश्च समवेत्य देवं द्यूतान्निवर्तयितुं प्रार्थयन्त इति.

[1] देव्व ! देई विण्णावेदि पोरा जाणपआअ समवेइअ देव्वं जूदादो णिवट्टेदुं पत्थआंदत्ति.

राजा–अये अतिक्रान्तस्स कालः. किमद्य साध्यम्?

(विचिन्त्य सकोपम्).

अयि! उच्यतां, देवी वा द्विष्यो वा भवतु, यो मे जनः प्रतिषिध्यति द्यूतं, स हन्तव्यस्स्यादिति.

प्रतीहारी–(सभयं निष्क्रान्ता.)

रा–(स्वगतं) कथं प्रतिपणं विचिन्तयतोपि मे न किञ्चित्प्रतिभाति. भवत्वेवं तावत्. (प्रकाशम्) आत्मा पणीकृतः.

पुष्क–इदमपि मदनुकूलमेव. (उभौ विहरतः.)

रा–अहो जितं जितं महाराजपुष्करेण. इमे वयं दासीकृताःस्मः?

पुष्क–कस्सन्देहः?

रा–पुनरपि सकृदन्येन पणेन क्रीडाव.

पुष्क–दासेन त्वया क्रीडितुं नोत्सहामहे. तथापि यदि देवीं पणीकरोषि, तदा सर्वं राज्यं मे पणीकृत्य क्रीडामि.

रा–नेदमद्य सङ्घटते.

पुष्क–तर्हि निर्गम्यतां वनाय.

रा–यथाज्ञापयति स्वामी.

(प्रविश्य पटाक्षेपेण सेनापतिः).

सेनापतिः–(पुष्करं प्रति) देव! भवदन्वेषिणस्सैनिकास्समुपेत्य बहिस्तिष्ठन्ति.

पुष्क–(सहर्षं) साधु सेनापते! साधु. संरुध्यतां सर्वैः पुरम्.

रा—अलं पुरसंरोधेन. अयमहं प्रस्थित एव वनाय.

पुष्क—नान्या गतिः.

रा—(वस्त्रेण मुखमाच्छाद्य तिष्ठति.)

पुष्क—भद्र सेनापते! इमां द्यूतसामग्रीमाभरणानि च कोशगृहं नीत्वा विदितार्थाः क्रियन्ताम् प्रजाः. यथा द्यूतेन नलं निर्जित्य महाराजा पुष्करः स्वयमिदानीं साधु प्रजापालनोन्मुखस्संवृत्त इति.

रा—(प्रज्ञाशेखरं प्रति) अमात्य! त्वयापि एवमेवोद्घोष्यताम्.

सेनापतिः—यदाज्ञापयति देवः. (इति सर्वां सामग्रीं समादाय निष्क्रान्तः).

पुष्क—अयि प्रज्ञाशेखर! त्वमेवैनं नलं द्राक् निर्वासय. वयन्तु प्रकृतीनामवस्थापनाय प्रयतामहे. (इति निष्क्रान्तः.)

रा—(दीर्घं निश्वस्य) सखे प्रज्ञाशेखर! अतर्कितोपनतः एष वज्रनिर्घोषः. मयैव प्रमाद्य नाशिते सर्वस्वे किम् भुजाभ्यां? किम् प्रज्ञावैभवेन वा? कथं दृश्या देवी? कथं दृश्याः पौराः? किमितो निहितैः प्राणैः?

अमात्यः—भवितव्यतेयमीदृशी. बुद्धिः कर्मानुसारिणी च. देव! तदद्य वैक्लब्यमनासाद्य विपदि धैर्यमिति नीतिमवलम्बस्व.

रा—इदं वैशसं श्रुत्वा देवी कीदृगवस्था सम्पद्येत?

उक्तमेव खलु प्राचीनैः—

"पुरन्ध्रीणां चेतः कुसुमसुकुमारं हि भवति." इति. तदद्य देवी यथा प्राणैः प्रज्ञया वा न वियुज्यते तथा श्रावयन्निदं आनय ताम्.

अमात्यः—यथाज्ञापयति देवः (इति निष्क्रान्तः.)

रा—अहो ! विधेर्वैपरीत्यम्. उक्तं च प्राक्—

अघटितघटनं घटयाति
घटितंघटितञ्च दुर्घटीकुरुते ।
विधिरेव तानि घटयाति
यानि पुमान्नैव चिन्तयति ॥

(ततः प्रविशति दुकूलाञ्चलेन मुखमाच्छाद्य रुदती ससुता सहामात्या च देवी).

देवी—(दीर्घमुष्णञ्च निश्वस्य) अहो! आर्यपुत्रस्यापीदृशी समवस्थेति सर्वथा फलितं मे भाग्यविपर्ययेण.

राजा—(दृष्ट्वा) देवि !

विलासाय कृतं द्यूतं विनाशायाभवत्स्वयम् ।

देवी—दाहशान्त्यै विषे पीते देहशान्तिर्भवेन्न किम् ॥ १९ ॥

तदा तथाविहरन्नार्यपुत्रः पौरैर्जानपदैर्मया च तथातथा विज्ञप्तोपि प्रसादं नैवाकरोत्.

रा—देवि! शपामि मद्धर्मोपरि. श्रूयताम्, तदा तथा विहरन्नहम् भूताविष्टइव किमपि नैवाज्ञासिषम्.

देवी—तर्हि ज्ञात्वापि किमिदानीं करणीयं स्यात् ?

रा—उक्तमेव किल प्राचीनैः—

"परिम्लाने माने मरणमथवा दूरगमनम्." इति.

देवी–(सभयम्) आर्यपुत्र! नश्यतु सर्वस्वम्. प्राणान्परम् मा विनाशय.

रा—तर्ह्यनुजानीहि मां वनगमनाय.

देवी—अहमप्यनुयास्यामि.

रा—कथं त्वया सह गन्तव्यं स्यात्?

देवी—कुतः?

रा—मुग्धे! न जानासि वनवासदोषान्. श्रूयताम्—

पदाभ्यां सञ्चारस्तपनकरतप्ते पथि सदा
दिनस्यान्ते भागे भवति फलमूलैः कदशनम्।
तरोर्मूले वासस्तदनु शयनीयं च दृषदी
अहो कष्टं कष्टं वनमहिमृगाक्रान्तमनिशम् ॥२०॥

देवी—आर्यपुत्र! ईदृशं कष्टं वने तवापि सिद्धमेवेति कथमेकाकी त्वं गमिष्यसि? कस्त्वामुपचरेत्? अतोऽहमुपचरन्ती त्वामनुयास्याम्येव.

रा—देवि! तव सर्वस्वविनाशिनं राज्यात्परिभ्रष्टं निस्स्वं निष्करुणं निष्ठुरमस्पृश्यं च मां कथमनुरुध्यसे?

देवी—तर्हि श्रूयतामिदं स्मृतिवचनम्—

कुरूपो वा कुवृत्तो वा दुस्स्वभावोऽथवा पतिः।
रौद्रो वाथ दरिद्रो वा कदर्यः कुत्सितोऽपि वा ॥
सततं देववत्पूज्यस्साध्व्या वाक्कायमानसैः ॥ इति ॥

तदहमीदृगवस्थं त्वाममुञ्चन्ती परिचारिष्यामि.

रा—(विचिन्त्य) अस्तु तवानुगमनम्. मुग्धौ सुकुमाराविमौ कल्याणिनौ कथं नेयौ वनम्?

देवी-मातामहगृहं नयाव.

रा—साधूक्तं देव्या.

देवी—आर्यपुत्र! भवता च तथैव क्रियताम्.

रा—न युक्तं कष्टां दशां प्राप्तस्य बन्धुगृहगमनम्.

देवी—(पार्श्वतो दृष्ट्वा) आर्य प्रज्ञाशेखर! वार्ष्णेयं सूतं द्रष्टु-मिच्छामि.

वार्ष्णेयः—(प्रविश्य) अयमहमत्रैव स्थितोस्मि.

देवी–आर्य वार्ष्णेय! यदि न बिभेषि नूतनाद्राज्ञस्तर्हि किञ्चिदुप-क्रियताम्.

वार्ष्णेयः—प्राणैरप्युपकर्तास्मि.

देवी—तर्हि इमौ बालौ मदीयेन रथेन कुण्डिनं नीत्वा अत्रत्य-वृत्तमकथयन्नेव बन्धुभ्यो निवर्तस्व.

वार्ष्णेयः-यदाज्ञापयति देवी(इति सहबालः प्रस्थितः.)

देवी-(सवैक्लव्यम्) आर्य वार्ष्णेय! तिष्ठ तिष्ठ वत्सौ मे समालि-ङ्ग्य चरमेण सम्भाषणेन सम्भावयामि.

(तावालिङ्ग्य साश्रुपातं सगद्गदश्च) वत्से इन्द्रसेने! कथं ते ईदृशः परिणामः. अस्मद्दौर्भाग्यस्य फलं त्वयाप्यनुभाव्यमासीत्. तृणमिव दूरी-क्रियसे पितृभ्याम्. या त्वं क्षणमप्यपरित्यजन्ती मां पार्श्वयोः परिवर्तसे, सा कथं देशान्तरे मद्विरहिता स्थास्यसि? कुत्र भोक्ष्यसे? क्व वा! शयिष्यते? क्व नु वा स्नास्यसि? कथं वा भविष्यसि? हा हतास्मि मन्दभाग्या.

हा वत्स इन्द्रसेन! कथं त्वां परित्यज्य वर्तेय कठिनहृदयाहम्. त्वं च कथं मातृहीनश्चरिष्यसि दुग्धकण्ठः? स्वपन्तं तिष्ठन्तं क्रीडन्तं वापि भगवांस्त्वां परिरक्षतु. सर्वथा धैर्यमालम्ब्य वर्तस्व. इमाञ्च ते भगिनीं मा रोदय, मा खेदय, मा परुषं श्रावय, सुकुमारा खल्वियम्? कारणान्तरात्खिन्नां भीतां वा समनुनयन् छायेवानुवर्तस्व. स्वयं च वैक्लब्यमनासाद्य स्वबुद्ध्यैव जीवन् अप्रमादेन वर्तस्व. श्रूयतामिदम्—

एकाकी न बहिः प्रयाहि रजनीष्वामन्त्रितोप्यर्भकैः
वापीकूपनदीः गजाश्वशकटं क्रीडन् सुदूरे त्यज ।
भक्ष्यप्राप्तिहठैर्न खेदय मनस्सुप्तोत्थितस्त्वं शिशो
मा रोदीः पितरौ विचिन्त्य सकृदप्यम्बेति तातेति च ॥२१

रा—(सवैक्लब्यम्) हा हन्त दारुणोयं दशाविपरिणामः. हा वत्स इन्द्रसेन! किं ब्रवीमि ते दौर्भाग्यम्? सप्तमे वयस्येव निरस्तोसि, निर्धनोसि, निराश्रयोसि, किं करवाणि मन्दभाग्यः? (सकरुणं) हा वत्स इन्द्रसेन, कथमीदृशस्ते परिणामः?

को नु त्वामुपलालयन् प्ररुदितं प्रीत्याङ्कमारोपयेत्
को वा त्वां क्षुधितं विलोक्य सदयं सप्रार्थनं भोजयेत् ।
निद्रातङ्कनिमीलितं क्वचिदपि त्वां कस्सुखं शाययेत्
कष्टं कष्टमहो मया विरहितः कां वा दशामाप्नुयाः ॥२२॥

इदञ्च श्रूयताम्. दूरगतेनाप्यनुष्ठीयताञ्च.

विद्यायां सततं नियोजय मतिं प्राप्तो विनीतात्मताम्
लोके कीर्तिमुपार्जय स्वचरितैः दुस्सङ्गतिं दूरय ।
दैवात्कष्टदशां गतोपि हृदयात्सत्यं न विभ्रंशय
क्षान्तिश्चेतसि धीरताञ्च कलयन् कुत्रापि जीव्याश्चिरम्॥२३

(इति मुक्तकण्ठं रोदिति)

इन्द्रसेनः—[1] अम्ब ! युवाम् किमेवं किमपि किमपि मन्त्रयमाणौ रुदिथः ?

देवी—वत्स ! शृणु, कश्चित्प्रतिपक्षस्ते पितरं निर्जित्य सकलां महीं आत्मसादकरोत्.

इन्द्र—(साश्चर्यखेदं संस्कृतमाश्रित्य) अम्ब !

किमिदमभिदधासि क्षत्रियाणी त्वमेवं
विगतविमतभीतिर्वीरवर्यःपिता मे ।
अहह किमु तदानीं व्यस्मरच्छस्त्रशास्त्रं
किमुत सपदि बाहू निद्रितौ मुद्रितौ वा ॥ २४ ॥

[2] तदहमिदानीम् विपक्षपक्षमखिलमपक्षिपन् क्षणेन कचग्राहमाकृष्य स्वपक्षे निक्षिपामि राज्यलक्ष्मीम्.

राजा—(सश्लाघम्) साधु वत्स ! क्षत्रियोसि.

देवी—जात ! मैवं, शृणु, न खलु प्रतिपक्षस्ते तातं युद्धेन जितवान्.

---

[1] अंबे तुम्हे किं एव्वं किंवि किंवि मंतयमाणा रुएह.

[2] ता अहं दाणिं विवक्खपक्खं अहिळं अवक्खिवंतो खणेण कअग्गाहं आकरिसिअ सवक्खे णिक्खिवेमि रज्जलच्छि.

इन्द्रसेनः—[1]युक्तमेवेदं कस्तातमभियोद्धुमीष्टे? ततस्ततः.

देवी—स द्यूतेन विजित्य सकलां महीमात्मसादकरोत्.

इन्द्र—[2]ततः किं प्रतिपन्नं तातेन?

देवी—ततस्सत्यसन्धस्ते पिता प्रतिश्रुतार्थपालनार्थं वनाय प्रस्थास्यमानः क्वचित्प्रस्थापयति युवामिदानीम्.

इन्द्र—[3]अहमप्यागमिष्यामि वनाय.

देवी—न युक्तं ते वनगमनम्.

इन्द्र—[4]कुतः?

देवी—तत्र सन्ति भयङ्कराणि महान्ति भूतानि.

इन्द्र—[5]प्रभूतानि च सन्तु. फूत्कारमात्रेणैव पातयेयम्.

देवी—तथापि नानुज्ञातोसि पित्रा.

इन्द्र—[6]तेन हि शिरसा धृतस्तातादेशः. मास्तु मे वनगमनम्. मया सहैवागम्यतां त्वया.

देवी—अहमप्यनुज्ञातास्मि वनगमनाय.

इन्द्र—[7]किं तर्हि परित्यक्तोस्मि पितृभ्याम्.

---

1 जुत्तं एव्व एदं को तादं अहिओद्धुं ईसेदि. तदोतदो.

2 तदो किं पडिवण्णं तादेण.

3 अहं वि आअइस्सं वणस्स.

4 कुदो.

5 पहूदाइं सन्तु. फुक्कारमेत्तेण एव्व पाएमु.

6 तेण हि सिरयेण धओ तादादेसो. मा अत्थु मे वणगमणं. मए सह एव्व आगमीअदु तुए.

7 किं तरिहि परिचत्तोम्हि पिअरेहिं!

देवी–वत्स! मा विषीद. सत्यपालनाय प्रस्थिते पितरि त्वयापि तदाज्ञानुवर्तिना भवितव्यमेव खलु?

इन्द्र–[1] धर्म्यमिदम्. तर्हि कुत्र गतव्यमावाभ्यां बालकाभ्याम्?

देवी—मातामहौ मातुलौ च युवां द्रष्टुमुत्कण्ठेते.

इन्द्र–(सकौतुकम्) [2] तर्ह्यहं पूर्वं तत्र गमिष्यामि.

इन्द्रसेना–[3] अहं पूर्वं गमिष्यामि.

राजा–अहह अनयोः मुग्धालापान् शृण्वतो मेदह्यतइव हतहृदयम्.

इन्द्रसेनः–[4] अम्ब! प्रस्थितयोरावयोर्मार्गे आशितव्यं किञ्चिद्दीयताम्.

देवी–(सदैन्यं स्वगतम्) हा हतास्मि मन्दभाग्या. प्रस्थितयोर्वत्सयोः किमपि मार्गाशनं दातुमपि अशक्तास्मि. पराधीने विभवे किं करोमीदानीम्? भवत्वेवं तावत्. (प्रकाशम्) वत्स! मार्गे सन्ति तरुषु बहूनि मधुराण्याम्रफलानि खर्जूरफलानि च. नदीषु स्वादूनि पानीयानि च. किमद्य भारोद्वहनेन?

इन्द्रसेनः–(सकौतुकम्) [5] अम्ब! अनुकूलमेवेदम्, तर्हि तानि तानि भुञ्जानः तत्र तत्र पिबन् सुखेनैव यास्यामि.

---

[1] धम्मिरं इदं. तरिहि कह्नि गंदव्वं अम्हेहिं बाळएहिं.

[2] तारिहि अहं पुव्वं तह्न गमिस्सं.

[3] अहं पुव्वं तह्न गमिस्सं.

[4] अंबे पत्थिदाणं अम्हाणं मग्गे असिदव्वं किंचिअ दाइज्जदु.

[5] अंबे अणुऊळं एव्व इदं. तारिहि ताइताइ भुंजंतो तह्नतह्न पिब्भंतो सुहेण एव्व याहिस्सं.

देवी–(विचिन्त्य सभयम्) मा तरुमारोह. मा नदीमवतर. अयमार्यो वार्ष्णेयः स्वयमपाचित्य फलान्याहारिष्यति. आनीय जलानि पाययिष्यति च. (वार्ष्णेयं दृष्ट्वा सदैन्यं) आर्य वार्ष्णेय! सर्वथा त्वत्करे न्यस्तावेतौ बालकौ.

वार्ष्णेयः–देवि! मा खिद्यस्व. स्वयमेवेक्षे त्वद्बालकौ.

देवी–प्रियं मे.

वार्ष्णेयः–यदि समाज्ञा, तर्हि साधयामि.

देवी–शिवास्ते पन्थानस्सन्तु.

वार्ष्णेयः—(प्रणम्य दारकाभ्यां सह निष्क्रान्तः.)

देवी–(वातायनात्सुदूरमालोकयन्ती)हा! दर्शनपथमतीतौ मे पुत्रकौ. कथं तद्विरहिता धारयामि हतजीवितम्?मन्दीभवति मे दृष्टिः. शून्याइव दिशः. अन्धं तमः प्रविशतीव मे अन्तरात्मा. हा वत्सौ! कथं? गतौ स्थः? (इति मूर्छति)

राजा–(सहसोपसृत्य) देवि! समाश्वसिहि, समाश्वसिहि, (इति पटाञ्चलेन वीजयति.)

देवी–(शनैरुत्थाय) हा आर्यपुत्र! गलितो मे अङ्कालङ्कारः. कथं धारयामि जीवितम्?

रा–देवि! शोकावेगं निगृह्य किञ्चिन्मनस्समाधीयताम्. तवेव ममाप्यस्त्येव हृदयातङ्कः. कस्याग्रे निवेदयाव.

(उभौ मुखमाच्छाद्य अधोमुखं तिष्ठतः)

(ततः प्रविशन्ति पटाक्षेपेण पौरा जानपदाश्च.)

एकः–(प्रणम्य) देव! वनगमनसङ्कल्पान्निवर्तयितुं भवन्तं प्रार्थयन्ते प्रमुखाः प्रजाः.

राजा—कृतस्सङ्कल्पः.

अन्यः—देव! कञ्चित्कालमस्मद्गृहेषु स्वगृहेष्विव सुखं वर्तमान स्साधयिष्यसि साधयितव्यानि.

रा—नोचिता प्रतिपक्षजिते देशे स्थितिरस्माकम्.

इतरः—कपटद्यूतेन जितं देशं धर्मयुद्धेन विजयतां देवः.

रा—आर्तत्राणमन्तरा स्वलाभाय युद्धकल्पनमराजधर्मः.

परः—देव! तर्हि वयमप्यनुयास्यामो देवपादमूलम्.

रा—सर्वान् आश्रितान् पोष्यांश्च बन्धून्निरस्यैकानुसरणं संसारिणां न धर्म्यः पन्थाः.

अपरः—देव! तर्हि का वा गतिरस्माकम्.

राजा—पुष्करो राजा अनुवर्तनीयः.

सर्वे पौराः—देवपादमूलं विहायान्यत्र स्थातुं न शक्नुमः.

रा—न युक्तमिदम्. यश्च धर्मासनमधितिष्ठति स एव युष्माभिरस्माभिश्च सर्वस्वमिति सम्भावनीयः.

उक्तश्च प्राचीनैः—

राजा सत्यञ्च धर्मश्च राजा कुलवतां कुलम् ।
राजा माता पिता चैव राजा हितकरो नृणाम् ॥ इति ॥

पौराः—सत्यमेवेदम्. तथापि देवपादमूलमेवोपधावत्यस्माकं भक्तिः.

राजा—एवं प्रजानुरागेण सम्भावितोस्मि. तमेतमनुरागमितःपरं पुष्करे राज्ञि निक्षिपत. निवर्तयत मनांसि गृहगमनाय. (सर्वे वैक्लव्यं नाटयन्ति.) नेपथ्ये—

> मुच्यन्तां ते सपदि नृपतेर्बन्धनस्था ऋणस्थाः
> कस्यापि स्यान्मनसि न भयं पाल्यतेऽस्माभिरेवम् ।
> अद्य स्वैरं विहरतु जनो राजविद्रोहकारी
> सद्यश्छेद्यो भवतु स परं यो नलस्योपकारी ॥२९॥

(श्रुत्वा सर्वे भयसम्भ्रमं नाटयन्ति.)

राजा—अहह! किमेवमुद्घोष्यते राज्ञा? किमर्थं वा निर्बध्यन्ते प्रजाः? अहो क्षिप्रकारिता पुष्करस्य! निरुपपदं मन्नामग्रहणमपि. किमपकृतं मया?

अमात्यः—देव! स लब्धस्थिरीकरणायैवमुद्घोषयति. त्वयि स्थिते तच्च न सम्भवेदिति प्रातिकूल्यमेवाचरतीति मन्ये.

राजा—सत्यमेवमेव. (विचिन्त्य) आर्य! एवं स्थिते क्षणमपि वा किमर्थमत्र स्थेयं मया? किमर्थं वा तस्य हृदयातङ्कः कार्यः? तदद्यैव प्रस्थास्ये वनम्. त्वमपि राजानमनुवर्तस्व.

अमात्यः—(सगद्गदं) राजन्नहन्तु भवन्तमुपसेव्य नान्यत्र वस्तुमुत्सहे. तदहमपि वनगमनाय सर्वं सज्जीकरोमि. (इति रुदन्निष्क्रान्तः.)

राजा—(निश्वस्य किमपि ध्यायन् तिष्ठति.)

पौराः—(परस्परं जनान्तिकम्) अहो! उद्घोषणश्रवणानुपदमेव भीत्वा निर्गतोऽमात्यः. किमुत वयम्. तीक्ष्णदण्डोयं नूतनो राजेति ज्ञायते. तदद्य किं करवाम?

एतावदेतेन महात्मनैव
सम्पालितास्स्मः सुतनिर्विशेषम्।
घोरे प्रवृत्ते विषमेऽद्य भारान्
पुत्रेषु निक्षिप्य वनं व्रजाम ॥२६॥

(इति प्रणम्य निष्क्रान्ताः.)

राजा—(दीर्घं निश्वस्य ऊर्ध्वमवलोक्य देवीं प्रति) देवि! पश्याद्य अह्नः तृतीयो यामः परिवर्तते. त्वं च क्षुधया तृषया व्यथया च परिपीड्यमाना वर्तसे. तदद्य कस्य चिद्गृहमेधिनो गृहादन्नमानीय भवतीं भोजयितुमिच्छामि.

देवी—आर्यपुत्र! श्रूयतां अद्यैवोद्घोषितं खलु राज्ञा? 'सद्यश्छेद्यो भवतु स परं यो नलस्योपकारी' इति. तदस्मत्कृतेऽन्नदानेन कस्यापि बाधा मा भूत्. ईदृगवस्थैव निर्गमिष्यामि.

राजा—(सवैक्लब्यम्) कथमीदृगवस्थां त्वां वनं नेष्यामि?

देवी—हताशां मां प्रति मा विषीद. त्वमपि चक्रवार्तितामनुभूय कथमेवं क्षुधया पीड्यमान एव निर्गमिष्यसीति दह्यते मे हृदयम्.

राजा—(दीर्घं उष्णं च निश्वस्य) देवि! किं करवाणि? अहो! कालवैपरीत्यं. हा धिङ्मां, योऽहमस्यामवस्थायामन्नदातारमपि न

लभेय. एवं किल स्वपदच्च्युताः अधिकारिणः मृतप्रायाः भवन्ति ? एवं परिणते मद्दशाविपर्यये किं करोतु स महात्मा पुष्करः अन्यो वा ? स्वयंकृतः अपराध एषः, यदमात्यप्रज्ञाशेखरेण मुहुर्मुहुः प्रतिषिध्यमानोपि मुग्धइव, विकलइव, शून्यइव, प्रमत्तइव, उन्मत्तइव, ग्रहग्रस्त इव च, किमप्यजानन् अकार्यं कर्म कुर्वाणः सदृशं फलमनुभावितोस्मि दैवेन. हा बन्धवः, हा सखायः, हा पुरजनाः, हा परिजनाः, हा विभवाः, सर्वान् वो विसृजामि, न स्मरणीयोस्मि नृशंसः. हा देव सकलसाक्षिन् !

दुष्करवनवासमिमां
  पुष्करपादां प्रबोधयन् यामि ।
पुष्करराज इदानीं
  निष्कण्टक वैभवेन सुखितस्स्यात् ॥२७॥

(इति परिक्रम्य निष्क्रान्तौ.)

इति भैमीपरिणये पञ्चमोङ्कः.

ओं तत्सत्.

अथ षष्ठोऽङ्कः

(ततः प्रविशति राजा दमयन्ती च.)

राजा—(सविमर्शं सश्लाघञ्च) देवि! पश्य सर्वथा प्रतिकूलोऽपि मे विधिः आनुकूल्यमेव सम्पादितवानिति मन्ये.

देवी—(साश्चर्यम्) कथमिव?

राजा—श्रूयताम्—

निर्गच्छेति वनाय गर्जति रिपौ नष्टेऽखिले वैभवे
युद्धाय प्रतिचोदयत्सु परितः पौरेषु वीरेषु च ।
अस्पृष्ट्वा धनुरस्मरन् भुजयुगं सद्यो वनाय व्रजन्
यत्सत्यादपरिच्युतोऽस्मि परमो लाभोऽयमासीन्मम ॥ १ ॥

देवी–(सश्लाघम्) युक्तं युक्तं लोके सत्यवीराणां भवादृशामेवमेव. यदार्यपुत्र (इत्यर्धोक्ते.)

राजा—(सलज्जम्) देवि! अलमलमनया कथया. बहुमुखभयसङ्कुले अस्मिन् वनपथे स्वयमप्रमाद्यन्ती पुरतो व्रज.

देवी—(सविनयम्) यथाज्ञापयत्यार्यपुत्रः (इति मन्दं विसंस्थुलञ्च परिक्रामति.)

राजा—(देवीं दृष्ट्वा सदैन्यं सपरितापञ्च.)

खिन्नासि देवि पनवर्त्मनि सञ्चरन्ती
कन्दादिना कदशनेन कदर्थितासि ।

शीतातपादिजनितानि बहूनि घोर-
कृच्छ्राणि भामिनि बलादनुभावितासि ॥२॥

देवी—(सप्रश्रयम्) आर्यपुत्र! मत्कृते मा परिम्लापय निखिल भुवनैकमङ्गलमात्मानम्.

त्वत्सन्निधाने सततं चरन्त्याः
न कापि बाधा न च मे विकारः ।
घोराणि कृच्छ्राण्यपि मे त्वदीय-
सान्निध्यसौख्यान्तरितानि नूनम् ॥ ३ ॥

राजा—अहो! स्नेहानुवृत्तिरीदृशी, यत्र दोषा अपि गुणीक्रियन्ते. देवि! श्रूयतामिदम्–

मन्दं निधेहि चरणं वनभूमिरेषा
निम्नोन्नता प्रचुरकण्टकसङ्कुला च ।
क्षौमाञ्चलं रचय मूर्ध्नि रविः कठोरः
शीर्षं स्वकं नमय यत्र नताश्च शाखाः ॥ ४ ॥

देवी—अहो! आर्यपुत्रस्य मयि कारुण्यातिशयः. अहन्तु पुनःपुनरेवं उपदिश्यमानापि प्रमाद्यामि शून्यहृदया. भवतु, इदन्तु किञ्चित्पृच्छामि.

राजा–अवश्यं विधीयताम्.

देवी–लाजैस्सह भर्जिताः सिकताइव सन्तप्यन्ते मार्गधूलयः. तदद्य कोऽप्यधस्स्थले किमग्निसन्धुक्षणेन अम्बरीषमिव प्रस्वेदिनीमिव च परितापयति भूभागम्?

राजा—नहि नहि. खरकिरणकिरणप्रभाव एषः.

देवी—अहो! भगवतो भास्करस्य स्वयमत्यग्नयः करप्रकरा इति प्रत्यक्षीकृतमिदानीम्. (विचिन्त्य सपरितापम्)

जीवितेश तव पादपङ्कजे
भानुतप्तभुवि सम्प्रचारिते ।
मानसं मम तु शोकवह्निना
दाह्यते किमु विमोह्यते किमु ॥५॥

राजा—(सश्लाघम्) देवि! समनुभूयमानानि महान्त्यपि कष्टान्यविगणय्य पतिस्नेहानुरूपमेव परिमन्त्रयस इति अहो सदापि सरलैव ते.

वचनेषु ते सुवचने श्रुतेषु मे
परितोषमेति परितोऽपि मानसम् ।
अधिकर्णदेशमधिकं सुधोक्ष्यते
मनसो रुजा विमनसो विहीयते ॥६॥

देवी—परप्रेमायत्तगभीरोदारचित्तानां युष्माकं स्वभावसिद्धएव अयं प्रसन्नभावः. नाथ! क एष पुरतः सान्द्रतरशाखाशिखाच्छादितवनाभोगश्शाखी.

राजा—देवि! सोयं वनान्तराले स्वयं व्यक्तस्सहकारः. प्रेयसि! स एषः त्वयि प्रीतिमाबध्नन्निव प्रतिभाति. पश्य—

सान्निध्यन्ते पवनचलितैः श्लाघतेऽसौ शिरोभिः
मुग्धस्निग्धैः मधुकररवैः स्वागतं शंसतीव ।

अग्रे नम्रः तव सुमफलान्यर्पयत्येष नूनम्
शीर्षे धत्त तव पदलवान् पल्लवान् पङ्कजाक्षि ॥७॥

देवि! इतश्च पश्य, व्यामान्तराले समन्ततो विदलितबहुलमुकुलसौरभाहूतमधुकरझङ्कारमुखरितमञ्जुमञ्जरीपुञ्जराञ्जितगुञ्जाकुञ्जसनाथः परिणतफलभरपरितोषितपतगकुलकलकलरवपरिपूरितवनान्तरालो वनोदुम्बरोनाम वनस्पतिः समाह्वयतीव नौ श्वसनचलितशाखाबाहुभिः. तदेनं त्वरितमुपसर्पाव.

देवी—(साञ्जलिबन्धम्) स्वामिन्! अत्रैव एतद्दिनं अतिवाह्य श्वः प्रयाणं तत्र समापयिष्यावः. किं त्वरया? मन्दं मन्दं विलम्ब्य गच्छाव.

राजा—कथमिव?

देवी—श्रूयतामार्यपुत्रेण—

पादेपादे प्राप्य किञ्चिद्विरामं
व्यामेव्यामे चोपविश्य क्षणार्धम्।
वृक्षेवृक्षेऽतीत्य चेकैकरात्रिं
वर्षेवर्षे योजने द्वे व्रजाव ॥ ८ ॥

राजा—(सकरुणम्) अयि सञ्चाराक्षमे! यथा रोचते भवत्यै.

देवी—अन्यतोदृष्ट्वा (सकौतुकम्) नाथ! गभीरभीषणाभोगकान्तारपरिशोभितः क एष गिरिः?

राजा—श्रूयताम्—

यस्य प्रस्थे नियतवसतिश्चण्डिका सा भवानी
यत्पादेषु प्रवहति मनश्शर्मदे नर्मदेयम्।

लोकालोकैस्सह सखि! पुरा भानुमान् येन रुद्धः
शृङ्गैस्तुङ्गैश्शशिमुखि! महान् सानुमानेष विन्ध्यः ॥ ९ ॥

देवि! विन्ध्यारण्यमध्यमध्यास्महे. तदद्य पश्यतु प्रियसहचरी, समन्ततोप्यतिगहनवनलतागुल्मपरिवेष्टितनानाविधतरुषण्डमण्डितान् अतिक्रूरमहोग्रसत्वसमाकीर्णान् प्रशान्तगम्भीररमणीयभीषणाभोगान् महारण्यभागान्—

उद्गर्जन्ति गुहागृहेषु हरयः कुञ्जेषु च द्वीपिनो
द्रोणीषु प्रचलन्ति यूथपसमानीता स्समेता गजाः ।
सत्वाः केपि गतागतानि दधते श्वासैश्शयूनां मुखे
दावाग्नेस्सपदिच्युतं मृगकुलं व्याघ्रैस्समाघ्रायते ॥ १० ॥

इतो दृश्यताम्—

अत्रायं हरिरुद्धतो नखमुखैर्वन्यान् विपाट्य द्विपान्
गच्छन्नद्रिगुहां निवर्तितमुखो धीरं समालोकते ।
अत्रैषा प्रसवोन्मुखी मृगवधू रर्धोदितं शावकं
दृष्ट्वा पृष्ठतलं विकर्षति वृके दीनारवैः क्रन्दति ॥ ११ ॥

देवी—हा नाथ! त्रायतां त्रायतां तपस्विनीयं मृगवधूः.

राजा—(वृकं निवार्य) देवि! इतश्च समालोक्यताम्—

शब्दान् श्रोत्रमनोहरान् ततइतः कुर्वन्ति केचित्खगाः
प्रस्थेभ्यः प्रदरोदरेषु पतनाझाङ्कारिणो निर्झराः ।
वल्मीकोद्धरणोत्सवान् विदधते भल्लूकबाला इमे
भ्रूभङ्गानभिदर्शयन्ति परितश्शाखासु शाखामृगाः ॥ १२ ॥

इतोऽपि पश्य—

चलितशबरसेनाचापटङ्कारभीतः
त्यजति वनमयूर स्ताण्डवारम्भणानि ।
किरिविदलितमुस्तागन्धसम्बन्धिनोऽमी
वनगजमदधारामेदुरा वान्ति वाताः ॥ १३ ॥

देवी—आर्यपुत्र! सत्यमतिभीषणा अतिरमणीयाश्चैते वनोद्देशाः. पश्यैतत् अल्पावशिष्टमहः. सन्निधास्यत्येव तमः. तदद्यैव कमप्याहारं सम्पाद्य निर्बाधमावासं आश्रयाव.

राजा—(अनाकर्णितकेन समन्तादवलोकयति.)

नेपथ्ये—(कलकलः.)

राजा—(श्रुत्वा निपुणं निरूप्य च) देवि! इतः पश्यपश्य—

अयमभिनवगुञ्जाकुञ्जकूजत्कपोतः
प्रमदयति पयोष्णीशीकरार्द्रः प्रदेशः ।
मधुरमिह पतन्तो मञ्जुमञ्जुक्वणन्तः
कनकमयविहङ्गाः कोमलाङ्गाश्चरन्ति ॥ १४ ॥

(पुनर्निपुणं निरूप्य) देवि! पश्य—

अन्योन्यं प्रहरन्तो युग्मीभूता स्तथैककीभूताः ।
अक्षा इव पक्षिवराः कुर्वन्त्येते कुतूहलान्यक्ष्णोः ॥ १५ ॥

देवी—(दृष्ट्वा) आं मनःकुतूहलकारिण एव एते.

राजा—तर्हि तानेतानानीय निर्वर्तयामि ते कुतूहलम्. क्षणमात्रं सहस्व त्वमिदानीं मत्सान्निध्यातिक्रमम्.

देवी—नैतत्सङ्घटते.

राजा—तर्हि निभृतं मामनुगच्छ.

(उभौ निष्क्रान्तौ. ततः प्रविशन्ति खगाः)

खगाः—कलकलायन्ते.

राजा—(प्रविश्य पुरोवलोक्य) अहो! रमणीयता खगकुल-सञ्चारस्य.

स्वर्णदिग्धविविधोज्ज्वलरूपेष्वण्डजेषु पतितोत्पतितेषु ।
नीलपीतहरितैरथ रक्तैः कन्दुकैर्विहरतीव वनश्रीः ॥१६॥

देवी—(निपुणं विभाव्य) नाथ! पश्य, एते सर्वेप्यद्य विगलित-वेद्यान्तरं सम्भूय खेलन्ति.

राजा—तर्ह्यद्यैव निभृतं गत्वा उत्तरीयपीताम्बरमिदं जालस्थाने नियोजयामि. (इति पीताम्बरं तदुपरि प्रसारयति.)

(सर्वे पक्षिणः सङ्घीभूय पीताम्बरेण सह दिवमुत्पतन्ति.)

राजा—(सहसोपसृत्य) रे रे वस्त्रापहारिणः! क्व गमिष्यथ? क्व गमिष्यथ? धनुर्धनुः. (विचिन्त्य) क्व धनुः? क्वाहमिदानीम्? दिवं गताः गता एव. (अकाशे लक्ष्यं बध्वा) रे रे किं ब्रूथ? 'किमक्षैरिवास्माभिः अतिसंहितोसीति'? तर्हि गच्छत वराकाः. हा धिक् कष्टंकष्टम्. दैवेन विवसनीकृतोस्मि. पूरयतु स्वमनोरथं दुर्दैवम्. किमितोप्यधिकं कुर्यात्? अथवा यानियानि कृच्छ्राणि तानि सर्वाणि मयि सममेव पातयतु दुर्विधिः. सन्नद्धोस्मि सर्वमप्यनुभवितुं वज्रहृदयः. देवि! मन्दीभवतीव मे चेतः. तदद्य कर्तव्यमुपदिशतु भवती.

देवी—आर्यपुत्र! किमिव विज्ञापयामि, एवं पदेपदे विपरीते विधौ?

राजा—(सवैक्लव्यम्) देवि! श्रूयताम्—

त्वमेकवासा अहमेकवासाः
शीता निवासाः कठिनाः प्रवासाः।
लोके प्रहासाय ममेतिहासा
देहे जिहासाद्य शुभावहा सा ॥१७॥

देवी—(सभयं सप्रश्रयञ्च) मानद! किमेवं लघूकरोषि सकल-श्रेयस्साधनभूतमात्मानम्. अनुस्मर, 'जीवन् भद्राणि पश्यति' इतिगाथाम्. किं निहतमेतावता? त्वाचं चार्मणं वा वसनं सम्पादयाव. अथवा विज्ञापयामि पुनरिदं, वैदर्भीं राजधानीं गत्वा वत्सयोः मुखावलोकनेन आप्यायितौ यापयेव कालमिति.

राजा—(विचिन्त्य सशिरःकम्पं सावहित्थञ्च) प्रिये! प्रीणामि ते प्रियवचनेन. श्रूयताम् अयमेव पन्थाः इतो दाक्षिणानां विदर्भाणाम्.

विन्ध्योत्रास्ति पयोष्णिकाथ तपती चाथर्क्षवानप्यथो
नीवारप्रसृतिंपचैर्मुनिवरै रावार्यमाणं वनम्।
तस्मादूर्ध्वमयि प्रिये! हलमुखैरुत्कीर्यमाणा भुवः
पन्थानस्तदनु प्रयान्ति सुभगे! देशं विदर्भान्प्रति ॥१८॥

देवी—(साशङ्कम्) नाथ! विदर्भगमनाय प्रार्थितः किमेवं मार्ग-मुपदिशसि? तत्र गमनमनुमतं वा न वेति न जाने.

राजा—नानुमतमेव.

देवी—तर्हि किमपि शङ्कते मे हृदयम्.

राजा—कीदृशी शङ्का?

देवी—कदाचिदार्यपुत्रः कस्माच्चिन्निर्वेदात् परित्यजेन्मामिति.

राजा—प्रिये! तर्हि इदं शरीरमपि परित्यजेयमेव. किमनेन प्रयोजनं स्यात्?

देवी—(सविस्रम्भं सपरितोषं साञ्जलिबन्धश्च) नाथ! क्षम्यतामयं अतिक्रमाशङ्की जनः.

राजा—(हसन् पाणिना चुबुके स्पृशति.)

देवी—(समन्तादवलोक्य) प्राणेश! पश्य, शार्वरं तमः सर्वतोपि दिशः स्ववशीकृत्य विफलयति दृशौ. निद्रा च मां बाधते. तदद्य निर्भये क्वचिदावासे शयावहै.

राजा—(साङ्गीकारम्) देवि! तर्हि निर्भरपरिष्वङ्गैः अध्वश्रमक्लान्तान्यङ्गानि संवाहयन्तौ अस्मिन् जीर्णशिलामण्डपे शयावहै.

उभौ—(तथा कुरुतः.)

राजा—देवि! स्थण्डिले शयाना शीताद्वाताद्वेपसे. तदेष उपधानीक्रियतां बाहुः.

देवी—(अवचना निद्राति.)

राजा—अहो! सुप्तमात्रैव परिश्रमवशात् गाढनिद्रापरवशेयं संवृत्ता. (सर्वाण्यङ्गानि परिमृशन् निर्वर्ण्य)—

कुलस्यैषा भूषा कुवलयदलाक्षी भवति मे
भवत्येषा योषा मम हृदयविश्रान्तिभवनम्।

गृहे वाऽरण्येवा मयि समरसेयं प्रियतमा
मदर्धाङ्गं प्राणा अपि भवति सर्वस्वमपि मे ॥ १९ ॥

अपरञ्च—

इयं निद्रामुद्रापिहितनयनापि प्रियतमा
मया दृष्टादृष्टा कलयति दृशोः कामपि रुचिम् ।
रसात्स्पृष्टास्पृष्टा रचयति वपुस्सान्द्रपुलकं
हृदि ध्याताध्याता मदयति मनो मन्दयति च ॥२०॥

(पुनश्च सानुरागं निर्वर्णयन् परामृश्य) अयि देवि विदर्भनन्दिनि !

वंशश्च शीलञ्च वयश्च रूपं
विद्या विवेको विनयः प्रसादः ।
सौजन्यवैदग्ध्यमुखाश्च सर्वे
कान्तागुणास्ते त्वयि सम्प्लवन्ते ॥ २१ ॥

तदेवङ्गुणा महानुभावापि त्वं देवि ! मन्दभाग्यस्य ममाश्रयात् एवं क्लेश भाजनीकृतासि. न सहेय ते क्लेशानीदृशान् प्रत्यक्षयितुं, न पारयामि प्रतिकर्तुं वा, तदद्य किङ्करवाणि मन्दभाग्यः? (विचिन्त्य) अहह ! स्मृतमिदानीं, नूनं कुसुमसुकुमारगात्रीयं न क्षमते वनसञ्चारखेदाननुभवितुं. उक्तमेव किलानया, 'पादेपादे प्राप्य किञ्चिद्विरामं' इत्यादि. तदेतया सहास्मिन्वने सञ्चरितुं न पार्यते मयापि. किञ्च स्वयमियं पितृगृहाभिलाषिणी वत्समुखदर्शनोत्सुका च. सूचितश्चायमाशयः असकृदनया. तदद्य एतामत्र सन्त्यज्य यदि क्वचिद्गमिष्यामि, तदैषा तत्रतत्र

विचित्य विलप्य च कञ्चित्कालं गत्यन्तराभावात् स्वबन्धून् सङ्गमिष्यत्येव. विदर्भगामी मार्गोऽपि उपदिष्टपूर्वएव मया. न हि मार्गे प्रमादस्सम्भवेत्. कः पतिदेवतां प्रधर्षितुं शक्नुयात्? नचास्याः प्राणत्यागश्शङ्कनीयः. पुत्रदर्शनलालसा मत्प्राप्तिप्रत्याशा च तं प्रतिबध्नीयात्. अहञ्च कञ्चिद्राजानं वा समाश्रित्य नैपुण्येन पुण्येन वा कमपि लाभं सम्पाद्य पुनस्सङ्गमिष्ये प्रियतमया सह. अद्येयं यदि प्रबुद्धा स्यात्, तदा पदात्पदमपि गन्तुं नशक्यते मया. तदिदानीमेव अत्र इमां सन्त्यज्य क्वचिद्गमिष्यामि. एष मे निश्चयः. (शनैश्शनैर्बाहुमाकर्षन् उत्थाय सपरितापं सगद्गदञ्च) देवि! नृशंसोस्मि. परित्यज माम्.

प्राणवल्लभ इति भ्रमात्पृथु-
श्रोणि यद्यपि समाश्रितासि माम् ।
प्राणहारकपदं गतोस्म्यहं
प्राणरक्षणपरा भव क्वचित् ॥२२॥

(अञ्जलिं बध्वा) देवि! सोहमद्य त्वां विसृज्य गच्छामि. अनुजानीहि माम्. क्षम्यतां मदीयस्सर्वोऽप्यपराधः. अयं ते पश्चिमः प्रणामः. मा खिद्यस्व मद्विरहेण. शीलं रक्षन्ती प्रतिपद्यस्व स्वबन्धून्. शिवास्ते पन्थानस्सन्तु. गच्छन्तीं तिष्ठन्तीं स्वपन्तीं जाग्रतीं वा देवास्त्वां परिरक्षन्तु. (पुनस्सदैन्यम्) देवि! इदन्तु त्वां प्रार्थये, अन्तिमोऽयं प्रणयः पूर्यताम्. बन्धुगृहगतायास्ते सुलभान्येव दुकूलानि. तदद्य शीतार्तस्य

मे दीयतां दुकूलखण्डम्. (इति सिचयाञ्चलं नखैराच्छिद्य तेनात्मानमाच्छादयति.) (पुनस्सोद्वेगं) हा देवि! कथमीदृशस्ते परिणामः? कथमिदमपि कर्तव्यमासीन्मया?

सकलभुवनलक्ष्मीः स्वप्नमायोपमाऽसीत्
वसितुमपि वनान्ते वस्त्रमेकं न मेऽभूत्।
किमिदमुपनतं मे कीदृशोयं प्रयत्नो
हतविधिविहिताऽसौ हा दशा कापि नूनम् ॥२३॥

तदद्य यद्भावि तद्भवतु. कस्यापि मुखमदर्शयन् दूरं व्रजामि. (इति रुदन्निष्क्रान्तः.) (पुनस्सरभसं प्रविश्य सकरुणम्) हा देवि! कथमेकाकिनी गमिष्यसि? (देवीं परामृश्य)—

मामाश्रित्य समागतां स्वविभवान् सन्त्यज्य बन्धूंश्च तान्
प्राणेभ्योप्यधिकोयमित्यतितरां विस्रम्भमासेदुषीम्।
निद्राणामबलां मदेकशरणामेकाकिनीञ्च प्रियां
घोरेस्मिन्विपिने त्यजन्नकरुणं हाहा कृतघ्नोस्म्यहम् ॥२४॥

अपरञ्च हा देवि!

महायोगिन्यासीन्मदनुमतये त्वत्प्रियसखी
त्वयेन्द्राद्या देवा अपि लघु निरस्ता मम कृते।
गुरुर्दैवं प्रेयानयमखिलमित्याश्रयसि मां
अहन्तु त्वां त्यक्त्वा पिपातिषुरहो क्वापि नरके ॥२५॥

हा देवि सर्वलोकैकपूजिते!

विभवश्च विवेकश्च स्नेहस्सत्यं दया सुखम् ।
सर्वमेतन्मया त्यक्तमद्य त्वां त्यजता वने ॥ २६ ॥

देवी—(उत्स्वप्नायमाना किमपि जल्पन्ती अङ्गानि चलयति.)

राजा—(सभयम्) यदीयं प्रबुद्धा स्यात्ततः महत्कष्टं स्यात्. (इति त्वरितं निष्क्रान्तः.) (पुनस्सरभसं प्रविश्य) हा देवि! कथमेवंविधां त्वां निशीथे परित्यज्य गच्छेयम्? अन्यथा कथमरण्यखेदमनु भावयेयम्? सर्वथा नृशंसोस्मि मन्दभाग्यः. हा प्रियसखि!

पुनरपि सकृदीक्षे पुण्डरीकायताक्षं
मधुरमधुरहासं मुग्धमुग्धं मुखं ते ।
सकलसुखनिधानं सन्निधानं तवेदं
कथमिव परिहर्तुं कामिनि! स्यां समर्थः ॥२७॥

तदहमिदानीं सुखं वा दुःखं वा त्वया सह समनुभवन्नत्रैव स्थास्यामि. (इति देवीपार्श्वे तिष्ठति.) (पुनस्साश्चर्यम्) अहह! कथमिदं केनापि प्रणुद्यमान इवास्मि? भाराधिष्ठित इव मे स्कन्धदेशः. किं केनापि पिशाचेनाक्रान्तोस्मि? (समन्तादवलोक्य) किमिदं न किञ्चिदपि? भवतु प्रसुप्तां प्रियामनुपालयामि. (इति देवीं परामृशन् सविमर्शं सजुगुप्सञ्च परावृत्य)

संस्कारैर्द्विविधैः श्रुतिप्रणयिभिः सोहं क्रमात्संस्कृतो
वेदान्तेषु विचार्य तत्त्वमखिलं विज्ञाय सत्सङ्गमात् ।
श्लेष्मत्वङ्मलमूत्रशोणितवसामांसास्थिमज्जामय-
स्त्रीपिण्डस्य कृते किमेवमधुना स्निह्यामि मुह्याम्यहो॥२८॥

अपरश्च—

पातुं पालयितुं तथान्यथयितुं हर्तुश्च धर्तुं जग-
त्कर्तुं कारयितुं सदापि धुरि सन्नद्धे जगत्कर्तरि ।
त्यक्ताहं विपिने कथं कथमियं त्याज्येति मोहं त्यजन्
यत्कर्तव्यतया पुरा व्यवसितं तत्साधये साधये ॥ २९ ॥

हा देवि! अयमहमिदानीं गच्छामि. त्वया तु ललाटलिपिरनुभूयताम्.

(इति रुदन्निष्क्रान्तः.)

देवी—(शनैरुत्थाय नयने परिमृजन्ती सादरम्) आर्यपुत्र! परिश्रमान्निद्रितास्मि. प्रसुप्तां मां परिपालयन् किं विनिद्र एवासि? शीताद्वाताद्वेपितः कियदायस्तोऽसि वा न जाने? कियदवशिष्टं वा रजन्याः? किमिदं न प्रत्युत्तरयति? (सभयं परावृत्य दृष्ट्वा) हा किमिदं? नास्त्येव. प्रसुप्तां मां विहाय क्व चलितस्स्यात्? (समन्तादवलोक्य) कथमिदं न कुत्रापि दृश्यते? हा! हतास्मि मन्दभाग्या. हा नाथ! किमेवमर्धरात्रे मां भाययसि? हासयसिवा? (विमृश्य)—

ज्ञातं तत्त्वं हासयिष्यन् प्रसुप्तां
उत्थाय त्वं लीलयान्तर्हितोऽसि ।
वृक्षाद्वृक्षं पर्यटन् दृश्यसे त्वम्
कस्मादेवं लीयसे गुल्ममध्ये ॥ ३० ॥

अलमलमतिहास्येनाशु सन्दर्शयास्यम्
परिहसितुमनाथां नैष कालो न देशः ।

त्रुटिमपि न सहेय त्वामनालोकयन्ती
परिदलति मनो मे प्राणनाथ प्रसीद ॥३१॥

कथमद्यापि न प्रतिब्रवीति? न प्रसीदति च? किं मां सर्वथा परित्यज्य गतस्स्यात्?

यदि सत्यं महाराजस्त्यक्तवान् मामनादरात्।
अरण्ये नूनमधुना मरणं शरणं मम ॥ ३२ ॥

हा देव! किमेवमकरोः? (इति वस्त्रेण मुखमाच्छाद्य रुदती स्वीयमुत्तरीयाञ्चलं छिन्नमालोक्य हा हतास्मीति मूर्छिता पतित्वा, स्वयमेव शनैरुत्थाय,) अहह किं कान्तकरस्पर्शेन समाश्वासितास्मि? (सर्वतोऽवलोक्य सदैन्यम्,) नहि नहि, शीतेन वातेन. किमर्थं परावृत्तमिदं हतजीवितम्? अद्यापि कुतश्शतधा न विशीर्णं मे हृदयम्? नूनमुत्तरीयाञ्चलमाच्छिद्य मे नाथः सुप्तां मां विसृज्यैव गतः. किमिदानीं करवाणि? किं वा नदीं प्रविशानि? किं वा गिरेः पतानि? केन वा उपायेन जीवितं जह्याम्? (विमृश्य) यदि स्वयं जीवितं त्यजेयम्, तदा स्वात्मघातिनी भवेयम्. अपरञ्च यदि महाराजस्स्वयमेकाकी निर्विद्य मां परिमृगयमाणः परावर्तेत, तदा मृतां मामवबुध्य स्वजीवितमपि विजह्यात्. तदनुश्रुत्य पितरौ, तावनुसृत्य भ्रातरौ, तदेतत्सर्वमवगत्य वत्सावपि त्यजेतामसून्. एवञ्च सर्वकुलघातिनी च स्याम्. अतो मर्तुमपि न पारयामि मन्दभाग्या. सर्वथाप्यतिदारुणं आरब्धमार्यपुत्रेण. (विमृश्य) अहह! कथमार्यपुत्रमधिक्षिपामि? ममैवं

फलोन्मुखे दुर्विधिविलसिते किं वा करोतु स महानुभावः? स तु मया अनुभूयमानान् वनवासखेदान् प्रत्यक्षयितुमक्षमस्सन्, त्यक्ता यदीयं स्वबन्धून् प्रयायादेवेति मत्या मामत्याक्षीदिति मन्ये. हा महाराज! प्रियभक्तां मां परित्यज्य कथं गतोसि? क्व वा निवससि? कस्त्वामुपचरेत्? अतस्साहसात्प्रत्यावृत्य स्वयमनुगृहाण माम्. त्वया विना क्षणमपि न सहेय जीवितुम्.

वज्रेणेव विदीर्यतेऽद्य हृदयं त्वद्विप्रयोगेण मे
पातालोदरपातितेव धिषणा गाढं तमो गाहते।
शून्या मे सकला दिशः परिहरत्येषोऽन्तरात्मा तनूम्
आयाहि त्वरितं प्रदर्शय मुखं बद्धस्तवैषोऽञ्जलिः ॥३३॥

(समन्तादवलोक्य सोन्मादम्) कथं नैवायातः? भवतु वनभवनवासिनस्तरुमृगादिबन्धूनापृच्छ्य ज्ञास्यामि प्रियनिवासम्.

सरल द्रुम भो! वदाद्य स-
श्चलितः केन पथा मम प्रियः।
यदि वक्तुमुपेक्षते भवान्
सरलाख्या कुटिलस्य ते कुतः ॥ ३४ ॥

महोन्नतोऽसि तालद्रो! दृष्ट्वा नाख्यासि चेत्प्रियम्।
परोपकारविधुरमौन्नत्यं ते निरर्थकम् ॥ ३५ ॥

गमनञ्च वपुर्गभीरता
प्रथते यस्य तवेव विक्रमः।

मृगनाथ! स तादृशः पुमान्
क्वचिदप्यत्र वने किमीक्षितः ॥ ३६ ॥

न कोऽप्यत्र प्रत्युत्तरयन् वर्तते. तदद्य नभसि सन्नद्धं नवाम्बुदमेतमभ्यर्थये.

सकलां भुवमीक्षसेऽम्बरात्
जलद! व्याहर मद्दशां प्रियम्।
दिनमेकमुदीक्ष्य ते प्रिया
यदि नायास्यसि हास्यतीत्यसून् ॥ ३७ ॥

कथमयमपि न किञ्चित्प्रतिवक्ति? परन्तु गर्जितैस्तर्जयन्निव प्रतिभाति. तिष्ठत्वयम्. अन्यान्वनबन्धून् विज्ञापयामि. भो भो मृगपक्षिपादपादयः! यदि मे प्राणनाथो यत्र कुत्र चिद्येन केन वा दृश्येत, तर्हि तदनुपदमेव सानुग्रहं मयि निवेदनीयः. श्रूयन्तां तदीयानि अभिज्ञानानि. यस्य खलु

वयः पञ्चात्रिंशद्वपुरपि निसर्गोन्नततरं
शिरश्छत्राकारं भुजयुगलमाजानु विततम्।
मुखं मुग्धश्मश्रुग्रथितमरुणान्तञ्च नयनम्
मतिर्धीरोदात्ता गतिरपि मृगेन्द्रोद्धततरा ॥ ३७ ॥

(पुनरसवैक्लब्यम्) हा नाथ! किमेवं विपिनान्तराले प्रलापयसि माम्? क्षमस्व सर्वानपराधान्. ईक्षस्व मां स्नेहार्द्रया दृशा. सल्लापय मां मधुरमधुरैर्वचोभिः. सन्निधेहि, पतामि ते पादारविन्दयोश्शतकृत्वः. (इत्यञ्जलिं बध्वा सविमर्शम्) अहह! कोयं मे मतिभ्रमः? मयानुभ-

वितव्ये महति कृच्छ्रे कथमायास्यत्यार्यपुत्रः ? वृथामोहमिमं विहाय तत्रतत्र समन्विष्याम्यार्यपुत्रम्. यदि मया विचित्यापि न लभ्येत, तदा तदुपदिष्टेनैव मार्गेण विदर्भान् गत्वा बन्धुसाहाय्येन दूतैस्तमानयिष्यामि. अद्य तु महाभयाकुलेऽस्मिन् महारण्यपथे कथमेकाकिनी गमिष्यामि ? यद्यप्यनुचितं स्त्रीणामसहायानां गमनम्. प्रोच्यते चाभियुक्तैः—

नैकाकिनी वसेद्गेहे नासहाया पथि व्रजेत् ।
नोपांशु भाषयेदन्यं नाशक्तापि परं स्पृशेत् ॥ इति.

तथापि तदेतद्वचनमनापदीति योजनीयम्. अन्यथा सम्प्रति सर्वथाप्यसहायायाः मम क्वचिद्वस्तुं गन्तुञ्च अनुचितमेवेति महत्येषा अनुपपत्तिस्स्यात्. अतः—

नष्टे प्रियेऽपि सद्यस्साहसिकाहं पुरो व्रजाम्येव ।
लूनेपि मस्तके तनुरुद्युङ्क्ते हि क्वचिज्जवाच्चलितुम् ॥ ३९ ॥

(इति परिक्रम्य निष्क्रान्ता.)

इति भैमीपरिणये षष्ठोऽङ्कः

ओं तत्सत्

अथ सप्तमाङ्कः.

(ततः प्रविशति एकवेणीधरा विरहकृशाङ्गी देवी.)

देवी—(सदैन्यं निश्वस्य) हा कष्टं कष्टम्.

मानवेश! विचितोपि समन्तात्
कानने न दयसे मम कस्मात्।
प्रीतिबन्धमखिलं प्रविहाय
प्रातिकूल्यमपि कल्पयसे किम् ॥ १ ॥

दर्यां झर्यां दुर्गमे दुर्गमध्ये
मार्गेमार्गे मार्गणं मे वृथाऽभूत्।
कष्टं कष्टं कर्णधारेण शून्या
मध्ये सिन्धोर्नौरिवासं विसृष्टा ॥ २ ॥

हा कथमाकस्मिकमापतितमिदं महावैशसं मे? (विचिन्त्य सनिश्चयम्) अहो! ज्ञातं ज्ञातम्. अये महाराज!

प्रतिपक्षनृपान्विनिघ्नता
बहवो यद्भवता पतिव्रताः।
पतिभिर्विभवैर्वियोजिताः
तदिदं मे फलितं त्वदाश्रयात् ॥ ३ ॥

अथवा द्विषतेव केन चि-
त्तव चेतस्तरलीकृतं यदि।

स सदापि तनुप्रमाथिना
मम तापेन परं प्रताप्यताम् ॥४॥

(विचिन्त्य पुनस्सानुस्मरणं सपरितापञ्च,) हा! हतभाग्याहमस्मि, यतः—

सान्निध्यात्तवभूष्यते नरपते! यः कोपि देशोऽधुना
ते पश्यन्ति तवास्यमिन्दुरुचिरं ये भाग्यभाजो भुवि।
श्रुत्वा त्वद्वचनं श्रवस्सुखयितुं पुण्यं न मे विद्यते
त्वत्सल्लापसुखं तु कोपि भजते धन्यो मदन्यो जनः ॥५॥

हा नाथ! कथं मां प्रविहाय क्वापि गतोसि?

कुत्र भुङ्क्षे क्व वा शेषे केन वाद्योपचर्यसे।
कीदृशीं वा दशां धत्से कुतो वा तिष्ठसे न मे ॥ ६ ॥

हा! क्वेदानीमतिसङ्कटेस्मिन्महारण्यपथे एकाकिनी गमिष्यामि? किं वा करिष्यामि मन्दभाग्या? सर्वथा महत्कष्टमापतितम्.

(नेपथ्ये) [1] हन्त! ममायमवसरः प्राप्तः.

देवी—(श्रुत्वा नेपथ्याभिमुखमवलोक्य सभयकम्पम्) अहह! महत्कष्टमापतितमेव. यदयं कठिननीलशिलाकारः क्रूरचक्षुः द्विपाद्व्याघ्रइवात्र कोपि व्याधस्समायाति, तदिदानीमेतद्गुल्मान्तरिता भवामि. (इति यथोक्तं करोति.)

(ततः प्रविशति भीषणाकृतिर्दुर्गसेनः.)

दुर्गसेनः—[2] हन्त! ममायमवसरः प्राप्तः. (सप्रमोदं शिरश्चलयन्)

[1–2] अम्महे मह अयं अवसरो पत्तो.

[1]सोहमिदानीं मृगयाप्रसङ्गेन मुग्धहरिणीग्रहणाय प्रवृत्तेन महाराजपुष्करेण रहसि समाज्ञप्तोस्मि स्वजनप्रोत्साहनाय. (सोल्लासं संस्कृतमाश्रित्य)—

बोधयन्बाधयन् रोधयेति स्वयं
काभिना स्वामिनाऽऽगामिना प्रेरितः ।
काननेकानने काननेकानहं
योजयन्भोजयन्पूजयन्भाजये ॥ ७ ॥

(विचिन्त्य) [2]विभज्य प्रेषिता एव खलु मया, तत्रतत्र वनशोधनाय स्थूलकुक्षिवज्रजङ्घकुम्भान्तकप्रभृतयः किराताग्रेसराः. तदिदानीमहमपि दुर्गमेऽस्मिन्वने समन्विष्यामि तां मुग्धहरिणीम्. साधयंश्च साध्यजातं स्वामिप्रसादस्य पात्रीभूय स्थिरीकरिष्यामि वनराज्याधिपत्यम्. एवञ्च स्वकार्यं स्वामिकार्यञ्च निर्वर्त्येत. अतो ममायमवसरः प्राप्तः.

(सप्रमोदं कुहूरुतेन नृत्यति.) (नेपथ्ये) अब्रह्मण्यमब्रह्मण्यम्.

---

1 सो अहं दाणिं मअअप्पसंगेण मोद्धहरिणिग्गहणस्स पवुट्टेण महराअपोक्खरेण रहे समाणत्तोम्हि सजणप्पोच्छाहणस्स.

2 विभज्जिअ पेसिदा एव्व खु मए तह्वतद्ध वणसोहणाय थोरकुक्खिवजजंघकुभन्तअप्पहुडओ चिलाअग्गेसरा. तं दाणीं अहं वि दुग्गमे इमम्मि वणे समण्णेहिस्सं तं मोद्धहरिणिं. साहेन्तो सज्झजाअं सामिप्पसाअस्स पत्तीहाविअ थिरीकरेहिस्सं वणरज्जाहिवत्तं. एअं अ सकज्जं सामिकज्जं अ णिव्वट्टिज्जदु. अदो मह अयं अवसरो पत्तो.

दुर्गसेनः—(श्रुत्वा सोद्वेगम्) [1] किमिदं दीनाक्रन्दनमिव महारण्यभागे? (नेपथ्याभिमुखमवलोक्य) [2] हन्त आश्चर्यमाश्चर्यम्! (संस्कृतमाश्रित्य.)

चन्द्रबिम्बमिदं नूनं ग्रस्यते राहुणा भुवि ।

(निपुणं निरूप्य नहि नहि)—

कान्तं मुखमिदं काचिद्ग्रस्यते शयुनामुना ॥८॥

(तदहमिदानीं त्वरितं गत्वा परिपालयामि विपन्नामेनामिति सरभसं निष्क्रान्तः.)

(ततः प्रविशत्यजगरेणान्तर्निगीर्यमाणा मुखमात्रावशेषा विह्वला देवी.)

देवी—(सदैन्यम्) अब्रह्मण्यमब्रह्मण्यम्. हा हतास्मि मन्दभाग्या. हा नाथ! जन्मान्तरेपि त्वमेव मे शरणं भूयाः. हा तात! हा जननि! हा वत्सौ! हा भ्रातरौ! हा बन्धवः! सर्वान्वो विसृज्य महाकर्दमकूपे निमज्जामि हताशा. यन्त्राकृष्टानीव विशीर्यन्ते ममाङ्गानि. हा नाथ! मृत्युमुखे पतितास्मि. हा तात! एषा ते वत्साया गतिः. हा परमेश्वर [3]! (इति नयने निमील्य मूर्छति.)

(प्रविश्य दुर्गसेनः)— भद्रे! समाश्वसिहि समाश्वसिहि. अयमहमिदानीमनया छुरिकया विफलीकरिष्यामि वाहससाहसमिदम्.

---

1 किं इदं दीणक्कंदणं विअ महारण्णभाए.

2 अम्महे अच्छारिअं अच्छरिअं.

3 भद्दे! समासासिहि समाससिहि. अयं अहअं दाणिं इमाए छुरिआए विफलीकरिस्सं वाहससाहसं इदं.

(इति कच्छपुटाच्छुरिकामाकृष्य विदार्याजगरं मूर्छितां देवीमलाबुपात्राज्जलमादाय क्षालयन् कुम्भीदलेन वीजयति.)

देवी—(शनैश्शनैर्नयने समुन्मील्य दृष्ट्वा) अनेन खलु महाभागेन परित्रातास्मि दुर्मरणादस्मात्.

दुर्ग—[1] बाढंबाढम्. कोन्यस्समर्थो भवेदस्मिन्कर्मणि ?

देवी—(शनैरुत्थाय सत्रासं सलज्जं च वृक्षान्तरिता तिष्ठति.)

दुर्ग—(दृष्ट्वा सस्पृहमुपसृत्य संस्कृतमाश्रित्य)

रतिरिव मतिमोहकरी
लक्ष्मीरिव सर्वलक्षणोपेता ।
का त्वं कुरङ्गनयने
कस्मादस्मद्वनान्तरे चरसि ॥ ९ ॥

देवी—(सभयं सविनयं च) महाभाग! श्रूयताम्. इयमहं निजेन विभवेन पत्या च परित्यक्ता तमेवान्विष्यन्ती वनाद्वनं भ्रमाम्यशरणा.

दुर्ग—[2] तर्हि विभवार्थिनी कान्तार्थिनी शरणार्थिनी च ज्ञायसे. (किञ्चिद्ध्यानमभिनीय) [3] भद्रे ! किञ्चिद्रहस्यमुच्यते श्रूयताम्.

देवी—उच्यताम्.

---

1 बाढं बाढं. को अण्णो समत्थो हवेदु इमस्सिं कम्मे.

2 तारिहि विहवत्थिणी कंतत्थिणी सरणत्थिणी अ जाणिज्जसि.

3 भद्दे किंचि रहस्सं वच्चीअदि सुणीअदु.

दुर्ग—[1] महाराजपुष्करस्तावत् दमयन्तीसमासक्तचित्ततया कुत्र-चिदप्येकत्र स्थातुमशक्नुवन् मृगयाप्रसङ्गेन अस्मिन्वने विहर्तुमुद्युक्तः.

देवी—(स्वगतम्) इदमप्यातङ्कान्तरं भविष्यतीति मन्ये. यद्भावि तद्भवतु. (प्रकाशम्) ततस्ततः.

दुर्ग—[2] सुन्दरि! यद्यनुमन्यसे, महाविभवाय तस्मै त्वां समर्पयिष्यामि. दमयन्त्यास्सपत्नी भविष्यसि.

देवी—नाहं तादृशी.

दुर्ग—[3] तर्ह्यस्माकमनुरूपासि. श्रूयतामिदम्—(संस्कृतमाश्रित्य)

शतं किरातीरनुशासती त्वं
पतिश्च मां सुन्दरि पालयन्ती ।
सुतं सुवानाभिमतं ददाना
शतं समानां सुखमेधि बाले ॥१०॥

देवी—(सजुगुप्सम्) शिवंशिव! किमेवमश्रोतव्यं श्रावितास्मि?

दुर्ग—[4] कथमश्रोतव्यामिदम्?

देवी—श्रूयतां. त्वं मे पिता.

---

1 महाराअपोक्खरो दाव दमअंदीसमासत्तचित्तदाए कहिंचि एकत्र ठादुं असक्कुवंतो मअअप्पसंगेण इमस्सिं वणे विहरिदुं उज्जुत्तो.

2 सुंदरि जदि अणुमण्णेसि महाविहवस्स तस्स तुमं समप्पहिस्सं. दमअंदीए सवत्ती हविस्ससि.

3 तारिहि अम्हाणं अणुरुव्वा सि. सुणीअदु इदं.

4 कहं असुणिदव्वं इदं?

दुर्ग—(साश्चर्यम्) [1]कथमिव ?

देवी— यन्महाभयात्त्रातवानसि. स्मर्यते च–

जनिता चोपनेता च यश्च विद्यां प्रयच्छति ।
अन्नदाता भयात्त्राता पञ्चैते पितरस्स्मृताः ॥ इति.

दुर्ग—(सोपहासम्) [2] यद्येवं तर्हि पतिरेव भयात्त्राता चेत् किं करिष्यसि? अपरञ्च 'यदस्यां जायते पुनः' इतिवचनाज्जायापि मातेवानुपभोग्या भवेत्. अतो मुधाभूतमौपचारिकं वचनं विहाय प्रतिष्ठस्वेदानीमेव मम गृहाय. मत्करगतायास्ते नान्या गतिरस्ति.

देवी—(सभयं सानुनयञ्च) महाभाग! तिष्ठत्वौपचारिकं वचनम्. परवधूमभिलषन्मानवः प्रच्यवते खलु स्वधर्मात्?

दुर्ग—[3] तत्रापि श्रूयताम्. (संस्कृतमाश्रित्य)

परस्त्रीलुब्धतामेत्य लुब्धकास्स्मो वयं भुवि ।
अतः परस्त्रीसङ्गोपि स्वधर्मो मे भविष्यति ॥ ११ ॥

देवी—(सजुगुप्सम्) तर्हि ते गम्यागम्ययोर्विधिनिषेधावेव न स्तः.

---

[1] कहं विअ ?

[2] जइ एव्वं तरिहि पई एव्व भयादो तादा चे किं करिस्ससि ? अवरं अ. 'यदस्यां जायतेपुनः' इअ वअणादो जाआ विमादा विअ अणुपभोग्गा सिआ. अदो मोरउल्लहूदं ओवआरिअं वअणं विहाइअ पडिट्ठासु दाणिं एव्व मह घरस्स. अम्हकरगदाए तुज्झ ण अण्णा गई अत्थि.

[3] तह्म वि सुणीअदु.

दुर्ग—[1] न तथा. श्रूयताम्. (संस्कृतमाश्रित्य)

भोग्येयमभोग्येति च रम्यरूपे
वधूजने को नु विवेक्तुमीष्टे ।
उज्जृम्भमाणे मदनप्रतापे
क्व वा विधिस्स्यात्क्व नु वा निषेधः ॥१२॥

देवी—अहो ! भल्लूकहस्तपातितेवास्मि. कीदृग्व्यथामनुभविष्यामि वा न जाने.

दुर्ग—[2] भीरु ! न किञ्चिद्व्यथयामि त्वाम्. श्रूयताम्, (संस्कृतमाश्रित्य)

पुष्पैश्च शय्यां परिकल्पयामि
सुपल्लवैरास्तरणं करोमि ।
पिञ्छावतंसैः परिमण्डयामि
वाञ्छां त्वदीयां प्रतिपालयामि ॥ १३ ॥

किञ्च—

सिताश्च गुञ्जा स्तव हारयामि
मांसं मधून्यभ्यवहारयामि ।
झर्यां च दर्यां च विहारयामि
सर्वांस्तवाधीन्परिहारयामि ॥ १४ ॥

देवी—(सकोपम्) धिङ्मूर्ख ! किमेवमश्रव्यं प्रलपसि ?

---

1 ण तह. सुणीअदु.

2 भीरु ण किंचि व्यहएमि तुमं सुणीअदु.

दुर्ग—(सकोपम्) [1]वराकि? किमिदमश्रव्यं ते संवृत्तम्? तर्हि कचग्राहमाकृष्टायास्ते श्रव्यमिदं भविष्यति.

देवी—(सकोपोद्रेकम्) हताश! सर्पमुखे सुखेन म्रियमाणां माम-पकृष्यैवं निर्बध्नन्यदि कचग्राहमाकर्षसि,तदा क्षणेन भस्मीकरोमि त्वाम्.

दुर्ग—[2]अहह! बलवद्भीतोस्मि. वीरनारीव ज्ञायसे.

देवी—वीरपतिव्रतेति ज्ञायताम्.

दुर्ग—(सपरिहासम्) [3]जानामि स्त्रीणां पातिव्रत्यम्. एवंवादिन्यो बह्वचःस्त्रियः च्युतलब्धास्सन्त्येव मद्वशे. किञ्चित्सहस्व. मा कुप्य. कुतः कोपावेशान्निशायां व्याघ्रस्येव ते दृष्टी अङ्गारखण्डे इव प्रतिभातः? भवतु. न जानासि मां दुर्गसेनम्.

देवी—दुर्गसेनो वा भव. भर्गसेनो वा भव. किं त्वया दुर्मृगेण?

दुर्ग—(सकोपोद्रेकं दन्तान् कटकटयन् कचग्रहणायाभिद्रवति.)

---

1 वराइ किं इदं अस्सव्वं दे संवुत्तं? तरिहि कअग्गाहं आकिट्ठाए दे सोत्तव्वं इदं हविस्सदि.

2 अहह बलिअं भीदोम्हि. वीरणारीविअ जाणीअसि.

3 जाणामि इत्थीणं पाइवच्च. एव्वंवादिणीओ बहूओ इत्थीओ चुदळद्धाओ अत्थि अम्हवसे किंचि सहेसु. मा कुप्पेहि. कुदो कोवावेसादो निसाए वग्घस्सविअ दे दिठ्ठीओ अंगारखंडाइं विअ पडिभांदि? होदु. ण जाणासि मं दुग्गसेणं.

देवी—हा देव! हतास्मि. (इति क्रोशति.) (आकाशे गर्जतः पर्जन्याद्वज्रपातः. उभौ विसंज्ञौ पततः.)

देवी—(शनैस्समुत्थाय दृष्ट्वा सकरुणम्) अये! मामभिभवन्वज्रेणाभिहतो मृतोयमपशदः. प्रोच्यते किल प्राचीनैः—

“अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते” इति.

किमिदानीं करवाणि? यद्यत्रैव तिष्ठेयं, तदेतदीया मामभिद्रवेयुः. अतो वनान्तरं गच्छामि. (इति सभयं निष्क्रान्ता.)

(ततः प्रविशति पुष्करः.)

पुष्करः—अहो! वनग्राहिणस्सर्वानपि सुदूरं प्रस्थाप्य मृगयाव्याजेन स्वयमेकाकी सन्निहितोस्मि प्रियतमाधिष्ठितस्य वनपदस्य. दुर्गसेने अधिदैवाधीनेपि कुम्भान्तकवचनप्रत्ययादत्रैव पटीरतरुषण्डपरिसरे परिपालयामि प्रियतमागमनम्. (इति शिलातले समुपविश्य समन्तादवलोक्य सहर्षम्) अहो! अतिरमणीयोयं वनोद्देशः.

कुसुमेषोरिषुशालां
कुसुमितसालां वनीं मनो मनुते ।
कथमिव महर्षयोस्यां
हर्षात्तर्ष जयन्ति योगाय ॥ १९ ॥

(सानुस्मरणं सौत्सुक्यश्च)

पतिहतकवशेन प्रोज्झिता दैवयोगा-
द्वनभुवि विजनायां वीक्ष्यते चेन्मृगाक्षी ।

वलयितभुजबन्धं वक्षसाऽऽश्लिष्य गाढं
मधुरमधराबिम्बं मन्दमन्दं धयेयम् ॥ १६ ॥

(पुरोवलोक्य सहर्षम्) अहो प्रसन्न एव भगवांश्चन्द्रचूडः. यदित-एव कलहंसीव मन्दमन्दमायाति मत्तकाशिनी. स्वच्छन्दमालपन्ती समायातु. अत्रैव विटपान्तरितास्तिष्ठामि. (इति तथाऽवस्थितः.)

(ततः प्रविशति सदैन्यमालपन्ती देवी.)

देवी—हा देव! कीदृशीं दशां दत्तवानसि? (विचिन्त्य सविमर्शम्.)

नाथसनाथा लोके
राजति राजीवलोचना नितराम् ।
नाथेन विरहिता चे-
न्निरुपघ्नान्यैर्लतेव निहता स्यात् ॥ १७ ॥

पुष्करः—(ससम्भ्रमम्) युक्तमभिहितम्.

देवी—(ससंभ्रमं सोद्वेगं च परावृत्य दृष्ट्वा स्वगतम्.) अहो पुष्करहतकः! कथं समापतित एव सोयमातङ्कः. किं करवाणि? कथं वा शीलं रक्षेयम्? (प्रकाशम्) अहह कण्टकसमाकीर्णोयं मार्गः. (इति परावृत्य कतिचित्पदानि गत्वा तरुगुल्मान्तरिता तिष्ठति.)

पुष्क—(ससम्भ्रममुपसृत्य).

कुसुमसुकुमारगात्रे
कुवलयनेत्रे किमेतदाश्चर्यम् ।
स्पष्टं तिष्ठसि हृदये
दृष्ट्योस्तावन्निलीयसे कस्मात् ॥ १८॥

बहुदिनादारभ्य त्वामेव चिन्तयतो मे सुदिनाहमासीदिदं दिनम्.

कष्टां दशां प्राप्य वनान्तरस्था
मेकाकिनीं त्वामवलोकमानः ।
हातुं न शक्नोमि सुधाधरे त्वां
पातुं प्रवृत्तोस्मि भव प्रसन्ना ॥ १९ ॥

देवी—(स्वगतम्) सम्बोधनमेवास्य कौटिल्यं व्यञ्जयति. (प्रका) युक्तमेवेदं दीनावनं प्रजापालकस्य.

पुष्क—(सपरितोषं साञ्जलिबन्धश्च) तेन हि श्रूयताम्.

दारिद्र्याभिहतेन निर्दयमहो त्यक्तासि तेन स्वयं
घोरेस्मिन्विपिने किमर्थमधुना प्रम्लापयस्यङ्गकम् ।
कान्तं रूपमिदं वयश्च सुभगं कान्ते! वृथा मा कृथाः
संराज्ञी भव नः प्रशाधि सुभगे दासानुदासा वयम् ॥२०॥

देवी—त्यक्तापि क्लिष्टापि व्यथिताप्यहं शीलाभिलाषिण्येव, न तु संराज्ञीपदाभिलाषिणी, त्रैलोक्यपदाभिलाषिणी वा. अये! महाराजोसि. श्रूयतामिदम्.

पुष्क—उच्यतां श्रोतास्मि.

देवी— धर्मात्प्रच्युतधीः कथं परवधूं स्पृष्ट्वा पतेर्नारके
पुष्क— त्वत्संसर्गविलोपएव नरको नान्योऽस्ति मे नारकः ।
देवी—विज्ञोप्यद्य विवेकशून्यहृदयः किं नाम सम्भाषसे
पुष्क—त्वत्सौन्दर्यविमोहिते क्षितितले को वा विवेकी भवेत् ॥२१

इदमपि श्रूयताम्—

परिभ्रष्टो राज्याद्वनभुवि चरन्भ्रान्तहृदयः
सदीनो नष्टोभूत्किमिति सरले मुह्यसि मुहुः ।
देवी–गृहे वाऽरण्ये वा वसतु स तु धीरो न विधुरः
समृद्धौ हानौ वा नहि विकृतिमृच्छन्ति सुधियः ॥२२

पुष्क—भद्रे! साधु सूचितः पतिप्रणयः.

देवी—लोके पतिव्रतानामेवमेव.

पुष्क—का सा पतिव्रता नाम? लोके विडम्बनमेवैतत्.

देवी—कथमिव?

पुष्क—श्रूयताम्—

अलभ्यत्वात्परस्वानां नरास्सर्वेपि निस्स्पृहाः ।
अलाभादवकाशस्य सर्वा नार्यः पतिव्रताः ॥२३॥

देवी—(सरोषम्) कोयमसङ्गतालापः?

प्रलोभान्मोहाद्वा परवशधियस्सन्तु कतिचि-
त्पदाङ्गुष्ठेनापि स्पृशति न परं साधुचरिता ।
इहामुत्र स्त्रीणां भवति निजशीलं हि शरणं
ततः प्राणापत्तावपि न हि चलेयं सुचरितात् ॥२४॥

पुष्क—गुणगौरि मैवं परुषीभव.

त्वामालम्ब्य महौषधीमिव रुजी तानाङ्गजान् संज्वरा
नेतावत्प्रविषह्य चेतसि दृढं धैर्यं समासादयम् ।

अद्य त्वं प्रणयं विधूय हृदये यद्यन्यथा स्याः प्रिये
हा हा हन्त हतोऽस्मि कोनु शरणं का वा गतिः कथ्यताम् ॥२५

देवी—(सधैर्यामर्षम्) कथ्यते ते गतिः श्रूयताम्—

कारागारं गतिमिह भजेद्यः परस्वं हरेत
प्राणापायं विरचयति यस्तस्य सूना गतिस्स्यात्।
कुम्भीपाकस्तव गतिरसौ यत्परस्त्रीरतस्त्वं
धर्म्यान्मार्गात्पशुरिव चलन् किंनृपालोऽसि धिग्धिक् ॥२६

अपरञ्च—

राज्ञामाज्ञां शिरसि कलयेत्सर्वलोकोऽपि तेषां
येषां वृत्तिर्जगति जनयेद्धर्ममार्गप्रवृत्तिम्।
तादृक्षस्सन् जगति जनतां पुत्रवत्पालय त्वं
धर्म्यान्मार्गात्पशुरिव चलन् किंनृपालोऽसि धिग्धिक् ॥२७

पुष्क—यद्यपि श्रोतुं कटुतरमपि सत्यमेवेदम्, तथापि किं करोमि? कर्ता कारयिता च कामो मे बलीयान्. अस्याऽपि त्वमेव मूलम्.

देवी—यद्यप्येवं, तथाप्यनर्थकारिणं तं परित्यज्य एवं क्रियताम्.

पुष्क—कथमिव?

देवी—तमेव मत्प्राणवल्लभमन्विष्य तस्मै मां समर्पयन् तमेव भजस्व.

पुष्क—(सावष्टम्भम्) किमस्मादृशां तद्भजनेन?

देवी—श्रूयताम्.

यो वा भूमिपतिस्सदाऽपि भजते तं सत्यसन्धं नलम्
सद्यस्स्यात्स तु कीर्तिमान् निधियुतः शीलस्यपात्रीकृतः।

सन्नद्धेऽपि रिपौ प्रहारनिपुणो विज्ञापनीयो जनै
राद्यं धर्मजुषां त्यजेद्यदि भवेदाकार एवोज्ज्वलः ॥२८॥

पुष्क—(सविमर्शम्) कथमियं नलानुवर्तिनः कीर्तिमत्त्वादिकं प्रतिपाद्य अन्यस्याकृतिमात्रोज्ज्वलत्ववर्णनपूर्वकं निधियुतइत्यादिविशेषणानामाद्यक्षरस्थाने आवर्णादेशं चाभिधाय स्वयमाधियुतो भवेदित्यादिनिगूढार्थमभिव्यञ्जयन्ती मां तृणमिव लघुं मन्यते? (पुनस्सविमर्शमात्मगतं) तथापि नेयमद्य कोपयितव्या. परन्तु चाटुवादैरेव वशीकर्तव्या. भवत्वेवं तावत्. (प्रकाशं) अयि मुग्धे! अतीतं नलमनादृत्य कालोचितमालोच्यताम्. श्रूयताञ्चेदम्—

न ग्रासं लभते न कामपि गतिं चित्ते स धत्ते गरं
त्वत्प्राप्तिस्पृहयाऽऽगतोस्मि निखिलैर्गन्तव्य एवास्म्यहम्।
गीयन्ते मम कीर्तयः प्रतिदिनं गेयश्च मे वैभवं
गातव्योस्मि तवापि

देवी— किं प्रलपनैः धूर्ताशु गेहं व्रज ॥२९॥

पुष्क—(सावज्ञं) कथमियं गेहं व्रजेत्युक्तिभङ्ग्या गकारे हकारं योजयस्वेत्यर्थान्तरं परिकल्प्य न ह्रासं लभते न कामपि हतिं चित्ते स धत्ते हरमिति नलं प्रशंसन्ती, त्वत्प्राप्तिस्पृहयाऽहतोस्मि निखिलैर्हन्तव्य एवास्म्यहमित्यादिना मां विनिन्दन्ती धिक्कुरुते. भाषते च स्वच्छन्दम्. (सकोपं खड्गमाकृष्य) अयि दुर्विनीते! राजापमानिनि! निहन्मि त्वाम्.

देवी—(सहर्षमञ्जलिं बद्ध्वा) राजन्! प्रियोसि मे.

पुष्क–(सप्रत्याशं खड्गमुपसंहरन्) सुमुखि! अपि सत्यं प्रियोस्मि ते?

देवी—कस्सन्देहः?

पुष्क—(सोल्लासम्) अद्य प्रसन्नो विधिः. कृतार्थोस्मि. अयि दण्डनीते! नमस्ते. (सप्रत्ययमुपसृत्य) नताङ्गि! बहुकालादारभ्य त्वं मे प्रियासि. अहं तु ते कथमद्य प्रियोस्मि?

देवी—अद्य खड्गेन मां प्रहरन् आगामिदुःखनिवारकतया उपकर्तासीति.

पुष्क—(निराशम्) अहह वञ्चितोस्मि वाग्भङ्ग्या. किं कर्तव्यमिदानीम्? (विचिन्त्य) सुललितेनैवोपायेन वशीकरणीयेयं नान्यथा. उक्तमेव किल प्राचीनैः.

"कविता वनिता चैव स्वयमेवागता वरा।
बलादाकृष्यमाणा चेत्सरसा विरसा भवेत्" ॥ इति.

तत्केनोपायेनैनां वशीकरोमि? (इति चिन्तयन् स्थितः. नेपथ्ये)—अयि भो महापतिव्रताशिरोमणे! नमस्ते. क्वासि पातालगङ्गेव निगूढा? देहि मे दर्शनम्.

पुष्करः–(श्रुत्वा) अये! महर्षेर्वामदेवस्यायं तारस्वरः. (नेपथ्याभिमुखमवलोक्य) सोयमित एवायाति. किमर्थमयमायातः? मदभिलषितार्थविघ्नायेति जानामि. अहह! अनवसरज्ञाः खलु वैदिकाः? भवतु, अयमनया सह कञ्चित्कालं सम्भाष्य गच्छतु. ततोहं पुनरागत्य सङ्गमिष्ये प्रियतमया (इति दीनदीनं परिक्रामन् निष्क्रान्तः.)

देवी--गतोयमष्टमः शनिः. यदि पुनर्वक्रीभवेत्तदा कष्टतरं स्यात्. अतस्तावदेव स्थलान्तरं गच्छेयम्. (इति भीतभीता समन्तादवलोकयति.)

(ततः प्रविशति वामदेवः)

वाम--अयि भो महापतिव्रताशिरोमणे नमस्ते. क्वासि पातालगङ्गेव निगूढा? देहि मे दर्शनम्.

देवी--(दृष्ट्वा भीत्वा च सुदूरमपसरति.)

वाम--(दृष्ट्वा) अहो! देवीयं मां दृष्ट्वा किमेवं त्रस्यन्तीवापसरति? केन चित्कदार्थीता स्यात्, प्रोच्यते किल प्राचीनैः.-

"सकृद्दष्ट्छूकभीतस्य कम्बलादपि तद्भयम्" इति.

भवतु प्रसादयाम्येनाम्. अयि मातः वामदेवो महर्षिरहं त्वद्दर्शनात्पावयितुमात्मानमागतोस्मि. (अञ्जलिं बद्ध्वा)

मातासि देवि सकलस्य चराचरस्य
भूताधिपस्य दयिता त्वयि सन्निधत्ते ।
पूतान्तरोस्मि तव सन्निधिमेत्य सद्यो
वाताहतं तृणमिवाभ्रनदीं प्रविश्य ॥३०॥

देवी--(साश्वासं सप्रश्रयश्च उपसृत्य) महर्षे! महादुःखभागिनी दमयन्त्यभिवादयते.

वाम--देवि! सकलं भद्रमाप्नुहि. जानामि ते सकलं वृत्तमभौ-

तिकेन चक्षुषा. मा खिद्यस्व मध्ये काले. अनुभवितव्यं किल विधिविहितम्? प्रोच्यते च प्राचीनैः—

"हरिणापि हरेणापि ब्रह्मणापि सुरैरपि ।
ललाटलिखिता रेखा परिमार्ष्टुं न शक्यते" ॥ इति.

तत्सहस्व कञ्चित्कालम्. सर्वं ते सुहितं भविष्यति.

देवी—महामुने! मम सुहितमहितं वा भवतु. न जाने स महानुभावः किमवस्थ इति.

वाम—तत्सकलमपि व्यक्तं जानामि दर्शयितास्मि च ते. लोचने निमील्य गमय कानि चिह्निनानि.

देवी—ईदृशेपि महाकष्टे भवदनुशासनानां पात्रीभूतास्मीति महान् मे परितोषः.

वाम—एवमेव ते भगवान् समापतितमकुशलं परिहृत्य कुशलं करिष्यति. (अजिनभस्त्रिकाबन्धं विस्रस्य) देवि! परिगृह्यतामयमङ्गरागः. परिगृह्यन्तामिमानि पुष्पाणीमानि फलानि च. परिगृह्यताञ्चेदं पीताम्बरम्.

देवी—(सविनयम्) महाननुग्रहः. (पीताम्बरं दृष्ट्वा सप्रत्यभिज्ञम्) क्वनु क्रीतमिदं महामूल्यं पीताम्बरम्?

वाम—उञ्छवृत्तिजीविभिरस्मादृशैः कथमेतादृशस्य क्रीणनं सम्भवति? श्रूयतामेतदागमनप्रकारः. कदाचिन्मयि समित्कुशाद्याहरणाय

वनान्तरे चरति केचित्पक्षिणस्स्वयमन्तरिक्षान्तरालात् मदभिमुखमिदं भूमावपातयन्.

देवी–(सगद्गदं साश्रुपातञ्च) हा महाराज! हा शशिकुलतिलक! हा प्राणनाथ! तदा तवेदं दुर्लभमासीत्. हा पीताम्बर बन्धो! तदङ्गसङ्गमपहाय महावने पतितस्य तवापि ममेव शोचनीयः परिणामः.

वाम—देवि! तदिदं सर्वं दिव्येन चक्षुषा ज्ञात्वा आगमिष्यन्त्यास्तवेदमिति परिगृह्य निक्षिप्तं मया. अद्य गलितो मे भारः. देवि! यद्यनुमन्यसे समापनेष्टिं परिसमाप्य यागशालां विसृज्य गृहप्रवेशाय यतिष्ये.

देवी—किं तर्हि व्रतस्थितो भगवान्?

वाम—अथकिम्.

देवी—तर्हि कथं मध्ये समायातोऽसि?

वाम—श्रूयताम्, मया तावदप्तोर्यामः क्रतुस्समारब्धः. अस्मिन् दिने निर्वर्तनीयोऽवभृथस्सम्प्राप्तः. तावदेव ऋत्विग्भिर्वसिष्ठजाबालिकाश्यपादिभिः सोवभृथो निषिद्धः.

देवी—किमिति?

वाम—पतिव्रतासन्निधिरेवावभृथः. तद्दर्शनं च शतावभृथसमम्. तदद्य भैम्यां धनुश्शतान्तरालसन्निहितायां तद्दर्शने च प्राप्ये किं वारिमज्जनेनेति.

देवी—वात्सल्यवाद एषः.

वाम—न तथा. अरुन्धत्या चानुमोदितमेतत्.

देवी—(लज्जावनतमुखी तिष्ठति)

वाम–यथा तथा वा स्यात्. त्वद्दर्शनावभृथेन पूतोस्मि. गमिष्यामि गृहाय. (इति निष्क्रान्तः.)

देवी—(सशिरःकम्पम्) अहो! महानुभावाः खलु महर्षयः? यदेषां सान्निध्यादहिनकुलादयोपि निरस्तविरोधाः परस्परं स्निह्यन्तो दृश्यन्ते. वनान्तरे कथं वा भवेन्न जाने. कथमेकाकिनी गमिष्यामि? (इति चिन्तयन्ती स्थिता.)

(ततः प्रविशति पटाक्षेपेण सम्भ्रान्ता मित्रादिनी.)

मित्रादिनी—[1] अहो सुदूरमागतास्मि. अद्य निरस्तं मे भयम्. श्रान्ताहमत्र कुत्रचिन्निगूढं निशामतिवाह्य विश्रान्ता श्वो गन्तास्मि. (इति परिक्रामति.)

देवी—(दृष्ट्वा सहर्षम्) भद्रे! इत आयाहि.

मित्रा—(सभयं परावृत्य दृष्ट्वा सपरितोषम्) [2] अहो! स्त्रीसहायो मया लब्धः.

देवी—मयापि तथैव.

मित्रा—(समीपमनुसरति).

देवी—(विलोक्य) कुतोत्रभवती निःश्वसन्ती भीतभीतेव लक्ष्यसे?

---

[1] अम्हहे सुदूरं आअदम्हि. अज्ज णिरत्थं मह भयं. संता अहं एद्ध कहिंचि णिऊढ णिसं अइवाहिअ वीसंता सुवो गच्छेहिस्सं.

[2] अम्हहे इत्थीसहाओ मए लद्धो.

मित्रा—[1] महाभागे! श्रूयताम्. इयमहं महावनान्तराले समागच्छन्ती केनचित्किरातेन सर्वस्वमपहृत्य इदं पटच्चरं दत्वा मत्परिधानमप्यपहृत्य निरुद्धास्मि.

देवी—अहो! कष्टंकष्टम्. ततस्ततः.

मित्रा—[2] ततो यावदसौ मां वशीकर्तुमन्वद्रवत्तावदहं प्रधाव्य सुदूरमागतास्मि.

देवी—युक्तं युक्तं समर्थासि. क्व यास्यसि?

मित्रा—[3] चेदिपुरं गमिष्यामि.

देवी—अपि चेदिपुरं जानासि?

मित्रा—[4] कथं जन्मभूमिं न जानामि?

देवी—अस्तु केन मार्गेण गन्तासि?

मित्रा—[5] इतस्सोमगिरिं, ततो भृगुतीर्थं, ततो महेन्द्रमण्डपं चातिक्रम्य गमिष्यामि.

---

1 महाभाए सुणीअदु, इअं अहं महावणंदराळे समाअच्छन्दी केणचि चिलाएण सव्वस्सं अवहरिअ इदं पडच्चरं दाऊण अम्हापरिहाणं वि अवहरिअ णिरुद्धम्हि.

2 तदो जाव अमू मं वसीकादु अणुद्धवेइ दाव अहं पधाविअ सुदूरं आअदम्हि.

3 चेइउरं गमेहिस्सं.

4 कह जम्मभूमिं ण जाणामि.

5 इदो सोमगिरिं, तदो भउतित्थं, तदो महेन्दमण्डवं, अ अदिक्कमिअ गच्छेहिस्सं.

देवी—कथं पुनर्महाभयेऽस्मिन् दुर्गमार्गे एकाकिनी गमिष्यसि ?

मित्रा—[1] न तथा. श्वस्तावद्बुधवासर इति चेदिपुरे महद्वाणिजकूटं मिलिता. तदितस्सन्निहिते सुपथि वणिक्सार्थस्य गतागतं भविता. तैस्सह मिलित्वा गन्तास्मि.

देवी—युज्यते. तर्हि किं मामपि तत्पुरं नेतासि ?

मित्रा—[2] यद्येवं तर्हि पादयोः प्रणम्य नयेयम्.

देवी—आर्ये! प्रियसखी मे संवृत्तासि. निक्षिप्यते त्वयि सोदरीस्नेहः.

मित्रा—[3] मयापि तथैव. (उभे परस्परं पाणिं स्पृष्ट्वा समालिङ्ग्योपविशतः.)

देवी—सखि! किन्नामधेयासि ?

मित्रा—[4] मित्रादिन्यस्मि.

देवि—सखि मित्रादिनि! क्षुधितासि. इमानि फलान्युपभुज्यन्ताम्. निरलङ्कारासि. इमानि कुसुमान्यलङ्क्रियन्ताम्. निर्वसनकल्पासि. इदं

---

[1] न तह. सुवो दाव बुहवासरात्ति चेइवुरे महन्तं वणिअकूडं मिळेहिइ. तं एद्ध सण्णिहिदे सुपहम्मि वणिसद्धस्स गदागदं हवेहिइ. तेहिं सह मिळिऊण गच्छेहिस्सं.

[2] जइ एव्वं तरिहि पादेसु पणमिअ णेज्जमु.

[3] मए वि तह एव्व.

[4] मित्तादिणिम्हि.

पीताम्बरं परिधीयताम्. एकवेणीव्रतस्थायाः ममैतैर्नकिञ्चित्प्रयोजनम्. (इति सर्वं ददाति.)

मित्रा—(सपरितोषं परिगृह्य) [1] सख्येतादृशपीताम्बरप्रदानेन महाराज्ञीमाकलयामि त्वाम्.कावान्या एतद्दद्यात्. तत्सखि! कासि कुतस्त्यासि?

देवी—(निःश्वस्य) सखि मित्रादिनि! किमिदानीं मे दुर्विधिविलसितस्मारणेन? तथापि सखीस्नेहात्कथयामि. श्रूयताम्. इयमहं विभवेभ्यः परिच्युता निषधेभ्यः परिभ्रष्टा निस्स्वेन पत्या च परित्यक्ता दुर्विधिवशाद्वने भ्रमामि.

मित्रा—[2] तर्हि नैषध्यसि?

देवी—अथकिम्. अथात्रभवती कुतआयाता किंवृत्ता च?

मित्रा—[3] श्रूयताम्. अहं महाराजपुष्करभवने सकलान्तःपुराधिकारिणी चिरमवसम्.

देवी—सोयमद्य मृगयार्थमागत्यात्र वने स्त्रीलम्पटः परिभ्रमति. ततस्ततः.

मित्रा—(स्वगतम्) [4] यदि सोत्र दृश्येत, तदा किमपि प्रतिकु-

---

[1] सहि एआरिसपीअम्बरप्पदाणेण महाराणिं आकलवेमि तुमं. का वा अण्णा एदं दज्जदु. ता सहि कासि? कुदिल्लासि?

[2] तरिहि नेसधी सि.

[3] सुणीअदु. अहं महाराअपोक्खरभवगे सअलंदेवुराहिआरिणी चिरअं वसेज्जमि.

[4] ज़इ सो एद्ध दीसदु, तइआ किंवि पडिकरेज्जमु एव्व.

र्यामेव. (प्रकाशम्) [1] ततस्स कदाचिन्मामुपह्वरे समाहूय भद्रे मित्रादिनि! कुण्डिनं नगरं गत्वा त्रैलोक्यैकसुन्दर्याः दमयन्त्यास्सविधे स्वोक्तिचातुर्येण मामभिवर्ण्य तां मदनुरक्तां कुरुष्व. सहस्रं ते निष्कान् दास्यामीत्यवादीत्.

देवी—(स्व) भवतु पुरस्तात्सर्वं ज्ञास्यामि (प्र) ततस्ततः.

मित्रा—[2] ततोहमपि कुण्डिनंपुरं गत्वा भैमीगृहे दूरतएव निरुद्धा तद्दर्शनप्रत्याशारहिता च प्रतिनिवृत्य धनलोभात् 'महाराज! मद्वचनाद्भैमी त्वां वृतवती' इति निवेद्य तत्पारितोषिकमग्रहीषम्.

देवी—(सशिरःकम्पपं स्वगतम्) विचित्रेयं कथा. (प्र) ततस्ततः.

मित्रा—[3] अथ कदाचिद्दमयन्तीस्वयंवरार्थं दूताहूतस्सराजा कुण्डिनं

---

[1] तदो सो कइआचिअ मं उवह्वरे समाहूइअ भद्दे मित्तादिणि कुंडिणं णअरं गदुअ तेळ्ळोक्केक्कसुंदरीए दमअंदीए सविहे सोत्तिचाउरिएण मं अहिवण्णिअ तं अम्हअणुरत्तं करेसु. सहासं दे णिक्खा दाहिस्सं. इअ वदीअ.

[2] तदो अहं वि कुंडिणं पुरं गदुअ भेमीघरे दूरदो एव्व णिरुद्धा तद्दंसणप्पच्चासारहिदा अ पडिणिवट्टिअ धणलोहादो 'महाराअ अम्हवअणादो भेमी तुमं वअवई' इअ णिवेइअ तं पारितोसिअं गेण्हहि.

[3] अह कइआचिअ दमअंदीसअंवरत्थं दूदाहूदो सो राआ कुंडिणं गदुअ सा भेमी अत्ताणं दिट्ठिएवि णाळूइदवइत्ति खिण्णो पडिणिवट्टिअ मं आहूदूण 'रेरे मुसावादिणि वंचिदोम्हि तुए' त्ति रोसादो कण्णणासिअं णिकत्तिअ मं णअरादो णिरआसेइअ.

गत्वा स्वयंवरे सा भैम्यात्मानं दृष्ट्वापि नालोकितवतीति खिन्नः प्रतिनिवृत्य मामाहूय 'रे रे मृषावादिनि ! वञ्चितोस्मि त्वया' इति रोषात्कर्णनासिकं निकृत्य मां नगरान्निरकासयत्.

देवी–(दृष्ट्वा सकरुणं)अये सत्यं कर्णनासिकविहीनासि. ततस्ततः.

मित्रा—[1] ततो वनमार्गे प्रस्थायैकाकिनी समागच्छन्ती किरातराजेन दुर्गसेनेन बलाद्वशीकृता चिरमवसम्. तस्मिन्नप्यशनिहते तस्य कुटुम्बिन्या निर्वासिता समागच्छन्ती मार्गे केनचित्किरातेन अपहृतसर्वस्वाहमागतास्मि. एष मे वृत्तान्तः.

देवी—(स्व) तपस्विनीयं मन्मूलामेव दुर्दशां प्राप्ता. (प्र) अवां द्वे अपि विपन्ने एव. कस्य वा निवेदयेव? अतिक्रामति सन्ध्याकालः. तत्सन्निहितायां झर्यां सन्ध्यामुपास्यागमिष्यावः.

मित्रा—[2] श्रान्तास्म्यहमत्रैव तिष्ठामि.

देवी—तथा क्रियताम्.

मित्रा—[3] सखि! त्वरितमागन्तव्यं त्वया.

देवी—तथा. (इति निष्क्रान्ता.)

---

[1] तदो वणमग्गे पत्थाय एआइणी समाअच्छमाणा चिलाअराएण दुग्गसेणेण बलादो वसीकिदा चिरअं वसीअ. तस्सिं वि असणिहदे तस्स कुडुंबिणीए णिव्वासिदा समाअच्छन्दी केणचि चिलाएण ओहरिदसव्वस्सा अहं आअदम्हि एसो मे वुत्तंदो.

[2] संतम्हि. अहं एद्ध एव्व चिट्ठेमि.

[3] हळा तुवरिअं आगंदव्वं तुए.

मित्रा—(निकुञ्जोदरे अवकरं निरस्य पल्लवतल्लजैस्तल्पद्वयं परिकल्प्य द्वारि प्रतीक्षमाणा तिष्ठति.)

(ततः प्रविशति पुष्करः.)

पुष्करः—(सपरितापम्.)

मम हृदयमदयमिषुभि
र्मारः क्रूरः किमेवमवकिरति ।
हृदयान्तरालनिहितां
यदि तां हन्यान्निकाममवकिरतु ॥ ३१ ॥

(समन्तादवलोक्य) अहो प्रदोषकालोऽप्यतिक्रान्तः. यदिदानीं दृश्यादृश्यमिवाभाति निखिलं जगत्. (पुरोऽवलोक्य) हन्त मत्प्राणवल्लभात्रैव सन्निहिता वर्तते. (इत्युपसर्पति.)

मित्रा—(दृष्ट्वा निकुञ्जोदरं प्रविशति.)

पुष्करः—(सरभसमुपसृत्य स्कन्धे तां स्पृशति.)

मित्रा—(अवचना अधोमुखी च तिष्ठति.)

पुष्क—(सप्रमोदम्) अहो! इयमनुकूला संवृत्ता. (उपविश्य निपुणं निरूप्य सामोदं सानुनयञ्च) अयि प्रियतमे!

धन्यानि वन्यकुसुमान्यवतंसयन्ती
कान्तं वपुः पिदधती कनकांशुकेन ।
कुञ्जं विभूषयसि वासकसज्जिकासि
तल्पद्वयं रचितमत्र क एष कल्पः ॥३२॥

अथवा यावत्सन्निपातस्तावत्सहशय्येति शास्त्रादिति चेत्, तथाप्यस्तु. (इति चुबुके करं प्रसारयति.)

मित्रा—(सरभसमुत्तिष्ठति.)

पुष्क—(समुत्थाय गाढं परिष्वज्य) प्रिये! धन्योस्मि.

मित्रा–(बलान्मोचयित्वाऽत्मानं बहिः कतिचित्पदानि परिक्रामति.)

पुष्क—(तामनुसरन् पीताम्बराञ्चले गृहीत्वा)

> **क्व नु यास्यसि निशि कान्ते**
> **कुचभरतान्ते कुतूहलाक्रान्ते ।**
> **मयि सन्निधिमुपयाते**
> **का ते भीतिः किमेवमविनीतिः ॥३३॥**

तत्प्रिये! प्रसीदप्रसीद. पटगृहवाटीपरिसरमनुसराव. (इति स्कन्धे भुजं समायोज्य तया सह निष्क्रान्तः.)

(ततः प्रविशति देवी.)

देवी—अहो! सन्ध्यां वन्दमानायाः मे महान् कालोतीतः. गाढे तमसि बहुदूरमागतापि कथं न लभेय निवेशम्? (निपुणमालोक्य) अहो मार्गान्तरादागताहं वनान्तरं गतास्मि. किंवाद्य करवाणि? मामन्विष्यान्विष्य कियद्व्यथते वा प्रियसखी मित्रादिनी? क्व वा निवसामि? कथमिमां रात्रिं गमयिष्यामि? (पार्श्वतो दृष्ट्वा) कथं तत्रतत्र प्रदीपाः प्रकाशन्ते? (निपुणमवलोक्य) नहि नहि वनेन्धनैस्तत्रतत्राग्निः प्रज्वाल्यते. (विचिन्त्य) ज्ञातंज्ञातं वणिक्सार्थशिबिरसन्निहितास्मि. (पुरतोवलोक्य)

स्थूलाकृतिर्द्विरदजानुनिभैकजानुः
कुम्भोदरश्च कुटिलोन्नतदीर्घदन्तः ।
लम्बोष्ठकः स्थपुटिताक्षियुगेन पश्यन्
कोयं पिशाचवदनः पुरतोभ्युपैति ॥३४॥

तदिदानीं विटपान्तरिता भवामि. (इति यथोक्तं करोति.)

(ततः प्रविशति करदीपिकाकरः पुरुषः)

पुरु—[1] विचितोयं मया सर्वोपि शिबिरसन्निवेशः. दैववशान्नकुत्रापि मृगबाधा चोरबाधा वा दृश्यते. सर्वे निद्राणास्सन्ति. तदद्य कांश्चित्कर्मकरान् जागर्तु नियोज्य स्वप्स्यामि. (समन्तादवलोक्य सभयम्) [2] कैषा विटपान्तरिता तस्करीव दृश्यते? (दृष्ट्वा सधैर्यम्) [3] भवतु ग्रहीष्यामि. (इति समुपसृत्य सगर्जितम्) [4] अये! का त्वं? निशीथे महाधनानां वणिजां शिबिरसविधे किमेवमन्तर्हिता तिष्ठसि?

देवी—भयादवचना तिष्ठति.

---

[1] विइदो अयं मए सव्वो वि सिविरसण्णिवेसो. देव्ववसादो ण कहिंवि मअबाहा चोरबाहा वा दीसदि. सव्वे णिद्दन्ता अत्थि. ता अज्ज काचिअ कम्मकरा जागरेदुं णिओजिअ सुवेहिस्सं.

[2] का एणा विडवंदरिदा तक्खरीविअ दीसेदि.

[3] होदु गेण्हाहिस्सं.

[4] अए का तुमं? णिसीहे महाधणाणं वणिआणं सिविरसविहे किं एव्वं अंदरिहिदा चिट्ठसि?

पुरु—(सकोपं दण्डमादाय) [1] अयि ! ब्रूह्यन्यथा प्रहरिष्यसे.

देवी—(भयाद्वेपते)

पुरु—[2] सत्यं चोरैवासि. प्रहृत्य प्रबध्य च त्वां गुल्मस्थानं नयामि.

देवी—(सगद्गदम्) नाहं तादृशी.

पुरुषः—[3] तर्हि कीदृशी ?

देवी—मार्गभ्रंशादिहागतास्मि.

पुरु—[4] कुत्र गन्तासि ?

देवी—वणिक्सार्थेन साकं चेदिपुरं गन्तास्मि.

पुरु—(साधु दृष्ट्वा सपुलकोद्गेदम्) [5] तर्हि समायाहि मदधिवेशम्.

देवी—नाहमागमिष्यामि परगृहम्.

पुरु—[6] किं महापातिव्रत्यं प्रकाशयसि ? जानामि स्त्रीणां पातिव्रत्यम्. श्रूयताम्. (संस्कृतमाश्रित्य)

स्वीयानां परकीयानां सामान्यानां च योषिताम् ।
शतंशतं प्रतिकलं मत्कटाक्षान् प्रतीक्षते ॥ ३९ ॥

---

[1] अए बूहि. अण्णहा पहरिज्जहिसि.

[2] सच्चं चोरा एव्व सि, पहरिअ पबन्धिअ अ तुमं गुम्मट्ठाणं णेमि.

[3] तरिहि केरिसी.

[4] कहि गच्छेहिसि.

[5] तरिहि समायासु अम्हअहिवेसं.

[6] किं महापाइव्वच्चं पआसेसि ? जाणामि इत्थिआणं पाइव्वच्चं. सुणीअदु.

देवी—(सजुगुप्सम्.) किं रूपवानसीति?

पुरुषः—(साक्षेपं.) [1] किं रूपेण? श्रूयताम्. (संस्कृतमाश्रित्य)

अस्तु कुलशीलरूप
प्रज्ञाविक्रमविवेकमुखमखिलम् ।
तदपि न जाने भूमौ
धन्यम्मन्यं धनेश्वरादन्यम् ॥ ३६॥

[2] तत्सुन्दरि! त्वमपि मधुराकृतिरशरणा चासि. अहमपि शतकोटीश्वरो धनदासपुत्रः कामदासोनाम साधुकारोस्मि. परं प्रिये त्वयि. मामनुसृत्य सर्वस्यापि मदर्थस्य त्वमेवेश्वरा भव. (सानुरागं निर्वर्ण्य) (संस्कृतमाश्रित्य)—

निःश्वासो यदि निस्सरेत्तवमुखात् किं पद्मगन्धेन मे
लावण्यं यदि दृश्यते तव तनोः किं मौक्तिकच्छायया ।
वाणी यद्यवकर्ण्यते तव गलाद्वीणास्वरैः किन्नु मे
सा त्वं यद्यनुरज्यसे मयि तदा किं वाप्सरोभिः फलम् ॥३७

देवी—(सवैक्लब्यम्) हा परमेश्वर! कियदेवं क्लेशयसि माम्? अत्रागत्य चोरास्मि संवृत्ता. दृष्टमात्रैव खलैरेवमपमान्यमाना चास्मि.

---

[1] किं रूवेण? सुणीअदु.

[2] ता सुन्दरि तुमं वि महुरकिदी असरणा अ सि. अहं वि सअकोटीसरो धणदासपुत्तो कामदासो णाम साहुकारोम्हि. परं पिएमि तुइ. मं अणुसरिअ सव्वस्स वि अम्हअत्थस्स तुमं एव्व ईसरा होहि.

कामदासः—(सकोपम्) [1] किमहं खलोस्मि ते संवृत्तः?

देवी—(सधैर्यम्) परस्त्रियमभिलषतोन्यः को वा खलस्स्यात्?

काम—(सकोपोद्रेकम्)[2] मूढे! न जानासि माम्. यद्येवं तर्हि बलाद्ग्रहीष्यामि त्वाम्.

देवी—(सकोपस्फुरणम्) तर्हि सद्यो विनंक्ष्यसि सबान्धवः.

काम—(सक्रोधं दन्तान् कटकटयन्) [3] वराकि! त्वमिदानीं न भवसि. पश्य मत्प्राभवम्. (आकाशे लक्ष्यं बध्वा उच्चैः) [4] अयि भो श्चोराश्चोराः.

(ततः प्रविशन्ति प्रदीपकराः गृहीतप्रहरणोपकरणाः ससम्भ्रमाश्च पुरुषाः.)

पुरुषाः—[5] प्रभो कोटीश्वर! कुत्र चोराः?

काम—[6] इमां चोरप्रणिधिं प्रहृत्य लगुडैः प्रबध्य च प्रग्रहैः शि-

---

1 किं अहं खलोम्हि दे संवुत्तो.

2 मूढे ण जाणसि मं. जइ एव्वं तरिहि बळादो गेण्हिहिस्सं तुमं.

3 वराइ! तुमं दाणिं ण होसि. देक्ख अम्हप्पाहवं.

4 ए भो चोरा चोरा,

5 पहू कोटीसर कहि चोरा.

6 इमं चोरप्पणिहिं पहरिअ लउडेहिं पबान्धिअ अ पग्गहेहिं सिविरं णेह.

बिरं नयत. (सर्वे देवीं परिवारयन्ति.) (नेपथ्ये) [1] हा हतास्स्मो वयम्. (संस्कृतमाश्रित्य)–

वन्यैर्गजैः प्रमृदिताः कतिचित्तथान्ये
द्वेधा विदार्य वणिजः परितः प्रकीर्णाः ।
गेहं धनं च तनयं च सुखं च हित्वा
हाहा गजैर्विनिहतो धनदास एषः ॥३८॥

काम—(श्रुत्वा सकरुणम्) [2] हा हतोस्मि. तातो मे गजैर्निहत इति श्रवणेन निष्क्रामन्तीव मे प्राणाः. किं करोमि मन्दभाग्यः. इमां कृत्यामधिकृत्य विलम्बितस्य मे प्रेतकृत्यावसरः प्राप्तः. हा तात! पुत्रवत्सल! मां विहाय कथं गतोसि? (इति रुदन् तिष्ठति.)

पुरुषाः—(ससम्भ्रमम्) [3] हा! हा! गजाः गजाः.

(ततः प्रविशन्ति सम्भ्रान्ताः कुपिताश्च गजाः. हाहेति सर्वे यथायथं पलायन्ते. गजास्ताननुद्रवन्ति. सर्वे दूरं निष्क्रान्ताः.)

देवी—(दृष्ट्वा सानुक्रोशम्) हन्त! गजैर्निहतास्सर्वेप्यमी. गजा

---

[1] हा हदम्ह अम्हे.

[2] हा हदोम्हि तादो मे गएहिं णिहदोत्ति सवणेण णिक्कामन्दिव्व मे पाणा. किं करेमि मन्दभग्गो. इमं कच्छं अहिकरिअ विळंबिदस्स मे पेदकच्चावसरो पत्तो. हा ताद पुत्तवच्छळ मं विहाइअ कहं गदोसि?

[3] हाहा गआ गआ.

अपि मां न स्पृशन्ति हताशाम्. यद्यत्रैव तिष्ठेयं तदा हतशेषेषु यः कोपि मामभिद्रवेत्. अथवा अत्र चरन्तः किराताः मां बाधेरन्. क्व गच्छामीदानीं गाढे तमसि? (समन्तादवलोक्य) क एष कोपि दीपः खद्योतायते? (निपुणं निरूप्य) हन्त! वनान्तराले महाकाल्यायतनमिदम्. अत्र प्रविश्य देवीपश्चाद्भागे निलीना अपनेष्यामीमां रात्रिम्. (इति यथोक्तं कृत्वा भीतभीता स्थिता.)

(ततः प्रविशन्ति सकूटयन्त्राः किराताः.)

किराताः—(विकटं परिक्रम्य सविकत्थनम्, संस्कृतमाश्रित्य)—

सदा मुदा मदावलै रदावघट्टिता वयं
भवन्ति दन्तिदन्तवन्ति गात्रकाणि नस्सदा ।
नृशंसकैस्स्वशंसकैस्सुशंसितैः प्रशंसिता
महावने विहारिणां सहायका महीभुजाम् ॥३९॥

(सपरितोषम्) [1] अहो स्वतन्त्रोस्माकं वनराज्यविहारः. तदेते वयम् तावत्—(संस्कृतमाश्रित्य.)

परानर्दयामश्शिरोमर्दयामः
परस्त्रीर्हरामो वरास्त्रैः किरामः ।
अरातीन् जयामः किरातीर्भजामः
श्वमासं चरामो वनेसञ्चरामः ॥ ४० ॥

---

1 अम्हो सतंतो अम्हाणं वणरज्जविहारो. तं एदे अम्हे दाव.

(सरभसं कूटयन्त्राद्द्वादशवर्षदेशीयं पश्चाद्बद्धं बालमादाय देवताभिमुखं विधाय धूपदीपान् समर्प्य सर्वे देवतां प्रणमन्ति.)

(एकः-सरभसं खड्गमुद्धृत्य) वनाधिदेवते! नमस्ते. नररुधिरेण प्रीणयामि त्वाम्.

देवी—(दृष्ट्वा सकरुणम्) अहह दुग्धकण्ठं मुग्धमुखं एतं बालं बलीकर्तुमुद्युञ्जते क्रूरात्मानः. हन्त निष्फलेयं मूढभक्तिः. अये क्रूरात्मन्!

कुसुमादपि सुकुमारं
कुमारमेनं कठोरखड्गेन ।
अभिहन्तुमिच्छतस्तव
हस्तस्त्रस्तः कथं नु न विहस्तः ॥ ४१ ॥

अन्यः—[2]अरे वज्रजङ्घ! मा खड्गेन छिन्ध्येनम्. किं विस्मृतवानसि? गृहीतरुद्धोयमस्मद्गृहेषु सन्निहितान् बहून् बालानङ्गुलिस्फोटमात्रेण मारितवानिति. ततएवास्माभिरयःपञ्जरे निबध्य निहित इति च.

देवी—बलीयानयं बालः. तथापि बहुभिर्निबध्य गृहीतः किं वा कुर्यात्?.

[1] वणाहिदेवदे णमोदे. णररुहिरेण पीणेमि तुमं.

[2] अरे वज्जजंघ मा खग्गेण छिन्दसु इणं किं विम्हरिदवो सि? गहिदरुद्धो अयं अम्हघरेसु सण्णिहिदा बहू बाला अंगुलिप्फोडमेत्तेणेव्व मारिदवोत्ति. तदो एव्व अम्हेहिं अयपंजरे णिब्बंधिअ णिहिदोत्ति अ.

परः किरातः—[1] तदद्यैनमयश्शलाकया समाविध्य प्रज्वलिताग्नि-कुण्डे प्रताप्य देव्यै निवेदयाम.

अपरः—[2] न तथा देवतोत्सवार्थमत्र निखातस्य यन्त्रमण्डपस्त-म्भस्योपर्याबध्य प्रग्रहालम्बितमेनं नालिकेरमिव भ्रमयन्तः परितः प्रहराम.

इतरः—[3] नेदं रोचते मह्यम्. जीवतएवास्य कृत्तिमपसार्यैनं बली-करवाम.

अन्यतमः—[4] रे रे मूढाः! किमेवं भाषध्वे? अस्मत्कुलक्रमागतं सम्प्रदायं विहाय स्वच्छन्दं यदि बलिकर्म निर्वर्तयथ, तदा उग्रेयं देवता प्रकुपिता सन्निपत्यास्मान्नाशयेत्. अतस्तमेनमेकेनैव प्रहारेण नि-हत्य शिरसि दीपमारोपयाम. (सर्वे ससाध्वसं साधुसाध्वित्यनुमोदन्ते.)

---

1 तं अज्ज णं अयसलाआए समाविज्झिअ पज्जलिदे अग्गिकुंडे पदाइअ देईए णिवेदेमो.

2 ण तह देवदूसवत्थं एद्ध णिहादस्स यंतमंडवथम्भस्स उवरि आबंदिअ पग्ग-हाअलंबिदं इणं णाळिएरं विअ डुंडुल्लावेन्तो परिदो पहरेमो.

3 ण एदं रोएदि मह. जीवंतस्स एव्व अस्स किंचिं ओसारिअ इणं बळीकरिमो.

4 रे रे मूढा किं एव्वं भासेह? अम्हकुलक्कमागदं संपदाअं विहादूण सच्छन्दं जदि बलिकम्मं णिव्वट्टेह तइआ उग्गा इयं देवदा पकुपिदा सण्णिप-इअ अम्हे णासेदु. अदो तं णं एक्केण एव्व पहरेण णिहनिय सिरे दीवं आरोवेमो.

देवी—अहह! दारुणमिदं द्रष्टव्यमुपनतम्. दलतीव मे हृदयम्. यदीदमवस्थमेनं यःकोपि स्वजनः पश्येत्तदा तस्य हृदयं सद्यः काचस्फोटं स्फुटेदेव. पश्यन्त्यप्यहं न पारयामि मोचयितुम्. (विचिन्त्य) क्षत्रियाण्यस्मि. यदि कालिकाकरगतं खड्गमाकृष्यैतान् निहन्यां, तदा बालोयं परित्रातो भवेत्. दैवात्पराजयश्चेच्छीलभङ्गो मे भवेदेव. इदश्च मे हतसौन्दर्यं शत्रुरिव प्रतिबन्धकमास्ते. तदद्य दीपमषीभिः हरिद्राकुङ्कुमादिभिश्चात्मानं विरूपयित्वा करिष्यामि कर्तव्यम्.

(इति देवतापश्चाद्गत्वा यथोक्तं करोति.)

अपरो व्याधः—(सरभसमुत्थाय खड्गमाकृष्य) [1] रे रे बालक! अद्य ते समाप्तमायुः. अस्मद्गृहदेवतायै बलीक्रियसे. प्रणम देवीम्. अनुस्मर च स्मर्तव्यानि.

बालः—(सदैन्यं साञ्जलिबन्धं च) [2] हा देवि! नमस्ते. हा जननि दमयन्ति! हा तात नल! युवाभ्यां परित्यक्तोहमेवं विपद्ये. हा देव परमेश्वर! मृतस्यापि मे पुण्यान् लोकान् प्रयच्छ.

---

[1] रे रे बालओ अज्ज दे समत्तं आयू. अम्हघरदेवदाए बलीकरिज्जहि. पणमसु देइं. अणुसुमरेसु सुमरिदव्वाइं.

[2] हा देइ णमो दे. हा जणणि दमअंदि! हा ताद णळो! तुम्होहिं परिचत्तो अहं एव्वं विवज्जेमि. हा देव्व परमेसर! मरिदस्स वि मे पुण्णा ळोआ पअच्छेहि.

व्याधः—(खड्गमुद्धरति.)

देवी—(श्रुत्वा दृष्ट्वा च) हा! हा! वत्सस्य इन्द्रसेनस्यैवायमार्तस्वरः. हा कथमिदमसह्यतमं अनर्थान्तरमापतितं मे? कथं वा वत्सविशसनं पश्यन्ती प्राणान् धारयामि?

अन्यो वृद्धव्याधः—(खड्गधरं प्रति) [1] अये! ग्रावोदर! किंचिद्विलम्बस्व. यद्यद्यापि वा सा महाराजपुष्करे अनुरज्येत, तदा तेनायं बालो मोचनीयस्स्यात्.

ग्रावोदरः—[2] अरे! ग्रन्थिलक! कथमनुरज्येत सा? उक्तमेव किल तया (संस्कृतमाश्रित्य)—

"ततः प्राणापत्तावपि न हि चलेयं सुचरितात्" इति.

अनूदितमेव महाराजेनैतत्.

देवी—हन्त! मन्मूलैवेयं विपत्तिर्वत्सस्य. किमद्य करवाणि? (विचिन्त्य) हन्यतामयं वत्सः. न तु शीलं त्यजेयम्.

ग्रावोदरः—(बालकस्य शीर्षमवनमयन् खड्गमुन्नमयति.)

बालः—[3]हा मातः निर्दये! कुत्रासि? निर्घृणं हन्यमानोस्मि नृशंसैः.

---

[1] अए गावुदर! किं चिअ विळंबेसु. जदि अज्ज वि वा सा महाराअपोक्खरे अणुरज्जेदु, ताहे तेण अयं बाळो मोअणिज्जो सिआ.

[2] अरे गंधिलओ कहं अणुरज्जेदि सा? उत्तं एव्व किळ ताए, अणुऊदिदं एव्व महाराएण एदं.

[3] हा माआ णिद्दए कहिं सि? णिद्दअं हणिज्जमाणम्हि णिसंसेहिं.

देवी—(श्रुत्वा दृष्ट्वा च सोद्वेगम्) बालक! मा भैषीः. इयमहमागच्छामि. (इति गर्जन्ती कालिकाहस्तात्खड्गमाकृष्य हाहेति सरभसमभिद्रवति. विकृतां तां दृष्ट्वा बालकवर्जं सर्वे भीतभीताः पलायन्ते.)

देवी—(बालमालिङ्ग्य मूर्ध्न्युपाघ्राय बन्धान्मोचयति.)

बालः—(प्रणम्य)[1] महादेवि! परित्रातोस्मि भवत्या अनुग्रहेण. यदि मयि पूर्णं वात्सल्यं, तर्हि दीयतामयं खड्गः.

देवी—(सादरमर्पयति.)

बालः—(खड्गं प्रतिगृह्य प्रणम्य) [2] देवि! क्षम्यतां पुनरागत्य ते सेवां करिष्यामि. (इति वदन्नेव तान् व्याधान् अनुद्रवन्निष्क्रान्तः.)

देवी—(सशोकम्) अहह! करगतोपि च्युतो मे वत्सः. स्त्रियः खलु मन्दबुद्धयो भवन्ति. शून्यहृदयाहं किमर्थं खड्गमदां वत्सस्य? व्याधाननुद्रुत्य वत्सो मे पुनः कीदृगवस्थो भवेद्वा न जाने. अपरमिदं दुःखमुपनतम्. अतीते कार्ये किं करवाणि? (इति चिन्तयन्ती स्थिता.)

(ततः प्रविशति पटाक्षेपेण सम्भ्रान्ता मित्रादिनी.)

---

1 महादेइ परित्तादोम्हि भवदीए अणुग्गहेण. जइ मइम्मि पुण्णं वच्छळळं, तरिहि दाइज्जदु अअं खग्गो.

2 देइ खमीअदु पुणो आगदुअ दे सेवं करेहिस्सं.

मित्रा—[1] अहो ! प्राणापायात्परिमुक्तापि धावंधावमायस्तास्मि. अस्मिन् देवतायतने मुहूर्तं विश्रम्य गमिष्यामि. (इति परिक्रामति.)

देवी—(दृष्ट्वा) कथं मे प्रियसखी मित्रादिनी ? (इति ससम्भ्रम मुपसर्पति.)

मित्रा—(देवीं दृष्ट्वा सभयम्)[2] किमिदं भूतमापतति ? (इति भीता वेपते.)

देवी—सखि ! कुतो बिभेषि ? किं मां विस्मृतवत्यसि ?

मित्रा—(सप्रत्यभिज्ञम्) [3] नाहं विस्मरामि. किमेवमसि ?

देवी—(सानुस्मरणम्) सत्यं दुर्जनभयाद्विरूपास्मि.

मित्रा—[4] सखि ! त्वरितं क्षालयैनत्.

देवी—प्रभातप्रायेयं शर्वरी. गन्तव्या चेदानीं गिरिनदी. तत्रैव क्षालयिष्यामि.

मित्रा—[5] तथा क्रियताम्.

देवी—कुतस्सम्भ्रान्तेव दृश्यते प्रियसखी.

---

1 अम्हो पाणापाआदो परिच्छत्ता वि धावंधावं आअत्थम्हि. इमस्सिं देव्वदाअदणे मुहुत्तं वीसमिअ गच्छेहिस्सं.

2 किं इदं भूदं आपडेइ ?

3 ण अहं विसुमरेमि. किं एव्वं सि ?

4 सहि ! तुवरिअं पक्खालेहि एदं.

5 तह करीअदु.

मित्रा—[1] सखि! किं भणामि मदवस्थाम्? श्रूयताम्. सायं नदीं गत्वा नैव निवृत्ता त्वम्. अहन्तु त्वामेव विचिन्वन्ती मार्गभ्रंशाद्वनान्तरं गत्वा परिक्रामन्ती प्रभीतवत्प्रधावतां हा हतास्स्म इति विलपतां किरातानां सम्मुखे निपतितास्मि.

देवी—अहो! प्रमादः प्रमादः. ततस्ततः.

मित्रा—[2] ततस्तैरनवलोकितैवाहं त्वरितं गुल्मोदरं प्रविष्टास्मि.

देवी—दैवेन दत्तबुद्धिरासीः ततस्ततः.

मित्रा—[3] ततस्ताननुधावन् कोपि बालः खड्गमात्रसहायस्तानरौत्सीत्. ततस्तैस्सह तस्य खड्गाखड्गि प्रथनं प्रवृत्तम्.

देवी—अहह! महत्कष्टमापतितं तस्य. ततस्ततः.

मित्रा—[4] ततश्च (संस्कृतमाश्रित्य)–

---

[1] सहि! किं भणिमि अम्हअवत्थं? सुणिअदु. साअम्मि णइं गदुअ ण एव्व णिवुत्ता तुमं. अहं दु तुमं एव्व विचिणंदी मग्गब्भंसादो वणंदरं गदुअ परिक्कामन्दी पहीदव्व पहावमाणाणं हा हदम्हो इअ विलवन्ताणं चिलाआणं सम्मुहेणणि पाडिदम्हि.

[2] तदो तेहिं अणाळोइदव्व अहं तुवरिअं गुम्मोअरं पविट्ठम्हि.

[3] तदो ता अणुहावन्तो कोवि बाळो खग्गमेत्तसहाओ ते रुन्धहिअ. तदो तेहं सह तस्स खग्गाखग्गिप्पधणं पवुट्टं.

[4] तदोअ.

कालाग्निप्रतिमस्समुद्धतगतिः खड्गेन तान्विद्विषः
खण्डंखण्डमसौ निकृत्य सपदि क्रोधादधः पातयन् ।
खड्गे तैरवखण्डितेपि स तरोराच्छिद्य शाखां दृढां
कीटाघातमथावधीद्रिपुभटानुद्दण्डदोर्विक्रमः ॥ ४२ ॥

देवी—(सप्रमोदम्) प्रियसखि! प्रियाख्यानैरमृतह्रदे मां निमज्जयसीव. ततस्ततः.

मित्रा—[1] ततश्चाश्विनाविवातिसुन्दरावश्वारूढौ द्वौ युवानौ तमासाद्य 'एह्येहि वत्स मृगयार्थमावाभ्यां सहागत्य कुत्रवा प्रच्युतो दैववशादत्र लब्धोसि' इति तमालिङ्गताम्. सोपि तौ प्रणम्य 'भो मातुलौ! शृणुतमिदम्, मृगयाप्रसङ्गेन युष्मत्सविधाद्दूरं गतोहं पुष्करप्रेरितैर्व्याधैर्बलादाबध्य गृहीतो बलीकर्तुं कालिकाभिमुखं नीतोस्मि. ततस्ते मां संहर्तुमुदयुञ्जत. तावद्देवी साक्षात्समागत्य मां मोचयित्वा खड्गमपि प्रादात्.

---

[1] तदो अ आसिणो विअ अदिसुंदरा कंखाणारूढा दुवे जुवाणो तं आसादिअ 'एसु एसु वच्छ मअअत्थं अम्हेहिं सह आगदुअ कहि वा पच्चुदो देव्ववसादो एद्ध लद्धो सि.' इअ तं समालिंगइरे. सोवि ता पणमिअ 'देमाउला सुणेह इणं मअअप्पसंगेण तुम्हसविहादो दूरं गदो अहं पोक्खरप्पेरिदेहिं वाहेहिं बळादो आबंधिअ गहिदो बळीकरिदुं काळिआहिमुहं णीदोम्हि. तदो ते मं संहेरदुं ऊज्जुज्जइरे. दाव देई सक्खा समागदुअ मं मोइऊण खग्गं वि पदाहिअ.

[1] ततोऽहंताननुधाव्य संहरन्निदानीं युष्मत्पादसंनिहितोऽस्मि.' इत्यभिधाय पुनः प्राणंसीत्. ततस्तावपि विस्मित्य 'वत्स! साक्षादेव दैवेन रक्षितोऽसि. त्वद्दर्शनेन प्रत्यागताः दमदमनयोः प्राणाः.' इति व्याहरन्तौ तेन सह स्वपुरं प्रातिष्ठेताम्. अहमप्येतत्सर्वं निगूढमालोक्य व्याधभयाद्धावंधावमागतास्मि.

देवी—(सर्वं विदित्वा सपरितोषम्) 'प्रियसखि! एवंप्रियं निवेदयित्रैच तुभ्यं किं वा दद्याम्? दक्षिणं दुरपसारमतो गृह्यतामिदम्, (इति वामप्रकोष्ठाद्रत्नवलयमपसार्य ददाति.)

मित्रा—(सप्रणामं परिगृह्य) [2] सखि! त्वं सर्वदा परश्रेयःकांक्षिणी ज्ञायसे. यदेवमन्यवृत्तश्रवणेनापि पारितोषिकं ददासि.

देवी—तिष्ठत्विदम्. किमिदानीं करणीयम्?

मित्रा—चेदिपुरं गच्छाव.

---

[1] तदो अहं ता अणुधाऊण संहरन्तो एत्ताहे तुम्हपाअसंणिहिदोम्हि., इअ अहिहाऊण पुणो पणवहि्अ. तदो ता अवि विम्हिऊण 'वच्छ सक्खा एव्व देव्वेण रक्खिदोसि. तुम्हदंसणेण पच्चाअदा दमदमणाणं पाणा.' इअ वाहरन्ता तेण सह सपुरं पट्ठिअ. अहं वि एदं सव्वं णिऊढं अलोइअ वाहभआदो धावंधावं आअदाम्हि.

[2] सहि तुमं सव्वदा परसेअकंखिणी जाणीअसे. जं एव्वं अण्णवुत्तस्सवणेण वि पारितोसिअं दाएसि.

[3] चेइउरं गच्छेमो.

देवी—तत्र कस्ते समाश्रयोऽस्ति ?

मित्रा—[1] तत्र रम्यं मे गृहमस्ति. तस्मिन् वृद्धा मे माता भ्राता च भाण्डायनो गोधूमचूर्णविक्रयेण जीवन्तौ निवसतः. अहमपि तत्रैव यतिष्ये. त्वं च कानि चिदहानि मद्गृहे स्थित्वा यथाभिलषितं गन्तासि.

देवी—एवमेवास्तु. परन्तु राजपुरुषसन्निहिते प्रदेशे वस्तव्यमासीत्. भवतु. दैवमेव शरणम्.

(इति परिक्रम्य निष्क्रान्ते.)

इति भैमीपरिणये सप्तमोऽङ्कः

ओं तत्सत्

---

[1] तह्व रम्मं मे घरं अत्थि. तस्सिं वुड्ढा मे माआ भादा अ भाण्डाअणो गोहूमचुण्णविक्कएण जीवन्ता णिवसन्दि. अहं वि तह्व एव्व यइहस्सं. तुमं अ काइचि अहाइ अम्हघरे ठाऊण जहाहिलसिअं गमेहिसि.

अथ अष्टमोऽङ्कः.

(ततः प्रविशति राजपुरुषः)

पुरुषः—(ऊर्ध्वमवलोक्य) अहो! नभोमध्यमारूढो मार्तण्डः. नविदितमेतन्नूतनागतबन्धुसल्लापकुतूहलिना मया. तदद्य त्वरितं गत्वा व्यवहारस्थाने सर्वान्लेखान्सज्जीकरोमि. यदि स्वकार्यवशाद्विलम्बेय, तदा महाननर्थस्सम्भवेत्, यतः—

> **ऋजुभिर्धुरि सेवकैर्विना**
> **प्रभुकार्येषु न शक्नुयात्प्रभुः ।**
> **न हि चक्रविवर्जितो रथ-**
> **श्चलितुं किञ्चिदपि प्रगल्भते ॥ १ ॥**

अपरञ्च—

> **तनुविक्रयिणां तु वेतनैः**
> **प्रभुसेवैव परा गति नृणाम् ।**
> **न दिनं न निशा न चोत्सवो**
> **न च बन्धुर्न सुखञ्च गण्यते ॥ २ ॥**

(पुरोवलोक्य) अहो! महाराजोयं सामात्यपुरोहितः सपौरवृद्धश्च इत-एवागच्छति. तत्पूर्वमेव अहमास्थानमण्डपम्प्राविशामि.(इति निष्क्रान्तः.)

(ततः प्रविशति यथानिर्दिष्टपरिवारः सौनन्देयश्चेदिराजः.)

राजा—(धर्मासने समुपविश्य) अये लेखायन! अस्मिन्दिने अस्माभिः कति व्यवहारा द्रष्टव्याः?

लेखायनः—(सरभसं पत्रिकानुवाचनमभिनीय साञ्जलिबन्धम्) प्रभो ! त्रयो व्यवहारास्सन्ति.

रा—विमृश्य पठ्यताम्.

ले—तत्राद्यः सार्थवाहस्य मित्रावसोः करात् ऋणं गृहीत्वा आधीकृतं गृहं निगूढमाधिकमूल्येनान्यस्मै विक्रीतवतश्चण्डोदरस्य कृत्यमधिकृत्य प्रवृत्तः. चण्डोदरस्तु विज्ञाप्यं विज्ञापयितुं पञ्चषदिनानि विराममपेक्षते.

रा—तथा क्रियताम्. अथापरः कः ?

ले—शिवकीर्तिशर्मणो ब्राह्मणस्य कैदारकं क्षेत्रं स्वक्षेत्रे संयोज्य तत्र सारणीश्च कृत्वा पुरातन्येवेयं स्थितिरिति विवदमानस्य दुश्चण्डकनाम्नः कृषीवलस्य कृत्यविषयको विवादः. अत्र वादी प्रतिवादी अधिवक्तृप्रतिवक्तारौ च सन्निहिताः. साक्षिणस्तु पत्रिकामुखेन आज्ञप्ता अपि न सन्निहिताः.

रा—दीयतां बलाद्ग्रहणपत्रम्. अथान्यः कः ?

ले—अन्यस्तु महाधनस्य धनसेननाम्नः सांयात्रिकस्य गृहाद्वस्त्राभरणानि मुषित्वा तैस्सहान्यसङ्गतां तद्भार्यां नैषधीं प्रति प्रचलितः. सा च बन्दीकृता वर्तते. अत्र विवाद्यपराधिसाक्षिणस्सर्वे सन्निहिताः.

राजा—तर्हि प्रवर्त्यतामयं व्यवहारः.

लेखायनः—(उच्चैः) विवादी धनसेनः. (प्रविश्य धनसेनः प्रणम्य स्थितः.)

लेखा—धनसेन ! विलिखितोपि विज्ञाप्यतां त्वदीयो व्यवहारः.

धनसेनः—(राजानं नमस्कृत्य) [1] देव ! नैषधीति मत्प्रतिवेशिनी मां वरयित्वा मद्वशे तिष्ठन्ती कदाचिद्वस्त्राभरणैस्सह अन्येन सङ्गता क्वाप्यगमत्. वनमार्गे गृहीतापि परैर्मां प्रहार्य कुत्रापि गता. सम्मर्दकाले मया छिन्नमेकं पीताम्बरखण्डं एकं कटकञ्च लब्धम्. तदिदं सर्वं भाण्डायनोयञ्जानाति.

भाण्डायनः—[2] देव ! सर्वमेतदेवमेव.

धन—[3] सा तु बहूनि दिनानि कुत्रचिदतिवाह्य प्रत्यागता मद्विज्ञप्तेन नागरिकेण गृहीता. सेदानीं प्रभुणा सवस्त्राभरणा मद्वशे स्थापनीया. एष मे व्यवहारः.

रा—भवतु. अपराधिन्याहूयताम्.

---

[1] देव्व नेसधित्ति अम्हप्पडिवेसिणी मं वरएऊण अम्हवसे चिट्ठन्दी कहिचि वत्थाहरणेहिं सह अण्णेण संगदा कह्नवि गच्छेहि. वणमग्गे गहिदा वि परेहिं मं पहरेऊण कहिवि गदा. सम्मद्दकाळे मए छिण्णं एक्कं पीदम्बरखण्डं एक्कं कडअं अ लद्धं. तं णं सव्वं भाण्डायणो अयं जाणेदि.

[2] देव्व सव्वं एदं एमेअ.

[3] सा दु बहूइ दिणाइ कहिवि अदिवाहिअ पच्चाअदा अम्हविण्णाविदेण णाअरएण गहिदा. सा एण्हि पहुणा सवत्थाहरणा अम्हवसे ठावणिज्जा. एसो मे ववहारो.

लेखा—(पुनरुच्चैः) अपराधिनी नैषधी. (ततः प्रविशति राजभृत्यैः परिवार्यमाणा वस्त्रेण मुखमाच्छाद्य रुदती ससखी च देवी.)

वेत्रिणामेकः—[1] मूढे! मुखम्मुन्नमय. किमद्य रोदनेन?

अन्यः—वराकि! [2]अपराधिस्थानं प्रविश. कुतः कोणं जिगमिषासि?

देवी—भद्र! नाहं बहुपुरुषपरीतं स्थानं प्रवेष्टुं समर्थास्मि.

अपरः—[3]किन्तर्हि धनमपहर्तुमन्यङ्गन्तुञ्च समर्थासि?

दे—(कर्णौ पिधाय) शिवशिव! हा! कोयङ्कालः?

परः—[4] बन्धकि! जानामि ते शीलम्. मा प्रलप. गच्छ अपराधिस्थानमध्यम्. अन्यथा लगुडेन ताडयेयम्.

दे—(तूष्णीमधोमुखी परिक्रामति.)

रा—(दृष्ट्वा साश्चर्यं सबहुमानञ्च)—

कनकद्रवेण कनतीव लेपिता
तनुशोभयैव तनुतेऽवकुण्ठनम्।
परिवेष्टिता च परितोपि वेत्रिभि-
र्वनिता वसिष्ठवनितेव भात्यसौ ॥३॥

---

[1] मूढे मुहं उन्नवेहि. किं अज्ज रोअणेण?

[2] वराइ अवराहिट्ठाणं पविसेहि. कुदो कोणं जिअमिसंसि?

[3] किं तरिहि धणं अवहरेदुं अण्णं गमिउं अ समत्था सि?

[4] वड्ढइ जाणामि दे सीलं. मा पलवेहि. गच्छेहि ओराहिट्ठाणमज्झं. अण्णह्णा लउडेण ताडेमु.

तदेतादृशी कथमेवं कृतवतीति सन्दिग्धे मे मनः.

(सर्वे साधुसाध्विति अनुमन्यन्ते.)

राजा—भवतु विचारयिष्यामः. (मध्ये कोष्युत्थायोर्ध्वमुखीभूय,) स्वामिन्नयमहमत्र विवादिपक्षे विवादनिवेदकोस्मि.

रा—(साङ्गीकारम्) लेखायन! लिख्यतामयं चण्डवर्मात्र निवेदक इति.

लेखायनः—(लेखनमभिनयति.)

राजा—चण्डवर्मन्! तर्हि प्रष्टव्यं पृच्छचताम्. निवेद्यञ्च निवेद्यताम्.

चण्डवर्मा—(तथेति देवीं दृष्ट्वा) अयि! अपि सत्यं वदसि?

देवी—सत्यमेव ब्रवीमि.

चण्ड—किं त्वं नैषध्यसि?

देवी—अथकिम्.

चण्ड—किन्तत्रभवा? उत तत आगता.

दे—तत आगतैव.

चण्ड—किन्ते पितुर्नाम?

दे—गुरोर्नाम न गृह्णीयाम्.

चण्ड—तर्हि किन्ते पत्युर्नाम?

दे—तदपि न गृह्णीयाम्.

चण्ड—अवश्यमन्यतरद्वक्तव्यमेव.

रा—मा निर्बध्नीह्येनाम्. यदुच्यते तद्ग्राह्यम्.

चण्ड—विधेयोस्मि राजानुशासनस्य. अयि नैषधि! कियत्ते वयः?

देवी—तदपि न वदामि.

चण्ड—तर्हि किं न किञ्चिद्ब्रवीषि?

मित्रादिनी—[1] महाभाग! न तथा. त्वमपि यदनुद्यं यच्च गोप्यं तदेव पृच्छसि खलु?

चण्ड—(सकिञ्चित्कोपम्) अयि! का त्वम्?

मित्रा—[2] मित्रादिन्यस्मि.

चण्ड—मित्रादिनी वा पत्रादिनी वा भव. अस्यास्तव च कस्सम्बन्धः?

मित्रा—सोदरीभाव एव.

चण्ड—(सामोदम्) अयि नैषधि! अपि नामास्यास्त्वं सोदरी?

दे—अथकिम्?

चण्ड—अयि मित्रादिनि! त्वं कस्य दुहितासि?

मित्रा—[4] वीरदेववर्मणो वणिक्प्रवरस्य.

चण्ड—स कुत्रस्थः? किं वृत्तश्च?

मित्रा—[5] सोस्मिन्नेव चेदिपुरे कुलक्रमागतेन गोधूमपिष्टविक्रयणेन जीवन् वर्षत्रयात्पूर्वं देवभूयं गतः.

---

1 महाभाअ न तह. तुमं वि जं अणुज्जं जं अ गोवणिज्जं तं एव्व पुच्छेसि खु?

2 मित्ताइणिम्हि.

3 सोअरीहावो एव्व.

4 वीरदेव्ववम्मस्स वणिप्पवरस्स.

5 सो अस्सिं एव्व चेइवुरे कुलक्कमाअदेण गोहूमपिट्ठविक्कअणेण जीवमाणो वरिसत्तयादो पुव्वं देव्वहूअं गदो.

चण्डवर्मा—त्वं कुत्र वससि? इयश्च क्व?

मित्रादिनी—[1] मत्पितृगृहे मन्मात्रा सह वसाम्यहम्. इयं च तत्रैव.

चण्ड—नैषधि! किमनया सह वससि?

दे—अथकिम्.

चण्ड—अयि मित्रादिनि! इयन्ते भगिनी केन परिणीता?

मित्रा—[2] न जाने.

चण्ड—अस्तु तर्हीयं ऊढा वा अनूढा वा?

मित्रा—[3] तदपि न जाने. (सर्वे हसन्ति.)

चण्ड—अपि जानासि इमं धनसेनम्?

मित्रा—[4] कथं प्रातिवेशिकं न जानामि?

चण्ड—कियन्तं कालं स्थितवतीयं अस्य गृहे?

मित्रा—[5] न जानामि.

राजा—एवं न प्रष्टव्यम्. लेखायन! अत्र किञ्चिच्चिन्हं क्रियताम्.

चण्ड—प्रभो! क्षम्यताम्. मास्त्वेवायं प्रश्नः. मित्रादिनि! त्वयेयं यदा कदा वा किमेतद्गेहस्था दृष्टा?

---

[1] अम्हपिअरघरे अम्हमाआए सह वसेमि हं. इमा अ तह्नि एव्व.

[2] ण जाणेमि.

[3] तं वि ण जाणेमि.

[4] कहं पाडिवेसिअं ण जाणेमि.

[5] ण जाणेमि.

मित्रा—[1] कदाचित्पानीयार्थं मया सहेयं (इत्यर्धोक्ते)

चण्ड—अलमुपोद्घातेन. तत्रस्था दृष्टा वा न वा?

मित्रा—[2] दृष्टा.

चण्ड—अलम्. अयि नैषाधि! अपि जानासीमं धनसेनम्?

दे—न जानामि.

चण्ड—अपि प्रातिवेशिकइति वा जानासि?

दे—तदपि न जानामि.

चण्ड—अपि तद्गृहं वा जानासि?

दे—तच्च न जानामि.

रा—(स्वगतम्) इयम्प्रातिवेशिकी चेत्कथमस्य वेश्मापि न जानीयात? न जानामीत्येकं वचनम्परं केनाप्युपदिष्टपूर्वं स्यात्.

चण्डवर्मा—तर्हि क्व ते पतिः?

देवी—न जानामि.

चण्ड—स कीदृशः.

दे—स महानुभावस्सत्यसन्धश्च.

चण्ड—अप्ययमपि धनसेनः तादृशः?

दे—न जानामि.

धनसेनः—(चण्डवर्मणः कर्णे एवमिव.)

चण्ड—(सशिरःकम्पम्) मित्रादिनि! त्वया धृतमिदं पीताम्बरं कुतस्त्यम्?

---

[1] काहेचि पानीअत्थं मए सह इमा.

[2] दिट्ठा.

मित्रा—[1] अनयैव दत्तम्.

चण्ड—नैषधि! अपीदं दत्तं त्वया?

दे—अथकिम्.

चण्ड—तर्हि इदं तव केन दत्तम्?

दे—आकाशात्पतितमिति केन चिन्महर्षिणा दत्तम्.

(सर्वे अन्तरेव हसन्ति.)

रा—(स्वगतम्) अनृतेर्ष्यौचित्येन भवितव्यम्.

चण्ड—नैषधि! त्वद्दक्षिणकरधृतमिदं वलयं कुतस्त्यम्? किमिदमप्याकाशात्पतितम्?

दे—नहि नहि. मत्पतिदत्तमिदम्.

चण्ड—मित्रादिनि! त्वं दूरं गच्छ. (वेत्रिणः तां दूरं नयन्ति.)

चण्ड—(धनसेनस्य करात्कटकमादाय) नैषधि! अपीदं जानासि? (इति प्रदर्शयति.)

दे—(समादाय स्वकटके सन्निधाप्य दृष्ट्वा सशिरःकम्पम्) इदं मया धृतपूर्वमेव.

चण्ड—तर्हि इदं तव केन दत्तम्?

देवी—मत्पतिनैव.

चण्ड—कथमेकवलयासि?

देवी (वामहस्तं दृष्ट्वा) सत्यम्. कथमेकवलयास्मि? (इति चिन्तयति)

---

[1] इमाए एव्व दिण्णं.

चण्ड—अलमनृतकल्पनचिन्तनेन. झटिति प्रतिब्रूहि.

दे—(स्मृत्वा) कस्मिंश्चित्प्रियाख्यानावसरे मया मित्रादिन्यै पारितोषिकतया प्रदत्तमिदम्.

चण्ड—कियद्धनमस्ति ते?

दे—न किञ्चिदपि.

चण्ड—तर्हि तादृशी त्वं महाधनिनामप्यलभ्यमिदं कटकमस्यै पारितोषिकं कृतवतीति कथं प्रत्येतव्यमेतत्?

देवी—न जानामि. अथवा पृच्छ्यतां मित्रादिनी.

चण्ड—अस्तु. तदपि पश्यामः. अयि मित्रादिनि! इत आयाहि. (वेत्रिणस्तामानयन्ति.)

चण्ड—(तत्करे वलयं दत्वा) अपीदं जानासि?

मित्रा—[1] अद्य परं जानामि.

चण्डवर्मा—पूर्वं कदापि किमदृष्टं त्वयेदम्?

मित्रादिनी—[2] न दृष्टमेव.

चण्ड—भवतु. अपि कदा वा त्वमस्याः करात्किमपि पारितोषिकं गृहीतवती?

मित्रा—[3] इयन्तावत्कदाचित् चोरापहृतवसनायै मह्यं पीताम्बरमिदमेकं प्रदत्तवती, नान्यत्.

---

1 अज्ज परं जाणेमि.

2 ण दिट्ठं एव्व.

3 इमा दाव काहेचि चोरओहारिदवसणाए मह पीअम्बरं इणं एक्कं पदत्तवई, ण अण्णं.

दे—अयि ! किमेवं विस्मरसि ?

चण्ड—अयि ! वाग्भङ्गया कथमस्यै विस्मरणवादं सूचयसि ? अलमत्युक्त्या. तिष्ठ तूष्णीम्.

दे—(पर्यश्रुमुखी तिष्ठति.)

चण्ड—कृतं ते कपटरोदनेन. पश्येदानीम्. (धनसेनकरात्पीताम्बरखण्डमादाय दर्शयन्) कस्येदम् ?

दे—(समादाय स्ववस्त्रार्धे समायोज्य दृष्ट्वा) कथं मदीयमेवेदम् ? (सानुस्मरणं) हा नाथ ! किमेवमकरोः ? (इति रोदिति).

चण्ड—नाथस्त्वत्कपटं प्रकटितवान्. अलं रुदित्वा.

(सर्वे साकूतं परस्परमालोकयन्ति.)

चण्ड—भवतु. केनेदमंशुकं छिन्नम् ?

दे—वने मत्पतिनैव.

चण्ड—भवतु. अपीदं दक्षिणकरस्थं कटकमस्मै समर्प्य निर्गन्तुमनुमनुषे ?

दे—अवश्यं ददामि, यद्येवं कृतार्था स्याम्.

चण्ड—अलम्. लेखायन ! लिख्यतामिदम्. प्रभो ! प्रष्टव्यमवसितम्. इतो निवेद्यं निवेद्यते.

राजा—अस्तु.

चण्ड—इयं नैषधी तावत् भयाच्छलाद्वा पितुः पत्युश्च नाम

अनिर्दिशन्त्यपि मित्रादिन्याः भगिनीत्वं अनया सहैकगृहवासित्वञ्च अभ्युपगच्छति. मित्रादिनी तु स्वपितुर्नाम निर्दिश्य धनसेनस्य प्रातिवेशिकत्वं ब्रवीति. एवञ्चेयं नैषधी अत्रत्यवीरदेवतनयेति धनसेनस्य प्रातिवेशिकीति च निश्चीयते. किञ्चेयं स्वधृतपीताम्बराञ्चलं वने स्वपतिनैव च्छिन्नमित्युररीकरोति. धनसेनोपि तदेतत् वने स्वेनैव च्छिन्नमिति पूर्वमेव निवेदितवान्. साक्ष्यपि एवमेवेदमिति वदति. अनेन सन्दर्भेणापि अनयोः पूर्वसम्बन्धो ज्ञाप्यते. किञ्चेयं मित्रादिनी तु सुवचमपि स्वभगिन्याः पतिं ऊढात्वमनूढात्वं चाब्रुवाणापि 'नैषधी धनसेनगृहे स्थिता दृष्टा'. इत्यङ्गीकरोति. इयं नैषधी तु, स्वेन यदृच्छादृश्यमपि इमं लोकविदितं धनसेनं अस्य प्रातिवेशिकत्वं एतद्गृहं वा न जानामीत्यपलपन्त्यपि, पीताम्बरमाकाशात्पतितमित्यसम्बद्धं आलपन्त्यपि, करस्थकटकं पतिदत्तमित्यनुमन्यते. कटकपीताम्बरादिकन्तु धनसेनीयमेवेति साक्षिवादसिद्धमेव. एवञ्च प्रातिवेशिकीं रूपवतीं चैनां ऊढामनूढां वा कामयमानो महाधनो धनसेनः कदाचित्स्वभोगिनीं कृत्वा कटकपीताम्बरादिभिरलङ्कृतवानिति निर्णीयते. अपरञ्चेयं निषधेभ्यस्स्वयं समागतेति स्वपतिर्महानुभाव इति तद्वसतिं न जानामीति च ब्रुवाणा, रत्नवलयं धनसेनाय समर्प्य निर्गन्तुमवश्यमनुमन्यते. एतैः कारणैः, इयं केन चिन्निमित्तेन वैमनस्ये सति धनसेनं विहाय निषधानासाद्य तत्र गुणाधिकं कञ्चित् कामयमाना, केन चिन्निमित्तेन तेन त्यक्तापि गुणवानिति तत्रैवानुरक्ता, तमनासाद्य गत्यन्तराभावादत्रा-

गता नागरिकेण गृहीता च. इति व्यक्तं भवति. यदि वलयं धनसेनीयं न स्यात्, तदा कथमस्मै प्रत्यर्पणमनुमन्येत?

एवञ्च परानुरक्तेयं तत्रैव गन्तुकामा धनसेनमजानानेव निरस्यति. कल्पयति च मिथ्यावादान्. प्रत्यक्षसिद्धमेवेदम्, यथा धनसेनस्थं-रत्नवलयमपलपितुं एकं वलयं सोदर्यै पारितोषिकं कृतमिति ब्रूते. सा तु नैव दत्तं न दृष्टञ्चैतदिति निराकरोति. इत्यादौ पर्यालोच्यमाने स्वयमियमनृतवादिनीति घण्टाघोषन्यायेन सिद्ध्यति. तदेतद-न्याय्यमालोच्य लोकरक्षणार्थं नारीणां एवंविधदुष्प्रवृत्तिनिरोधनार्थं च इयमवश्यं दण्डनीया. सवस्त्राभरणा धनसेनवशे स्थापनीयेति च अभ्यर्थ्यते. (इति निवेद्य तूष्णीं स्थितः.) (पौरास्सर्वेऽपि तं साधु-साध्विति श्लाघन्ते.)

राजा—अयि नैषधि! अपि नामास्ति ते किमपि विज्ञापनीयम्?

देवी—न किमपि.

रा—तर्हि किं धनसेनवशे स्थातुमनुमन्यसे?

देवी—कोऽसौ दुरात्मा? कथमनुमन्ये?

रा—अयि धनसेन! न पाणिगृहीती इयं ते, अन्यानुरक्ता च. तत्त्वदीयं स्वं स्वीकृत्य किमेनामुत्स्रष्टु मनुमन्यसे?

धनसेनः—[1]देव! बहुधनव्ययं कारितवती इयम्. अन्यानुरक्तेति

---

[1] देव्व बहुधणव्वअं कारिअवदी इमा. अण्णाणुरत्तेत्ति जइ इमं ऊसडमु,

यदीमां उत्सृजेयं, तदा स्त्रीजित इत्यपमानो मे भविष्यति. अतो नोत्स्र ष्टुमनुमन्ये.

रा—(स्वगतम्) न तावदद्यैव प्रकटयिष्यामि स्वाभिप्रायम्. (प्रकाशं) (पार्श्वतोवलोक्य.) प्रकाशयन्तु स्वाभिप्रायं न्यायदर्शिनः पौराः.

न्यायदर्शिनः—(साञ्जलिबन्धम्) देव! तत्रभवता चण्डवर्मणा विस्पष्टतरमभिहितमेव सर्वं व्यवहारपदम्. अतः सवस्त्राभरणा नैषधी धनसेनवशे स्थापनीयेति न्याय्यमेवैतत्.

राजा—भवतु. लेखायन! वाच्यताम्. नागरिकेण प्राड्विवाकशठमतिना कीदृशो निर्णयः विलिख्य प्रेषितः?

लेखायनः—(सरभसं लेखानावर्त्य) प्रभो! श्रूयतामिदम्. "इयं नैषधी तावद्बहुधा विचारितापि कपटवादिनी परवञ्चनापरा च. अतो गोमुखव्याघ्रीव ज्ञायते. तस्माद्यावज्जीवमनया भर्तुर्धनसेनस्य स्वाधीनया भवितव्यम्." इति.

रा—भवतु. गुरो पुरोधस्सत्यायन! उच्यतां युष्मदभिप्रायः.

सत्यायनः—श्रूयताम्—

क्षीरनीरवदाभाति सत्यानृतमिदं प्रभो ।
राजहंसं विहायान्यः प्रविवेक्तुं क्षमेत कः ॥४॥

ताहे इत्थिआजिओत्ति ओमाणो मे हविस्सदि. अदो ण ऊसट्ठुं अणुमण्णेमि.

राजा—आर्य अमात्य प्रज्ञासिन्धो! व्यवहारेऽस्मिन् कीदृशस्त्व-दभिप्रायः?

अमात्यः—देव! तत्रभवता चण्डवर्मणा साधु साधितस्स्वपक्षः. तथापि अस्याः कथमियं भगिनी? कोऽस्याः पतिर्महानुभावः? कथमाकाशात्पतितं पीताम्बरम्? इत्यादि बहुधा विवेचनीयमस्ति. प्रतिव्यवहारनिवेदकश्च न नियमितवतीयं तपस्विनी. अतः इदमति सन्दिग्धं वर्तते.

रा—ममाप्येवमेव हृदि. अतस्साधु विचार्य निर्णेष्यामि.

देवी—(निःश्वस्य) हा देव! मां किमेवमतिकष्टे पातितवानसि? एवमपमानान्मरणमेव मे वरम्. हा जननि नयनानन्दिनि नन्दे! त्वदुदर-जातायाः मे कथमेवंविधः परिणामः? (इति रोदिति.) (पौरजनम-ध्यात्कश्चिदुत्थाय ब्राह्मणः) कथं दमयन्तीस्वर इव श्रूयते? (सरभस-मुपसृत्य निपुणमालोक्य स्वगतं) सत्यमनितरसाधारणेन महाभाग्य-सूचकेन च भ्रूमध्यगतेनानेन पिप्लुना सैवेयम्. (प्रकाशं) वत्से! अपि प्रत्यभिजानासि माम्?

देवी—(दृष्ट्वा सविस्मयं सोल्लासश्च) कथं न जानामि बाल्यगुरुम-न्तःपुरोपाध्यायं सुदेवं भवन्तम्? गुरो! अभिवादये.

सुदेवः—आयुष्मति! सकलं भद्रमस्तु ते.

राजा—द्विजवर! इत आयाहि. ब्रूहि, कस्त्वम्? इयञ्च का?

सुदेवः—राजन्! विदर्भाधिपतेर्भीमराजस्य अन्तःपुरोपाध्यायोहं सुदेवः. द्यूतजिते नले सहभार्ये वने विलीने तदन्वेषणाय राज्ञा

वैदर्भेण प्रहितेषु हितेषु तेषुतेषु एकतमोहमिहागतः. इयञ्च ते मातृभगिन्याः नन्दायास्सुता वैदर्भी दमयन्ती.

रा—तर्हि ममापि भगिनी महाराज्ञी च. (हस्तेन हस्तं निष्पिष्य सरभसमासनादवतरति.) (सर्वेपि विस्मयस्तिमिताः प्राञ्जलयस्समुत्तिष्ठन्ति.)

रा—(साञ्जलिबन्धं) महाराज्ञि! अपराद्धोस्मि. क्षम्यताम्.

देवी—न कोप्यपराधः.

रा—इदमासनमलङ्क्रियतां देव्या.

दे—नाहमासने निषीदामि. विचार्यतां व्यवहारशेषः.

रा—यथाज्ञापयति देवी. (मित्रादिनीं धनसेनं भाण्डायनं च निर्दिश्य) अये! यूयमपराधिनस्स्थ. सत्यं ब्रूत. अन्यथा हनिष्यध्वे. (त्रयोपि भीता वेपन्ते.)

मित्रादिनी—(सभयदैन्यं साञ्जलिबन्धञ्च) देव! श्रूयताम्, कदाचिदनया सह वने सङ्गताहं सख्यमकरवम्. कस्मिंश्चित्प्रसङ्गे प्रसन्नयानया कटकपीताम्बरे मह्यं पारितोषिकतया दत्ते. ततस्सायमस्यां सन्ध्यां वन्दितुं निर्झरं गतायां मृगयार्थमागतो पुष्करो राजा समागत्य तमसि बहुधा मां सान्त्वयन् पटगृहवाटीपरिसरमुपनीय

---

[1] देव्व सुणीअदु, काहि चि इमाए सह वणे संगदा अहं सख्खं काहिअ. कास्सिंचिप्पसंगे पसण्णाए इमाए कडअपीअंबराइ पारितोसिअदाए दिण्णाइ. तदो साअं इमाअ संझं वंदेदुं णिज्झरं

दीपप्रभायां विग्रां विकर्णाञ्च मामवलोक्य हीहीति विसृजन् अवशिष्टकर्णनासमूलच्छेदनार्थमनुद्रवन्नपि अन्तरा विचिन्त्य "अयि! त्वत्सहचारिणीं तां यदि मे सङ्घटयेः, तदा शतं ते ग्रामान् दद्याम्." इति प्रलोभितवान्. ततस्तथेत्यङ्गीकृत्याहं छद्मना एनां मद्गृहमनैषम्. ततः प्रतिवेश्मस्थितामेतामालोक्य कामयमानोऽयं धनसेनः मया विक्रीयमाणं तदेतत्कटकमेतदीयं विज्ञाय स्वयमेव क्रीत्वा मामुपह्वरे समाहूय सहस्रं मे रूप्याणि दत्वा "मित्रादिनि! त्वद्गृहगतां युवतिं मे सङ्घटय. कटकमिदं तया दत्तमिति कुत्रापि मा वद." इति मां प्रबोध्य भाण्डायनेन सह सम्मन्त्र्य एनं व्यवहारं कल्पितवान्. श्रुत्वा देवः प्रमाणम्. (इति प्रणम्य वेपमाना तिष्ठति.)

गदाइ मअअत्थं आअदो पुक्खरो राआ समागदुअ तमे बहुहा मं संतेमाणो पडघरवाडीपारिसरं उवणेऊण दीवप्पहाए।विग्गं विकण्णं अ मं ओलोइअ हीहित्ति विसजमाणो ओसिट्ठकण्णणासमूळच्छेदणत्थं अणुद्दवन्तो वि अन्दरा विंचिदिअ "ए! तुम्हसहआरिणिं तं जइ मे संघडेसु, ताहे सदं दे गामा दामु, इअ पलोहिदवो. तदो तहेत्ति अङ्गीकदुअ अहं छउमेण णं अम्हघरं णेहिअ. तदो पडिवेसट्ठिअं एअं आलोइअ काममाणो अयं धणसेणो मए विक्कणइज्जमाण तं एअं कढअं एअकेरं विजाणिअ अप्पणा एव्व कीणिउणं मं उवहरे समाहूइअ सहासं मे रुप्पाइ दाऊण 'मित्तादिणि तुम्हघरगअं जुवइं मे संघडेसु कडअं इदं ताए दिण्णंति कहवि मावदेसु." इअ मं पबोहिअ भंडाअणेण सह सम्मंतिअ एअं ववहारं कप्पिदवो. सोत्तूण देव्वो पमाणं.

राजा—मित्रादिनि! अन्वर्थनामधेयासि. (इति सकोपमुद्धतश्च धनसेनं पश्यति.)

धनसेनः—(सभयं प्रणम्य) [1] देव! अनयाभिहितं सर्वमेतदेवमेव.

रा—पीताम्बरखण्डं त्वया कथं समासादितम्?

धन—(सभयकम्पम्) [2] देव! मधुविक्रयिणा केनचिद्व्याधेन विन्ध्याटव्यां दवाग्निदग्धे भूतले पतितमित्यभिधाय विक्रीतं मह्यम्. तदिदं प्रतिवेशमस्थायास्तत्रभवत्याः खण्डपटसदृशमिति यदा निरचिनवं, तदा मे कापि राजसी बुद्धिरुदभूत्. ततः भाण्डायनसाहाय्येन एवमसदाचरन् नागरिके विज्ञापितवानस्मि. तेन तथा व्यवस्थाप्य वस्त्राभरणप्रत्यर्पणं नाज्ञप्तम्. अतस्तदपि लभेयेत्याशया देवसन्निधौ व्यवहारमिममानयन् एवमनर्थे पतितोऽस्मि. क्षन्तव्योऽस्मि च प्रभुणा.

राजा—क्षान्तमेव मया. मास्तु वधः. लेखायन! लिख्यतामेते त्रयोऽपि सर्वस्वमपहृत्य राष्ट्रादस्मान्निर्वास्या इति.

---

[1] देव्व इमाए अहिहिअं सव्वं एदं एव्वेअ.

[2] देव्व महुविक्कइणा केणचि वाहेण विंझाडवीए दवग्गिदड्ढे भूदले पडिअं एदं इअ अहिहादूण विक्कीणिदं मह. तं इदं पडिवेसट्ठिदाए तत्त होदीए खंडपडसरिसंति जाहे णिच्चणहिअ, ताहे मे कावि राअसी बुद्धी उहवीअ. तदो भण्डायणसाहय्येण एव्वं असंतं आअरन्तो णाअरिए विण्णाविदवोम्हि. तेण तह ववत्थाविअ वत्थाहरणप्पच्चप्पणं णाणत्तं. अदो तं वि लहेज्जाइअ आसाए देव्वसण्णिहिम्हि ववहारं णं आणेअन्तो एव्वं अणत्थे पडिदोम्हि. खन्दव्वोम्हि-पहुणा.

देवी—(सानुकम्पम्) मैवम्. कटकपीताम्बरखण्डे धनसेनायैव प्रत्यर्प्य एते त्रयोपि निरपायं स्वस्वगृहं प्रेष्यन्ताम्.

रा—(साश्चर्यम्) देवि! कथमत्यपकारिणामप्येवं दयसे?

दे—(राजाभिमुखीभूय) वत्स सुबाहो! श्रूयताम्—

अपकारिणामपकृता-
दुपकारश्चेदशस्त्रवध एषः ।
अपिचायं तान्नीतिं
नेतुं स्याद्गुरुरुपदेशः ॥ ९ ॥

(ततः प्रविशति पटाक्षेपेण दौवारिकी.)

दौवारिकी—[1] महाराज! त्वर्यताम् त्वर्यताम्. महादेवी माता ते सुनन्दा भवन्तं शिरसि समाघ्राय समाज्ञापयति, "मज्ज्येष्ठभगिन्याः नन्दायाः दुहिता वत्सा दमयन्ती समायातेति श्रुत्वा द्रष्टुमुत्सुकितं मे मनः. तत्त्वरितं समानीयताम्." इति.

रा—देवि! त्वन्मातृभगिनी त्वां द्रष्टुमुत्कण्ठते.

दे—इयमहमागच्छामि. यदद्य बहुशङ्काकलङ्कोपहतापि अशङ्कनीयास्मि संवृत्ता.

---

[1] महाराअ तुवरेदुतुवरेदु. महादेई माआ दे सुणंदा भवंदं सिरे समग्घाऊण आणावेदि 'अम्हतेट्ठबहिणीए णंदाए दुहिदा वच्छा दमअन्दी समाआदेत्ति सुणिअ दट्ठुं उच्छुइदो मे मणो. तं तुवरिअं समाणेईदु. इअ.

रा—युक्तमेवेदम्—

यद्यस्ति सत्यं मनुजेषु दोष-
शङ्काशतेनापि न हानिरेषाम् ।
दिवि स्थिते पूषणि मेघबृन्द-
पिधानमात्रेण निशा भवेत्किम् ॥ ६ ॥

(सर्वे साधुसाध्विति संश्लाघन्ते.)

राजा—देवि ! इतइत.

देवी—वत्स ! सुबाहो ! त्वरितं गच्छ. देवीं सत्यव्रतोत्सुकां द्रष्टु मुत्सुकिताऽस्मि.

(इति परिक्रम्य निष्क्रान्तास्सर्वे.)

इति भैमीपरिणये अष्टमोऽङ्कः.

ओं तत्सत्.

अथ नवमोङ्कः.

(ततः प्रविशति सत्यव्रतः.)

सत्यव्रतः—अयमहमिदानीं सर्वां माध्याह्निकीं क्रियां परिसमाप्य स्वयमतिथिसङ्ग्रहार्थमागतोस्मि. (सविस्मयानन्दम्)

आतिथ्यं मुनयो वदन्ति गृहिणां धर्मं परं साधु त-
त्सोहं प्रत्यहमादरेण कलयन् श्रान्ताध्वगान् प्रीणये ।
पक्वास्संस्कृतभक्ष्यभोज्यनिकराः पात्रेषु खारींपचे-
ष्वद्याप्यत्र दिने तु कश्चिदपि किं नेत्रातिथिर्नातिथिः ॥१

तदद्य पथिकजनगतागतोचितेऽस्मिन् गङ्गातीरपथे समुपविश्य समन्वेषयामि परलोकबन्धून्. (इति मन्त्रान् जपन् तिष्ठति. नेपथ्ये) हा प्रिये ! क्वासि ? कं वा लोकमलङ्करोषि ?

सत्य—(श्रुत्वा) कोपि प्रियाविरहितः समायातीव.

(दृष्ट्वा सखेदकरुणम्)

उद्ग्रन्थिलाखिलतनुः कुटिलोरुजङ्घः
कूर्मोदरः कुतुपकल्पमुखस्तिलाक्षः ।
खर्वाङ्गुलिः करतलेन कशां विधून्वन्
कुब्जोयमेति कुतएष कृतो विधात्रा ॥ २ ॥

(ततः प्रविशति यथानिर्दिष्टरूपो राजा.)

राजा—हा प्रिये! क्वासि? कं वा लोकमलङ्करोषि? देहि मे प्रतिवचनम्. (विमृश्य) हाहा सर्वथा विफलीकृतजीवितोस्मि दैवेन. (सानुस्मरणं सपरितापश्च)

घोरे वने तमसि तां दयितां निशीथे
सुप्तां त्यजन् हृदि तदा पृथु मान्द्यमापम् ।
क्रव्याद्गणेन गिलिता गलिताथवा सा
भूयोपि तां शशिमुखीं कथमीक्षिता स्याम् ॥ ३ ॥

अहो! पूर्णो मयि दुर्विधेः कटाक्षविक्षेपः. यतः खलु मे,

राज्याद्भ्रंशः पुत्रयोर्विप्रयोगः
पक्षिव्रातैरुत्तरीयापहारः ।
पत्नीत्यागः पन्नगाद्रूपहानिः
सर्वं चैतद्दुर्विधेर्दोर्विलासः ॥ ४ ॥

किञ्चाहमहो! अद्य परप्रेष्यताञ्च गमितोस्मि. किमितोप्यधिकमनुभावयेद्दुर्विधिः? प्राणाः परं वज्रकीलायन्ते मे हृदि. हा देवि! स्वयंकृतेऽपराधे कथमनुरोदनेन लभेय त्वाम्? सर्वथा निश्शरणोस्मि. हा देवि! (इति मूर्छति.)

सत्यव्रतः—(ससम्भ्रममुपसृत्य) अयि भोः! समाश्वसिहि समाश्वसिहि.

राजा—(समाश्वस्य दृष्ट्वा) कथमस्मिन्नरण्यभागेपि महानुभावेनानेन श्रोत्रियेण समाश्वासितोस्मि? पूतोस्मि च.

सत्य—महाभाग! कस्त्वं? कुतोऽभ्यागतोऽसि?

राजा—भो महानुभाव! श्रूयतामयमहं बाहुकोनाम कोसलाधिपतेर्महारजऋतुपर्णस्य सारथिः अश्वशिक्षाविचक्षणः. स्वयमश्वान् चारयितुं अयोध्यातः सुदूरमागत्य रथमश्वांश्च शाद्वले नियम्य मनोविनोदनार्थं इतस्समागतोऽस्मि.

सत्य—अयि बाहुक! कुतश्चिन्तापरवश इव दृश्यसे?

बाहुकः—(सलज्जं आत्मगतम्) अनेन ज्ञातोस्मदभिप्रायस्स्यात्. भवत्वेवं तावत्. (प्रकाशं)–

कार्यस्य चिन्ता करणस्य चिन्ता
कामस्य चिन्ता कलहस्य चिन्ता।
धनस्य चिन्ता निधनस्य चिन्ता
चिन्ताविहीनो न हि कश्चिदस्ति॥ ५॥

सत्य—सत्यंसत्यम् एवमेव लोके.

बाहुकः—अथ तत्रभवन्तं भवन्तं कमवगच्छतु अयञ्जनः.

सत्य—श्रूयताम्–

सत्यव्रतो नाम महीसुरोऽहं
संसारवाराान्निधिमुत्तितीर्षुः।
पयोधिकन्यापतिपादपद्म-
मरन्दधारातटमाश्रितोस्मि॥ ६॥

बाहुकः—(सप्रश्रयम्) कृतार्थोसि. कस्मात्पुरादागतो भवान्?

सत्य—नैषध्याः राजधान्याः.

बाहुकः—(निपुणमालोक्य स्वगतम्) अहो ! कृतज्ञः कृतार्थश्चायममात्यप्रज्ञाशेखरएव. (प्रकाशम्) साधो ! तर्हि निर्भीकएवासि संसारसागरात्.

सत्य—कोयं संसारस्संसारो नाम अस्माकम्? श्रूयताम्

जाग्रत्सु जन्होस्तनयाजलेषु
शीर्षेषु शम्भोः द्रुषु विल्वकेषु ।
अकुण्ठितेष्वाङ्घ्रिकरादिकेषु
कृताभया एव कुतो भयं नः ॥ ७ ॥

बाहुकः—अहो ! नास्माकमेतादृशी विरक्तिः. साधो ! कृतार्थोसि.

सत्य—अस्त्वेतत्. समनुगृह्यतामस्मत्कुटीरं आतिथ्यग्रहणाय.

बाहु—(सविनयं) महाभाग! क्षम्यताम्. राजान्नभोजिनोवयम्. अनभ्यस्तकन्दमूलाशनाः.

सत्य—मास्तु तत्. सिद्धान्येव खलु मद्गृहे मृष्टान्नानि.

बाहु—अस्मिन्नरण्यभागे कथं मृष्टान्नानामवकाशस्ते?

सत्य—श्रूयतां वनस्थेनापि मया तावदन्यान् जीवनोपायान् परवञ्चनापर्यवसितानपहाय स्वयमतिथिप्रीणनार्थमेव सर्वोत्तमा कृषिरवलम्बिता

बाहु—कथं कृषिरेव सर्वोत्तमो जीवनोपाय इति?

सत्य—श्रूयताम्—

वाणिज्यं स्थितवस्तुसंविनिमयो नो निर्मितिर्नूतना
सेवा चाधिकृतिश्च ते परजनाच्छक्त्या धनाकर्षणम् ।
शिल्पश्चापि तथैव किन्तु हृदये किञ्चिद्विकासास्पदं
प्राणाधारतया स्थिता कृषिरियं नोचेन्नकोप्युच्छ्वसेत् ॥८

बाहु—साधु समर्थितं, अपूर्वनिष्पादनरूपतया कृषिरेव सर्वोत्तमा वृत्तिरिति. तदाश्रितस्त्वं सर्वाधिकोऽसि. पश्य—

स्रष्टासि सर्वमपि नूतनवस्तु भोज्यं
अन्योपयोगकलनात्परिपालकोसि ।
दारिद्र्यसृष्टिदलनेन महेश्वरोसि
स्वातन्त्र्यमाश्रयसि नित्यसुखात्मकोसि ॥ ९ ॥

तदेतादृशे भगवता प्रदर्शितेपि सति जीवनोपाये बहवः किल कृषिमनाश्रिताः वृथा खिद्यन्ते.

सत्य—सत्यंसत्यं पश्य—

इयम्भूमिरिमे मेघाः सरिदेषा भुजाविमौ ।
तदेतद्व्यर्थतां नीत्वा दरिद्रात्यलसो जनः ॥ १० ॥

बाहुकः—(पुरोवलोक्य ससम्भ्रमम्) महाभाग ! पश्य, केन त्विद्वृद्धेन समधिष्ठिताः केपि इत एवाभियन्ति. तद्बह्वतिथिलाभस्ते सञ्जातः.

सत्य—(सपरितोषम्)

सहस्रं सन्त्वतिथयो न मे भारो न मे व्यथा ।
कृषिकर्मविहीनानां अतिथिर्यमसन्निभः ॥११॥

(ततः प्रविशन्ति वृद्धानुसारिणः पौरा जानपदाश्च)

वृद्धः—(सर्वाननुयायिनस्समुद्दिश्य) भद्राः ! श्रुणुत, सोऽयमेव सत्यव्रतो महात्मा. यस्स्वपत्नीपुत्रादीनिवातिथीनपि पोष्यवर्गान् मन्वानः स्वार्जितद्रव्यसंविभागार्हान् निश्चित्य प्रतिदिनमेतान् सत्कुर्वन्नास्ते.

पौराणामेकः—आर्य ! युक्तमभिजानात्ययम्. स्मर्यते खलु—

मात पिता गुरुर्भार्या प्रजा दीनस्समाश्रितः ।
अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्ग उदाहृतः ॥ इति ॥

अन्यः—एवं स्थितेपि बहवः खलु स्वपत्नीपुत्रादिकमेव पोष्यवर्गमन्वाना स्स्वोदरम्भरयः कार्पण्यादतिथीननादृत्य आतिथ्यं कर्म प्रस्मरन्ति.

अपरः—तिष्ठतु तद्वृत्तान्तः. महात्मानमवलोकयामः. (सर्वे समीपमनुसरन्ति)

सत्यव्रतः—(दृष्ट्वा समुत्थाय साञ्जलिबन्धम्) नमोऽस्त्वतिथिभ्यः. (सर्वे प्रतिप्रणमन्ति.)

वृद्धः—आर्य सत्यव्रत ? किं मां विस्मृतवानसि ?

सत्य—(सप्रत्यभिज्ञम्) कथं विस्मरामि शुचिव्रतपुत्रस्तीर्थव्रतः किल भवान्. महाविद्वानसि, सुप्रसिद्धमेव भवन्नामधेयमपि.

तीर्थव्रतः---अद्य विशेषतः तथाहि--

विदितमपि नाम विदुषां
सद्गलगदितं समर्हणास्थानम् ।
गङ्गाजलमपि सद्य
श्शङ्कोन्मुक्तं हि देवतायोग्यम् ॥ १२ ॥

सत्य--- आर्य तीर्थव्रत! अद्य कुत आगम्यते? क्व गम्यते वा?

तीर्थ---(सगद्गदम्) आर्य सत्यव्रत! किमिवावेदयामि? तस्मिन्महानुभावे नैषधे तथा वनाय प्रस्थिते तत्क्षणमेव तां पुरीं प्रविहाय प्रस्थितोहं तांस्तान् देशानटित्वा तानितानि तीर्थानि सेवमानस्सन् उत्तरे वयसि वाराणस्यामेव वस्तुमागतोस्मि. एते च पौरा जानपदाश्च प्रकृतलोकस्थितिमालोकितुमप्यक्षमाः स्वयमरण्ये मनोविनोदयितुमागताः. वनमार्गमध्ये दृष्टास्समानीताश्च मया भवत्सन्निधिम्.

बाहुकः---(स्वगतम्) अहो! मदीया एव तएते सर्वेपि मिलिताः. द्रष्टव्यमिदानीं कीदृशं वृत्तं प्रचलतीति.

सत्यव्रतः---महान् परितोषस्त्वद्दर्शनेन. आर्य सकलदेशाभिज्ञ! क इवाद्य नूतनो वृत्तान्तः.

तीर्थव्रतः---(निश्वस्य) आर्य! किमिव निवेदये? तस्मिन्महानुभावे महाराजनैषधे दिनकरइवान्तर्हिते वनराज्या, तद्वृत्तस्य द्रष्टा श्रोता वा न कश्चिदस्ति. सा च परं महादेवी तत्परित्यक्ता वने वाचामगोचरीभूतानि महान्ति कष्टान्यनुभूय चेदिपरं गतेति, तेन च सुबाहुना

सोदरीस्नेहपरवशेन राज्ञा सबहुमानं पितृसन्निधिं नीतेति च कर्णाकर्णिकया श्रूयते. नातःपरं किञ्चिदज्ञासिषम्.

बाहुकः——अहो! पितृसन्निधिं नीतेति श्रुत्वाद्य समुच्छ्वसितं मे जीवितम्. हा देवि! कानिकानि कष्टान्यनुभूतवती वा? हा नाथनाथेति कतिवारान् स्मृतवती वा?

तीर्थ——कोसौ पञ्चमावतारः?

सत्य——ऋतुपर्णसारथिरयं दयालुरेवं वदतीति मन्ये.

तीर्थ——युज्यते.

सत्य——(पौराभिमुखीभूय) निवेद्यतां, कीदृशोद्य नूतनो राज्य वृत्तान्तः?

एकतमः पौरः—(श्रूयताम्) नूतने राज्ञि समुद्वहति राज्यधुरां सर्वं सुस्थितमभिवर्धमानञ्च दृश्यते. तथाहि—

परेभ्यो नो भीतिर्न च निजजनेभ्यः परिभवो
निरातङ्का लोका निजनिजसमारम्भनिरताः।
गृहारामक्षेत्रादिकमनुभवन्तोऽप्रतिहतं
स्वतन्त्रास्सुख्यन्ति प्रतिगृहमहो राजमहिमा ॥ १३ ॥

बाहुकः——(सश्लाघम्) साधु पुष्कर! साधु. चतुरेण परिपालनेन प्रजाः स्ववशयन् राज्यं सुस्थिरं करोषीति मन्ये.

सत्यव्रतः——भवतु कीदृशी सम्प्रति लोकस्थितिः?

पौरः——आर्य! श्रूयताम्.

नष्टे राजनि तत्रतत्र गलिते वृद्धे जने भूतले
   प्याक्रान्ते सति नास्तिकैरकरुणैरज्ञातगोत्रैर्नवैः ।
लोकानामभये भये सति धनोदाराः कुलीनास्तथा
   पौराणां भवनं विदग्धमतयश्चासन्ननाद्यक्षराः ॥ १४ ॥

सत्य—अहो ! अद्य कृतयुगेपि कलेर्भागस्सम्प्राप्त इति मन्ये.

बाहुकः—सत्यं तथैव.

पौरः—आर्य ! अन्यच्च श्रूयताम्. संक्षिप्य द्व्यक्षरेणैव वदामि.

लोके कुलोकाः काकोलकाललीलाः कुलेकुले ।
लोकः किल कलालोलः कलिकालाकुलाकुलः ॥१५॥

सत्य—हा महाराज नैषध ! कीदृशीं दशां दत्तवानसि लोकस्य ? पुनस्तादृशं सौराज्यं कथमनुभवेयुः प्रजाः ?

पौरः—अपरश्च श्रूयताम्—

न जातिर्नोनीतिर्न च कुलचरित्रेष्वभिरुचिः
   न शास्त्रं नो शास्ता तदपि सकलज्ञाश्च सकलाः ।
निगूढं द्रोग्धारः कपटविनया स्स्वार्थनिरताः
   प्रकृत्या यस्साधुर्भवति स तु हास्यास्पदमतिः ॥१६॥

सत्य—अहो ! कलिपुरुषाणां माहात्म्यं शृण्वतो मे कर्णयुगलं विदीर्णमिव भवति. अहह ! कीदृशोयं कालविपर्ययः ?

पौरः—आर्य ! इतरच्च श्रूयताम्—

निषिद्धाचाराणां प्रथममनुसर्ता भवति यः
समन्त्राणां द्रष्टा मुनिरिव महान् नूतनऋषिः ।
अतिक्रामन् शास्त्रं वदति यदि कश्चित्स निपुणः
स एव प्रख्यात स्सखलु बहुमान्यश्च जगताम् ॥१७॥

सत्य—राजभयाभावात्सर्वेष्येवं स्वतन्त्राः स्वेच्छाचारिणश्च सञ्जाता इति ज्ञायते. अलमलमनेन कदर्यकथाश्रवणेन दह्यत इव मे हृदयम्.

बाहु—कष्टंकष्टम्. अतिमहाननर्थः प्राप्तः लोकानाम्. तदेतदालोच्य धार्मिकेण राज्ञा समीकरणीयमेतत् अन्यथा स एव दोषभाक्स्यात्. स्मर्यते हि—

यस्मिन् देशे य आचारो व्यवहारः कुलस्थितिः ।
तथैव परिपाल्योसौ यदा वशमुपागतः ॥
कुलानि जातीश्श्रेणीश्च गणान् जानपदानपि ।
स्वधर्माच्चलितान् राजा विनीय स्थापयेत्पथि ॥
राज्ञि धर्मिणि धर्मिष्ठाः पापे पापरतास्सदा ।
राजानमनुवर्तन्ते यथा राजा तथा प्रजाः ॥
अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरकश्चाधिगच्छति ॥ इति ॥

तीर्थव्रतः—आर्य ! सत्यमेव तदेतद्भवदुक्तम्. राजभयाभावादेव सर्वेष्येवं विपरीतबुद्धयः संवृत्ताः. इतोप्यधिकं लोकमर्यादाः पर्यस्ता भवेयुः.

बाहुकः—कथमेतत् ?

तीर्थ—अत्र बहु वक्तव्यमस्ति. तदिदमखिलं करिष्यमाणे कलिवैभवे द्रष्टव्यम्. नात्रावकाशः.

बाहु—भवतु तत्रैव द्रक्ष्यामः.

तीर्थ–(पुरोवलोक्य सहर्षम्) आर्य सत्यव्रत ! इतः पश्य पथिकम्.

दिव्याम्बरावृततनुर्दृढबद्धमध्यः
सोष्णीषशीर्षसहपादुकपादयुग्मः ।
पाथेयभारविनमद्भुजमूलभागो
दण्डी समापतति कोपि धृतातपत्रः ॥१८॥

(निपुणं निरूप्य) नायं योवा कोवा पथिकमात्रः. किन्तु पश्य–

चलाचलकराञ्चलोञ्चलितचण्डदण्डाञ्चितो
विलोलवलिताकृतिर्वपुषि किञ्चिदाकुञ्चितः ।
ललाटविचलत्करं पथि विलोकयन् पादपान्
विशङ्कटतटाटवीमटति कोपि वृद्धो द्विजः ॥१९॥

(प्रविश्य द्विजस्सर्वान् दृष्ट्वा) अत्र तावद्बहवो महाभागास्सन्ति, क्वासौ स महानुभावः स्वयमातिथेयः सत्यव्रतः ?

सत्य—(सरभसमुत्थाय) द्विजवर ! सत्यव्रतोहमभिवादये.

द्विजः—सर्वास्तपस्सिद्धयः त्वां समाश्रयन्तु. बहुशः श्रुतवानस्मि भवद्गुणान्. तदद्य कार्यवशात्सुदूरङ्गतोप्यहं पुण्यश्लोकं भवन्तमालोकितुमागतोस्मि.

सत्य—अहो ! महानायासः परिगृहीत स्तत्रभवता.

द्विजः—न तथा श्रूयताम्—

दूरेथवा सविधएव वने जले वा
गुल्मेऽपिवा गहनमध्यगिरेस्तटे वा ।
यत्र स्थितिं भजति कैतकमिद्धगन्धं
तत्रैव सम्भ्रमभृतो भ्रमरा भ्रमन्ति ॥२०॥

सत्य—महाननुग्रहः. भवतु, वृद्धोपि किमेवं नवनवैः वसनाभरणादिभिः वरालङ्कारैः भूषितोसि.

द्विजः—महाराजऋतुपर्णस्य औदार्यसम्पदियम्.

सत्य—किं तत्र निमित्तम् ?

द्विजः—श्रूयतां तर्हि—अहं तावद्विदर्भाधिपतेः महाराजभीमस्य अस्थानपण्डितः पर्णादोनाम. कुण्डिनपुरे तावद्दमयन्त्याः द्वितीयः स्वयंवरो भविष्यति. तदर्थं महाराजऋतुपर्णसमाह्वानाय प्रेषितोस्मि. सोपि मन्मुखात् प्रियाख्यनमिदं श्रुत्वा मामेवं सम्मानितवान्.

सत्य—युज्यते नूतनोयं वृत्तान्तः.

बाहुकः—(दीर्घं निश्वस्य) अहह ! वज्राहतमिव मे हृदयम्. अयि पर्णाद ! अप्यभिमतमिदं तस्याः ?

पर्णादः—तयैव प्रेषितोस्मि.

बाहुकः—भवतु, तदिदं श्रुत्वा राजर्षिणा ऋतुपर्णेन किं प्रतिपन्नम् ?

पर्णादः—किमन्यत् ? अनुमोद्य सप्रयणं समागन्तास्मीति.

बाहुकः—अहो ! कालवैपरीत्यम् , यदभिज्ञा अप्यमार्गे प्रवर्तन्ते. आस्तां तत् . सापि महाराजदुहिता गुणवती पतिव्रता च भूत्वा अद्य स्वयमन्यानुरक्ता सञ्जातेत्याश्चर्यमेवैतत् . अथ वा उक्तमेव प्राचीनैः—

अश्वप्लुतं वासवगर्जितञ्च
स्त्रीणाञ्च चित्तं पुरुषस्य भाग्यम् ।
अवर्षणञ्चाप्यतिवर्षणञ्च
देवो न जानाति कुतो मनुष्यः ॥ इति ॥

(इति विचिन्त्य सामर्षमाकाशे लक्ष्यं बध्वा)

हा दुष्टे ! किमिदं त्वया ऽथवसितं लोकापवादास्पदं
यद्यन्यत्र रतासि तर्ह्यभिमतं किन्त्वेवमुद्घोष्यते ।
किंकिं वा कृतवत्यसद्व्यवहृतं ज्ञातं न तद्वैभवे
संशुष्के हि तटाकवारिणि तदा पङ्कस्थितिर्ज्ञायते ॥२१॥

राजर्षीणामैन्दवानां जगत्यां
ख्यातो वंशस्सच्चरित्रे स्थितानाम् ।
त्वत्संसर्गात्पांसुले सोपि वंशः
कष्टंकष्टं कश्मलोऽभूदिदानीम् ॥ २२ ॥

पर्णादः—(सामर्षम्) कोयं वाचाटः कूर्मकुब्जाकृतिः ? अस्मद्भर्तृदारिकामपि नलवत् बलवदधिक्षिपति अनभिज्ञः. नलपक्षपातीव दृश्यते.

बाहु—विद्वन् ! किञ्चिन्मर्षय. अनभिज्ञोपि नलएव भूत्वा वदामि. समर्थयतु स्वपक्षं भवान् . सत्यव्रतोत्र मध्यस्थः.

पर्णादः—अस्तु तर्हि श्रूयताम्—'भैमीसम्बन्धादिन्दुवंशः कश्मलोभूत्' इति भवदुक्तमसङ्गतम्. तत्सम्बन्धं विनापि स वंशः स्वयं कश्मल एव.

बाहुकः—कथमेतदुपपाद्यताम्.

पर्णादः—श्रूयतां तर्हि–

गुरोर्दारेषु तारायां शिष्येण शशिनाऽर्जितः ।
अमङ्गलो मङ्गलवत् अबुधोपि बुधोऽभवत् ॥ २३ ॥

तन्मूलशुद्धिरेव नास्ति तद्वंशस्य.

बाहुकः—नायं दोषः. स्वरूपतश्शुद्धाएव देवाः. देवतामूलं न विचारणीयम्. तदुक्तानुसारिणो वयम्. तद्वदनुष्ठाने नास्माकमधिकारः. स्मर्यते हि—

अनुष्ठितश्च यद्देवै र्मुनिभिर्यदनुष्ठितम् ।
नानुष्ठेयं मनुष्यै स्तदुक्तं कर्म समाचरेत् ॥ इति ॥

पर्णादः—भवतु. किं तया अपकृतं कुलस्य? कथं वा 'पांसुले' इत्याक्रोशामन्त्रणम्?

बाहु—श्रूयताम्—तादृशस्य महतो वंशस्य वधूर्भूत्वापि पत्युरपमानावहे पुनरुद्वाहे प्रवृत्तेयं कुलदूषिण्येव. अतः पांसुला पातकिनीच. स्मर्यते हि–

कामाद्द्वेषान्मत्सराद्वा भर्तारं याऽवमन्यते ।
सा सप्तजन्मकं यावन्नारकी स्यान्न संशयः ॥ इति ॥

पर्णादः—भोः ! किञ्चिदभिज्ञोसि. तथापि स्त्रीणां पुनरुद्वाहं अशास्त्रीयं मन्यमान इव ज्ञायते भवान्.

बाहु—किं शास्त्रीयं मन्यते भवान् ?

पर्णा—अथकिम्.

बाहु—कथमेतत् ?

पर्णादः—श्रूयताम्—

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

इति शास्त्रानुसारात्.

बाहु—नेदं द्वितीयोद्वाहपरम्.

पर्णा—कैश्चिद्द्वितीयोद्वाहपरत्वेनापि योजनात् पक्षे स्यादेव तत्परत्वम्.

बाहु—तथा चेत् तत्र बहवः प्रतिषेधाः प्रदृश्यन्ते.

पर्णा—तत्प्रतिप्रसवाश्च वर्तन्त एवेति किमनेन प्रसङ्गेन ?

बाहु—तथापि निगृहीतोसि.

पर्णा—कथमिव ?

बाहु—"**आगर्भधारणान्नार्याः पतिरन्यो विधीयते**" इत्याश्वलायनोऽनुमनुते. एवं स्थितेपि जातपुत्रायास्तस्याः कथं पुनरुद्वाहमनुमन्यते भवान् ?

पर्णादः—जातपुत्राणामपि पुरुषाणामधिवेदनमिव.

बाहुकः—तच्चाग्निपरिचरणार्थमिति न दोषः.

पर्णा—अस्तु तर्हि श्रूयताम्–

“पञ्चाशद्वत्सरादूर्ध्वं न कुर्यात्पाणिपीडनम्”

इति पुंसो निषेधसत्त्वेपि केचित्तादृशा अपि द्वितीये तृतीये चतुर्थे तदुपरितने वा पुनरुद्वाहे प्रवर्तमानाः प्रदृश्यन्ते. तत्र प्रवृत्तिनिमित्तं कामाग्निपरिचरणमेवेति तद्यथा गौणकाम्यमित्यङ्गीक्रियते, तद्वदिदमपीति सन्तोष्टव्यमायुष्मता. अन्यथा मूढबुद्धिदोषेण स्त्रीणां जन्मैव व्यर्थीकृतं स्यात्. एवञ्च स्त्रीणामपि पुनरुद्वाहस्स्वयमकामानां निषिद्धः. स कामानान्तु ऐच्छिकः इत्यवधार्यम्.

बाहु—अये! महापण्डितोसि. तवाप्येवं युक्तिवादे बुद्धिरुत्पन्नेति विपरीतकालदोष एषः. भवतु. पुरस्तादुपपाद्यताम्.

पर्णा—**“किंकिंवा कृतवत्ससद्व्यवहृतं ज्ञातं न तद्वैभवे”** इति भवदुक्तमसङ्गतम्. अस्मद्भर्तृदारिकायाः को वा दोषस्साक्षात्कृतस्त्वया?

बाहु—न कोपि.

पर्णा—तर्हि वृथा किमपि सम्भाव्य कल्पितोयमसद्वादस्त्यज्यताम्. प्रत्युत तत्पतिरेव घोरपातकापादकं असत्कर्म कृतवान्.

बाहु—कथमेतत्?

पर्णा—श्रूयतां, स्मृतिरेवानुवदति,

ये त्यजन्ति स्त्रिकां भार्यां मूढाः पण्डितमानिनः।
ते यान्ति नरकं घोरं तामिस्रं नात्र संशयः॥ इति॥

बाहु—(अवनतमुखस्तिष्ठति.)

सत्यव्रतः—अलमलमनेन प्रसङ्गेन. मध्यं नभसस्समारूढस्सविता. तदद्य सर्वैरस्मत्कुटीरमनुगृह्यतां आतिथ्यग्रहणाय. (सर्वे समुत्तिष्ठन्ति.) (प्रविश्य पटाक्षेपेण दुर्धरः) सखे बाहुक! त्वर्यतांत्वर्यताम्. महाराज ऋतुपर्णस्त्वां अस्मिन्नेव क्षणे द्रष्टुमिच्छति.

बाहु—किमर्थम्?

दुर्धरः—श्रूयतां–सुदेवो नाम द्वितीयो ब्राह्मणः कुण्डिनात्समागत्य श्वः प्रातरेव दमयन्त्याः पुनस्स्वयंवरः प्रचलिष्यति. तदस्मिन्नेव दिने त्वयावश्यं सन्निधातव्यमिति त्वरितवान्. महाराजोप्यतिसमुत्सुकितमनाः सपदि प्रस्थातुमश्वहृदयज्ञं भवन्तमेवाभिलषन् त्वरितं त्वदानयनाय जवनेनाश्वेन मामिह प्राहिणोत्. तज्झटिति प्रस्थीयताम्.

बाहुकः—(सव्यथमात्मगतम्) हतहृदय! कुतो न विशीर्णमसि? तस्यां वर्धक्यां अन्येन पत्या सह एकासनारूढायां तदिदं द्रष्टव्यमापतितम्. किमद्य करवाणि मन्दभाग्यः? (इति चिन्तयन् स्थितः)

दुर्धरः—सखे पाचकाग्रेसर! किमेवं जोषमास्यते? परिचारकोक्तमिति मद्वचने किमनादरः?

बाहुकः—नहि नहि विधेयोस्मि राजानुशासनस्य. अयमहमागच्छामि. क्षणमात्रेण तं कुण्डिनं पुरं नेष्यामि च महाराजम्. (सत्यव्रतं दृष्ट्वा) महाभाग! परवशोस्मि राजानुशासनेन. तदनुमन्यस्व मां गमनाय.

सत्यव्रतः—एवमस्तु. बलीयसी खलु राजाज्ञा !

बाहु—अहो ! प्रेष्यभावस्स्वातन्त्र्यापकर्षी खलु !

दुर्धरः—सखे ! प्रेष्यभावेपि विद्यावानसीति सर्वैस्सम्मान्यते भवान्. अस्मादृशानान्तु बाल्ये वृथाकालमतिवाह्य निरक्षरकुक्षीणां पितृभिरप्यनादृतानां दुस्सहः एष प्रेष्यभावः. श्रूयताम्—

ते मुक्ताः पितरस्स्वयं सुतऋणाद्येऽध्यापयेयुस्सुतान्
ये विद्यां समुपासतेप्यनलसा स्सुख्यन्ति ते बालकाः ।
नोचेन्मत्सदृशीभवन्ति नियतं सोहं परेषां गृहे
वाहंवाहमहो जलं विनिहतः किं वर्णये वैभवम् ॥ २४ ॥

(इति परिक्रम्य निष्क्रान्तास्सर्वे.)

इति भैमीपरिणये नवमोऽङ्कः.

ओं तत्सत्.

अथ दशमोङ्कः.

(ततः प्रविशति रथेन राजा सूतश्च.)

राजा--(समन्तादवलोक्य सश्लाघं सप्रमोदञ्च) आर्य सूताग्रेसर बाहुक ! निपुणतरः स्वामिभक्तश्चासि. त्वत्साहाय्येन पूर्यमाणामिव मे मनोरथं पश्यामि, यदश्वहृदयाभिज्ञेन त्वया याममात्रेणैव शतं योजनान्यतीत्य विदर्भराजधानीनिकटं नीतोस्मि.

कुशलः स्वामिभक्तश्च भृत्य एकोप्यलं प्रभोः ।
अतिभक्तैरप्यतुष्णैः किमन्यै र्महिषैरिव ॥ १ ॥

(सविस्मयं स्मृत्वा) अहह ! महदद्भुतं चेदम्. यदध्वनि करगलितं वसनं गृहाणीति यावदुदीरितं मया, तावदेकयोजनमतिक्रान्तो रथ इति. तस्मात्कस्माद्गुरोः सम्पादितमिदं अनन्यलभ्यमश्वहृदयविज्ञानम् ?

बाहुकः—आयुष्मन् महाराज ऋतुपर्ण ! श्रूयताम्—अहं तावद्बाल्ये सकलाः कलास्समभ्यस्य महास्त्रविद्यापरिग्रहार्थं भगवतो वृषभध्वजस्य प्रशिष्यं महर्षिमगस्त्यं बहूनि दिनानि शुश्रूषमाणः कदाचित् सतीर्थ्यस्नेहात्तमभिनन्दितुमागतं गुहान्तेवासिनं सकलकलाकलापकोविदं दारपरिग्रहार्थमर्थार्थिनं च बाष्कलं महर्षिमासाद्य महतो धनस्यार्पणेन समासादितवानस्मि तस्मादिमां सूतविद्यां सूदविद्याञ्च. प्रोच्यते किल प्राचीनैः.–

गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ।
अथवा विद्यया विद्या तुरीयं नोपलभ्यते ॥ इति ॥

रा—(किञ्चिद्ध्यात्वा) सम्प्रदायशुद्धस्ते विद्याधिगमः. अनूचानश्चासि. तदिदानीं किञ्चिदावेद्यते. श्रूयताम्—

बा—अवहितोस्मि.

रा—अहं तावदस्मत्कुलगुरोः वसिष्टस्यानुग्रहात् अक्षविद्यारहस्यं गणितविद्यारहस्यं च जानामि. यदि मह्यं अश्वहृदयविज्ञानमेकं दित्ससि, तदा ते द्वे अप्युपदिदिक्षे तुभ्यम्.

बा—(सामोदम्) आयुष्मन्! सप्रणाममङ्गीक्रियते मया.

(उभौ परस्परं कर्णयोरुपदेशमभिनयतः)

रा—अहो! अश्वहृदयतत्वज्ञोस्मि.

बा—अहो! अक्षविद्याविचक्षणोस्मि. (सविस्मयं) किमिदानीं भारापगमाल्लघूनीव मदङ्गानि? प्रसीदतीव मे चेतः.

रा—महाविद्याप्रभाव एषः.

बा—अहो! साधु निदर्शितम्.

रा—श्रूयतामपरं च महर्षेर्वचसैव वदामि. इतो दक्षिणपूर्वायां व्यामशतत्रयान्तराले गिरिशिखरगतो योयं विभीतकतरुर्दृश्यते,

वृक्षेस्मिन् यानि पर्णानि फलान्यपि च बाहुक ।
पतितान्यपि यान्यत्र तत्रैकमधिकं शतम् ॥

एकमत्राधिकं पत्र फलमेकञ्च बाहुक ।
पञ्चकोट्यथ पत्राणां द्वयोरपि च शाखयोः ॥
प्रचिनुह्यस्य शाखे द्वे याश्चाप्यन्याः प्रशाखिकाः ।
आभ्यां फलसहस्रे द्वे पञ्चोनं शतमेव च ॥

बाहुकः—(सकौतुकाद्भुतम्) तर्हि तदेतत् प्रत्यक्षीकरोमि.

(इति निष्क्रान्तः.)

राजा—(विचिन्त्य) अहो ! कथं मयैव कल्पितं कालक्षेपकारणम् ? सन्निधत्ते खलु सायंसन्ध्यासमयः. समुत्सुकिता च मे मतिः वैदर्भमालोकितुम् , नवीनमहोत्सवारम्भसंरम्भसमालोकनाय च. तदद्य स्वयमेव गत्वा त्वरयामि तं सूतम् . (इति निष्क्रान्तः.)

(ततः प्रविशति शैलाधिरोहणमभिनयन् बाहुकः.)

बाहु—(धीरोद्धतं परिक्रामन् सकौतुकम्)—

आरोहतो मे मरुतो गिरीन्द्रं
पदेपदेऽमी प्रबलीभवन्ति ।
आचूडमामूलममी नगाश्च
क्रमेण रूपं परिदर्शयन्ति ॥ २ ॥

अहो ! शिखरदेशं प्राप्तोस्मि. तदद्य संलक्षितान्यपि विलक्षणानीव लक्ष्यन्ते लक्षणीयानि. तथाहि—

नवजलधरायन्ते दूरे महीधरपङ्क्तयो
हरितवसनायन्ते भूमेर्महीरुहराजयः ।

क्षितिचरजनास्सन्दृश्यन्ते यथैव पिपीलिकाः
मुकुरशकलायन्ते दृष्ट्यो महीस्थजलाशयाः ॥ ३ ॥

अद्यैतं विभीतकं छित्त्वा गणयामि अस्य प्रशाखाः पत्राणि फलानि च. (इति परशुना तं कलिद्रुममाच्छिद्य तानि गणयन्) अहो ! गणितनैपुण्यं महाराजऋतुपर्णस्य (इति श्लाघते.) (ततः प्रविशति पटाक्षेपेण विरूपः कलिः.)

कलिः—राजन् ! निराश्रयीकृतोस्मि भवता.

बाहुकः—(दृष्ट्वा) कस्त्वं पिशाच इव दृश्यसे ? निहन्मि त्वाम्. (इति परशुमुद्धरति.)

क—(सभयं सप्रणामञ्च) राजन्मर्षयमर्षय. कलिराजोहम्. त्वत्सत्यपरीक्षणार्थं मया बहुधा बाधितोपि त्वं सत्यान्न च्युतोसि. तदद्य परं प्रसन्नोस्मि त्वयि. महापतिव्रतायाः त्वद्दयितायाश्शापेन दह्यमानं मां त्वमपि शापेन कोपेन वा मा प्रदह. धरातले स्वयमाचन्द्रतारकं ते कीर्तिः प्रचलतु. किञ्च स्वयमार्षेण सत्येन च वचसा वदामि. श्रूयताम्—

ये हि त्वां मनुजा लोके कीर्तयिष्यन्त्यतन्द्रिताः ।
मत्प्रसूतं भयं तेषां न कदाचिद्भविष्यति ॥ इति ॥

अनुजानीहि मां क्वचिद्गमनाय.

बाहुकः—(सप्रश्रयमञ्जलिम्बध्वा) कलिराज नमस्ते. स्वैरं गम्यतामन्यत्र.

कलिः—(प्रणम्य निष्क्रान्तः.)

बा—(विचिन्त्य) कथं सा महापतिव्रतेत्याह कलिः ? प्रकृतसन्दर्भे समालोचिते तु सन्दिग्धं मे मनः. भवतु महाराजेन सह जवनाश्वेन रथेन कुण्डिनङ्गत्वा ज्ञास्यामि सकलं तत्त्वम् . सेयमिदानीं सखीजनपरिवृता स्वयंवरवृत्तान्तेनैव नयति कालमिति मन्ये. तदद्य इतोमुखमिहैवायान्तं तमेतं महाराजऋतुपर्णमुपगम्य अनेन सह गमिष्यामि कुण्डिनं नगरम् .

(इति परिक्रम्य निष्क्रान्तः)

(ततः प्रविशत्येकवेणीधरा विरहकृशाङ्गी ससखीजना ससुता च देवी.)

सखीनामेकतमा—सखि दमयन्ति ! ऋतुपर्णरथनेमिस्वनं श्रुत्वा कथमेवं प्रहर्षितासि ?

देवी—सखि बृहत्सेने ! श्रूयताम्—

स एव रथनिर्घोषो घनस्तनितमन्थरः ।
आर्यपुत्रं विना कोन्यः तथाश्वान् धावयेद्भुवि ॥ ४ ॥

बृहत्सेना—सखि ! निपुणमालोकित एव खलु मया स रथः. तत्र कुब्जस्सारथिरेको ऋतुपर्णश्चापरः इति द्वावेव दृष्टौ नान्यः.

दे—भवतु. स सारथिर्विचारयितव्यः.

बृ—तदर्थमेव त्वया प्रेषिता किल केशिनी.

दे—आम तस्यां प्रत्यागतायां सर्वं स्पष्टीभविष्यति. परन्तु ऋतु-

पर्णात्पुनस्स्वयंवरवृत्तान्तं श्रुत्वा तातः किम्प्रतिपद्येत वा मयि इति वेपते मे हृदयम्.

बृ—मा शङ्किष्ठाः. तातऋतुपर्णयोस्सल्लपनं प्रत्यक्षीकृतमेव तातसन्निहितया मया.

दे—कथं कथम्? कथयकथय.

बृ—तातस्तावदृतुपर्णमागतं श्रुत्वा प्रत्युद्गच्छन् कुशलप्रश्नानन्तरं किमिदमतर्कितागमनमिति पृष्टवान्.

दे—ततस्ततः.

बृ—ततस्स राजा समालोच्य हसन् मृगयार्थमटाट्यमानोहं प्रियसुहृदं भवन्तमालोकितुमागतोस्मीति प्रत्योत्तरयत्.

देवी—निपुणतरोयम्. ततस्ततः.

बृहत्सेना—ततस्स समन्तादालोकयन् किमिदं पुरालङ्कारकरणं इत्यप्राक्षीत्. तातस्तु स्वयमेवमेव प्रातरागतस्य महाराजपुष्करस्य सम्भावनार्थमिति यथास्थितमेव निवेदितवान्.

दे—कथं सोपि समायातः?

बृ—सखि! प्रोच्यते किल प्राचीनैः—"षट्कर्णो भिद्यते मन्त्रः" इति. तद्भवत्कल्पितं स्वयंवरवृत्तान्तं सत्यमेव मन्वानेन येन केनापि प्रबोधितस्स्वयमत्युत्कण्ठया समायातस्स्यादिति मन्ये.

दे—आः? अनर्थकारणमापतितम्.

बृ—यदि स महावीरो नलो नागच्छेत्, तदा अनर्थएव नान्यथेति तर्कयामि.

दे---(दीर्घं निश्वस्य) सखि! यद्यदनुकूलमिति तर्क्यते, तत्तद्दुरुदर्कमेव भवतीत्यहो मे भाग्यविपर्ययः

बृ---सखि! मा स्म खेदय मनः. सर्वं सदुदर्कमेव भविष्यति.
(प्रविश्य केशिनी) महदिदमाश्चर्यम्.

दे---कीदृशमाश्चर्यं दृष्टवत्यसि?

केशिनी---महाराजनलादन्यस्मिन् कस्मिंश्चित्सूतमात्रेऽपि नलीयान्यभिज्ञानान्यद्राक्षम्.

दे---कथमेतत्.

के---सखि! श्रूयताम्. इतस्त्वद्वचनात्तं सूनमालोकितुं गताहं प्रथमतस्स्वयमनामयप्रश्नपूर्वकं किञ्चित्परिचयमकरवम्. तावत्स राजा ऋतुपर्णः तातसन्निधानात्स्वनिवासमागत्य हारान्मुक्ताहारान् मालाः पुष्पमालाश्च सूतकरे वितीर्य "आर्य! सिद्धश्चेत्पाकस्समानीयताम्" इत्यभिधाय अभ्यन्तरमविक्षत्. तत्करस्पर्शमात्रादेव ताः पुष्पमालाः सर्वा दिशः सुरभीकृत्य सर्वतोपि यूथशस्समायातैः भ्रमरकदम्बैरपूरिषत. तदिच्छामात्रादेव पात्राणि जलैःपर्यपूर्यन्त. तत्करसंस्पर्शादेव पक्काः रुच्याश्चाभवन् पात्रस्थाः पदार्थाः.

दे--आश्चर्यमाश्चयम् (विचिन्त्य) इन्द्रादिदेवतावरप्रभाव एषः कथमार्यपुत्रादन्यत्र सम्भवेत्? भवतु, ततस्ततः.

के---ततः क्षणेनैव स तं तदन्नमभोजयत्. तदिदमालोक्य चित्रीयमाणाहं अभ्यर्थ्य किञ्चिदिदमानीतवत्यस्मि. (इति ददाति.)

दे—(सादरम्परिगृह्य समाघ्राय दृष्ट्वा) तदिदं भोज्यं आर्यपुत्रकर पक्कमेव नान्यथा. एतैरभिज्ञानैः स एवायमिति मे मतिः. तदद्य कथमालोकयेयं तं महाभागम्.

के—हळा ! श्रूयताम्. सोऽश्ववाहः तृणपूलनयनार्थं अस्मत्सौधाभ्यन्तरमन्दुरामायास्यत्येव. तदा द्रक्ष्यसि.

दे—(सश्लाघम्) साधु केशिनि! साधु. तर्हि तत्रैव व्रजामि.

(इत्युत्थाय गच्छति. सर्वास्तामनुव्रजन्ति.)

(ततः प्रविशति बाहुकः)

बाहुकः—(सवितर्कमात्मगतम्) कथमिदमतिसन्दिग्धमिव वर्तते. यतः पुष्करऋतुपर्णावागतौ, नान्ये. पुरालङ्करणमिदं पुष्करार्थमित्युक्तम्. तदर्थमन्यार्थं वा भवतु किमनेन ? किमिदमतर्कितागमनमिति वैदर्भस्तमप्राक्षीत्. तेन च ऋतुपर्णस्य मुखमन्यथासीत्. श्रुतश्च मया शुद्धान्तपार्श्वमन्दुरागतेन सखीविस्रम्भालापेषु बृहत्सेनया निगदितम्, यथा "त्वत्कल्पितं द्वितीयस्वयंवरवृत्तान्तं सत्यं मन्वानेन येन केन चित्प्रेरितः पुष्करस्समायात." इति. एवञ्च भीमभूपतिर्न द्वितीयस्वयंवरस्य प्रवर्तकः. अपि तु मदुपलब्ध्यर्थं तयैव कल्पितस्स इति ज्ञायते. एवमपि पतिव्रतानामेतदननुरूपमेव. तद्यथा वा भवतु. सोहमद्य तृणपूलान्यानीय तानि बुभुक्षितैरश्वैः खादयामि. (इति परिक्रामति.)

दे—(दृष्ट्वा) अहो ! आर्यपुत्रादन्य एवायम्.

के—कथमेतत ?

दे—सखि केशिनि ! किं प्रत्यक्षमपि प्रमाणान्तरमपेक्षते ? पश्य ग्रन्थिलवक्रकुब्जाकृतिमेनम्. किमस्य दर्शनेन भाषणेन वा ? अस्मिन्पतित्वसम्भावनयापि दूषितास्मि संवृता. तानि चाभिज्ञानानि तु नैकमात्रनियतानीति कुतोऽन्यत्रापि न सम्भवेयुः ?

के—सखि ! तथापि किञ्चित्पृच्छ्यतामेष गृहागतोऽतिथिः.

दे—यथा रोचते प्रियसख्यै. (सभयं ससङ्कोचञ्च शनैः) महाभाग ! कस्त्वम् ?

बा—(देवीं दृष्ट्वा सबाष्पं स्वगतम्) कथमत्रैव देवी ? या खलु—

तदेव धूसरं धत्ते यन्मया छिन्नमंशुकम् ।
क्षामक्षाममुखी चेयं विशुद्धेव विलोक्यते ॥ ९ ॥

भवत्वेवं तावत्. (प्रकाशम्) अहं तावदृतुपर्णसारथिर्बाहुको नाम. घोटघासार्थमागतोस्मि.

दे—अपि नाम क्वचित्त्वया दृष्टस्तादृशः पुमान् ? यश्च धर्मे चार्थे च कामे च नातिचरामीति प्रतिज्ञाय, "**अदुष्टां सम्परित्यज्य रौरवं नरकं व्रजेत्**" इति शास्त्रञ्चानादृत्य घोरे वने अनन्यशरणां निद्राणां च पाणिगृहीतीं निष्कारणं निष्करुणं च त्यक्त्वा स्वैरं गतवान्.

बाहुकः—न मयान्यः तादृशो दृष्टः. किन्तु, "**अन्योन्यस्याव्यभीचारो भवेदामरणान्तकः**" इति शास्त्रमतिक्रम्य कुलं शीलं च दूरीकृत्य पशुवदन्यपरिग्रहोत्सुका काचिद्दृष्टा मया.

देवी-(सभयं सव्रीडञ्चापवार्य) सखि ! कथमेतदार्यपुत्रस्येवेदमुत्तरम् ?

केशिनी--तस्यैवेति जानीहि. रूपपरिवृत्तिस्तु कारणान्तरादपि सम्भवेदिति मे मतिः. तत्पुनः पृच्छ्यताम्.

दे--तादृशस्तादृशी च भुवि कुत्र वर्तेते ?

बा--तादृशावपि अत्रैव वर्तेते इति वक्तुं कथं शक्यते ?

दे--(अपवार्य) सखि ! उक्तिवैचित्र्यमिदमप्याशाजनकमेव.

के--(अपवार्य) सखि ! पुरस्तादवगच्छाव. दारकौ प्रेषय.

दे--(इन्द्रसेनामिन्द्रसेनश्च पुरः प्रेरयति.)

बा--(पुत्रौ दृष्ट्वा सबाष्पगद्गदमुच्चैः)--

आयाहि वत्स परिदर्शय ते मुखाब्जं
वत्से समेहि सममेव परिष्वजेथाम् ।
दूरीकृतोपि विधिनाद्य यतो युवाभ्यां
आप्यायितोस्मि सुदिनाहमिदं दिनं मे ॥ ६ ॥

(इति रुदन्परिष्वज्य मूर्ध्न्युपाघ्राय कपोलयोश्चुम्बति)

दे--(सविस्मयमपवार्य) सखि ! किमिदमयमस्मद्दारकौ स्वपुत्राविवानुशोचति.

के--(अपवार्य) सखि ! निरस्तस्संशयः. तथापि पुनः पृच्छ्यताम्.

दे--महाशय ! किमेतौ त्वदात्मजौ ?

बा--नहि नहि.

दे--(अपवार्य) सखि ! पुनस्संशये पतिते स्वः. अयमार्यपुत्रश्चेत् स सत्यवादी कथमेवं नहि नहीति वदेत् ?

के—(अपवार्य) सखि ! न तथा. पुनः पृच्छ्यतामयम्.

दे—पूज्यतम ! तर्हि कस्यैतावात्मजौ ?

बा—भगवतश्चराचरगुरोः परमेश्वरस्य.

के—(ससम्भ्रममपवार्य) सखि ! दिष्टचा वर्धसे. स एवायम्.

दे—(अपवार्य) सखि ! तर्हि कुत इदं रूपम् ? किं परकायप्रवेशमहिमा स्यात् ?

केशिनी—न तथा.

देवी—कुतः ?

के—तथा चेत्, किमिदमसह्यं रूपमनुमन्येत स तादृशः.

दे—सत्यम्. तर्हि एवं रूपान्तरप्राप्तौ किं कारणं स्यात् ?

के—तदेकं साधु निर्णेतव्यमास्ते. शिष्टं स्पष्टम्.

(नेपथ्ये मृदङ्गध्वनिः)

दे—(श्रुत्वा) अहो ! मङ्गलकरोयं मृदङ्गध्वनिः श्रूयते.

(ततः प्रविशति पटाक्षेपेण अन्तःपुरचरः वृद्धकञ्चुकी.)

कञ्चुकी—भर्तृदारिके ! त्वर्यतां त्वर्यतां प्रेक्षणिकप्रेक्षणाय.

दे—कुत्र एतत् ?

कञ्चु—भर्तृदारिके ! श्रूयताम्. वामदेवमहर्षिणा प्रणीतं रूपाहरणं नाम नाटकमालोक्य प्रहृष्टमतिर्महाराजभीमभूपतिः समागतप्रियातिथिसम्भावनार्थं समादिष्टवान् तदभिनयाय भारतान्. सम्मिलिताश्च महाराजऋतुपर्णपुष्करप्रमुखास्सामाजिकाः पौरा जानपदाश्च महान्तः. तदद्य भवतीं समानेतुं मां भट्टारकः प्रेषितवान्.

दे—यद्येवं तर्हीदानीमेव सपरिवाराहमागच्छामि.

बा—यद्येवं मयापि गन्तव्यमेव तदालोकनाय. नाटकं नाम महानद्भुतश्चोद्योगः. यतः—

उत्कर्षमुद्रा कविपुङ्गवानां
समस्तशास्त्रार्थचतुष्पथोयम् ।
नीतिप्रधानो निगमश्च लोके
भवेदसौ भावुकभावकर्षः ॥ ७ ॥

(इति परिक्रम्य निष्क्रान्ताः.)

अथ गर्भाङ्कः

(ततः प्रविशन्ति यथानिर्दिष्टास्सामाजिकाः. नेपथ्ये मृदङ्गध्वनिः. सर्वे समुत्सुकाः पश्यन्ति.)

(प्रविश्य सूत्रधारः साञ्जलिबन्धं सामाजिकाभिमुखीभूय)—

जित्वा काममपास्य भूधरसुतां शुश्रूषमाणां पुरः
प्रत्याकृष्य तदात्वकोपदहनज्वालावलीढं मनः ।
अन्तर्धाय तपस्विनीं पुनरुमां रूपान्तरान्मोहयन्
स्वीयाकारमुपेत्य यो गिरिजयाऽऽश्लिष्टस्स पायाच्छिवः ॥

अपि च—

सम्पूर्णे सकलैर्गुणैस्सुमहिते वैदर्भि! तुभ्यं नमः
किं वालङ्करणैः किमर्थविभवैः त्वञ्चेत्प्रसन्ना मयि ।
श्लेषश्लेष्मविवर्जितं कटुपदन्यासक्षताक्षोभितं
मोचास्वादनमञ्जुलञ्च दिश मे याचामि वाचां क्रमम् ॥९॥

(नान्द्यन्ते द्वितीयः सूत्रधारः प्रविश्य पुष्पाञ्जलिं विकीर्य सप्रश्रयमञ्जलिं बध्वा) अलं बहुना. भोभोस्सकलकलाकोविदाः सभास्ताराः! महाराजनैषधस्य रूपान्तरप्राप्तिनिमित्तनिवेदनार्थं महर्षिणा वामदेवेन प्रणीतं रूपाहरणं नाम नाटकमभिनीयते. तदद्य दत्तावधानाः पश्यन्तु भवन्तः इत्यभ्यर्थये.

देवी—सखि केशिनि! श्रूयताम्. वने मया आर्यपुत्रदशानिवेदनाय प्रार्थितोयं महर्षिर्मदर्थमेवेदं निर्मितवानिति मन्ये.

बाहुकः–(स्वगतम्) कथमस्मद्वृत्तमेवोपक्रान्तम्? भवतु पश्यामः.

पुष्करः—(स्वगतम्) कथं तस्य रूपान्तरप्राप्तिरिति? अस्तु. विलोकयामः.

सर्वे— प्रियं नः प्रियं नः.

सूत्रधारः—अद्य खलु–

तपनं प्रविश्य चन्द्रः
प्राप्तमरीचिर्नवोनवो भवति ।
शरदा समेत्य सोयं
स्वीयां दीप्तिं प्रकाशयन्भाति ॥ १० ॥

(नेपथ्ये)–अहो ! कृतं कृतं मया महासाहसमिदानीम्.

सूत्र–(अङ्गुल्या निर्दिश्य) एष महाराजनलः कानने प्रियां परित्यज्य दुर्मनायमानस्सन् इत एवाभिवर्तते. तदद्यापसरामि. (इति निष्क्रान्तः.)

प्रस्तावना.

(ततः प्रविशति यथानिर्दिष्टो राजा.)

राजा—(सोपालम्भम्) अहो ! कृतं कृतं मया महासाहसमिदानीम्. यत्प्रियां परित्यज्य सुदूरमागतोस्मि. किमिदानीङ्करणीयम्? कुत्र वा गन्तव्यम्! किमर्थं वा जीवितव्यं मया? न किञ्चिज्जानामि मन्दभाग्यः. (सविमर्शम्)—

किमपि फलमजानन् किं वृथा प्रस्थितोहं
स्फुरति हृदि न किञ्चिच्छून्यशून्या दिशो मे ।
दयितजनवियोगाद्दीर्घदीर्घाण्यरण्ये
कथमिव गमयेयं दीनदीनो दिनानि ॥ ११ ॥

इदन्तु मे हतहृदयमतीव व्यथमानं वर्तते.

कथमपि विनिगृह्य क्वापि संयोज्यमानं
पुनरपि लघु तस्याः प्रान्तमेवानुयाति ।
तदिह न खलु चेतस्तां विना पङ्कजाक्षीं
क्वचिदपि रमते मे किङ्करोमि क्व यामि ॥१२॥

बाहु—अहो ! निपुणोयं नटः. तदेव वदति. तथैवाभिनयति च. तदद्य पुनरार्द्रीकृतमिव मे हृदयव्रणम्.

देवी—अहो! आर्यपुत्रस्य मयि कारुण्यातिशयः. प्रथमदिने एवं विलपितमासीदार्यपुत्रेणेति मत्वा दंदह्यते मे हृदयम्.

वैदर्भः—अये वत्सां विसृज्य गतस्य जामातुरिमां दशामालोकयतो विदीर्यत इव मे हृदयम्.

राजा—तदिदानीं प्रियाविरहितस्य मे न किञ्चिदाश्वासनम्. अतः परं केनाप्युपायेन मर्तव्यमेव वरमिति जानामि. अन्यथा कथमन्यस्मै मुखं दर्शयन् जीवेयम्? (पुनर्विमृश्य) आत्मघातमपि न सम्मन्यन्ते खलु शास्त्रविदः. वीरजनविरुद्धा चेयं सरणिः. तदद्य किं करवाणि मन्दभाग्यः? (इति चिन्तयन् स्थितः.)

(नेपथ्ये)—भोभोस्त्रायतां त्रायताम्. अशरणोस्मि.

रा—(श्रुत्वा) कोयमापन्नस्येवार्तस्वरः? (पार्श्वतोवलोक्य) कथमत्रैव दन्दह्यमानतरुलतागुल्मसञ्चयसमुच्चलच्चटचटात्कारपरिपूरितवनाभोगः प्रज्वलत्येष दवदहनः? (पुनर्नेपथ्ये)—

सत्यसन्ध! महावीर! निषधाधिपते! नल!।
दह्येहं दावदहनैः दीयतामभयं मम ॥१३॥

रा—कोसौ मामेवोद्दिशति? यो वा को वा स्यात्. त्रातव्य एव खलु विपन्नः. (सरभसं हस्तमुद्यम्य)—

मा बिभीहि मया साधो दत्तैवाभयदक्षिणा।
शक्तोपि नोपकुर्याद्यः किं तेन पशुना फलम् ॥ १४ ॥

(ततः प्रविशति दवाग्निदह्यमानः कुण्डलीभूय पतनोत्पतनमनुभवन् महान् सर्पः.)

रा—(दृष्ट्वा) अहह! दवाग्निदह्यमानोयं महानागः. अयमहमद्य विपन्नमेनं पन्नगं समुद्धरामि अस्माद्दवदहनात्. (इति दवाग्निं प्रविशति. सर्वे हाहेति क्रोशन्ति.)

दे—हा हतास्मि. नाथ! न प्रवेष्टव्यं न प्रवेष्टव्यम्. (इत्युत्तिष्ठति.)

के—सखि! नाटकमिदम्. कुतो निवारणोद्यतासि?

दे—(सलज्जा तिष्ठति.)

रा—(दवाग्निमध्यात्कुण्डलितं नागमानीय प्रच्छायशीतले तरुतले निवेश्य छिन्नसिचयाञ्चलेन वीजयन्, 'नागराज! सन्तप्तोसि. समाश्वसिहि समाश्वसिहि. दंशान्दशदश' इति समाश्वासयति.)

नागः—(कुण्डलनां विसृजन् घोरं मुखं व्यादाय राजानं पादयोर्दशति)

रा—(हाहेति मूर्छितः पतति. सर्वे हाहेति क्रोशन्नि.)

वैदर्भः—अहह कथमतिकष्टमापतितं वत्सायाः?

पुष्करः—साधु साधु. स्वयमेव हतः शत्रुरेषः.

देवी—हा नाथ! कथमेवं सर्पदष्टः शेषे? देहि मे प्रतिवचनम्. दुष्टोपकारफलमनुभूतवानसि. हा तात! चिकित्स्यतां चिकित्स्यतां महाभिषग्भिः. (इति सरभसमुत्तिष्ठति.)

केशिनी—सखि! अभिनयः खल्वेषः?

दे—(वेपमाना सगद्गदम्) सत्यं तु पुनः कीदृशम्.

के—पुरस्ताद् द्रक्ष्यावः.

दे—(यथास्थानमुपविशति.)

राजा—(समाश्वस्योत्थाय स्वात्मानमालोकयन्) हा! कथं विषवेगेन विकृतरूपोस्मि संवृत्तः? कुब्जमिदं वपुः. ग्रन्थिलानि चाङ्गानि. नागोपि न दृश्यते. कथमेवंविधो जीविष्यामि? अथवास्मिन्नेव दवाग्नौ निपत्य दाहयामि इमं हतदेहम्.

पु—दाह्यतां दाह्यताम्.

रा—(सावेगं दावमनुसरति.)

(प्रविश्य दिव्यपुरुषः)—राजन् श्रूयताम्. कर्कोटको नाम नागराजोहम्. द्वापरविज्ञप्तेन भवदनुकम्पिना देवराजेन प्रेरितः सर्परूपेण त्वामदशम्. मद्विषव्याप्तमिदं विकृतं गात्रं ते निगूढनिवासानुकूलं भविष्यति. गृह्यतामिदं तेन प्रसादीकृतमंशुकद्वयम्. अनयोरेकं परिधाय अन्यत्परिरक्षन् बाहुकनाम्ना राजर्षिं ऋतुपर्णं प्रतिपद्यस्व. ततस्ते सर्वं श्रेयो भविष्यति. श्रूयतां चेदम्.

यदा घोरमिदं रूपं तित्यक्षिष्यसि नैषध।

तदैतद्वसनं धत्स्व स्वीयं रूपमवाप्स्यसि॥ १९॥ इति ददाति.

रा—(सप्रणामं प्रतिगृह्य एकं परिधाय पटच्चरमिति धृतपीताम्बरखण्डं दवाग्निदग्धे भूतले निक्षिपति.)

दे—(स्वगतं) सत्यमिदमेव मधुविक्रयिणा तस्मै दुर्जनाय क्रीतम्.

रा—(साञ्जलिबन्धम्) नागराज कर्कोटक! नमस्ते. अनुगृहीतोस्मि महेन्द्रेण भवता च. तद्यथोपदेशं आचरिष्यामि.

(इति निष्क्रान्तौ.)

इति गर्भाङ्कः

ऋतुपर्णः—(सभयं ससम्भ्रमश्चोत्थाय बाहुकमुपसृत्य साञ्जलिबन्धम्) महाराज! क्षम्यतामज्ञानवशात्त्वां भृत्यभावेन पश्यन्नपराद्धोस्मि.

बाहुकः—कथमपराद्धोसि? भवता गूढं परित्रातोस्मीति महदुपकृतमेव भवता. तन्निश्शङ्कं वर्तस्व. (पुष्करवर्जं सर्वे ससम्भ्रमं बाहुकं परिवारयन्ति.)

के—सखि दमयन्ति! सम्भावयेदानीं प्राणवल्लभमेनम्.

दे—सखि! ज्ञातं रूपान्तरप्राप्तिकारणम्. तथापि कथमित्थम्भूतरूपमार्यपुत्रमुपसरेयम्?

बाहुकः—अहो! सर्वैर्ज्ञातोस्मि. किमिदानीं स्वरूपतिरोधानेन? (इति कटितटाबद्धपरिकरान्तर्निगूढं नागदत्तं वसनं परिदधानः स्वेन रूपेण तिष्ठति.)

देवी—(ससम्भ्रममुपसृत्य मालामर्पयति. उभौ परस्परमालिङ्गतः. आकाशात्पुष्पवृष्टिः 'जयजय' इति दिव्या दुन्दुभयश्च ध्वनन्ति.)

(सर्वे प्रणम्य साञ्जलिबन्धास्तिष्ठन्ति.)

रा—(देवीं करे गृहीत्वा पुष्करमुपसृत्य) राजन्! एषा देवी पणीकृता. पूर्वोक्तमनुसृत्य भवानक्षद्यूते प्रवर्तताम्. अन्यथा युद्धाय सिद्धो भव.

पुष्करः—(विचिन्त्य स्वगतम्) उक्तमेव किल मया पूर्वं "यदि देवी पणीक्रियते, तदा सर्वं राज्यं प्रतिपणीकृत्य क्रीडामि" इति. (प्रकाशम्) तथैव भवतु.

राजा—अक्षपेटिकामानयति. (उभौ क्रीडतः.)

ऋतुपर्णः—अहो! जितं जितं महाराजनलसार्वभौमेण.

पुष्क—(सभयमुत्थाय साञ्जलिबन्धम्) महाराज! क्षम्यतां क्षम्यताम्. कलिसाहाय्येन तदा त्वामक्षैरजयम्. इदानीं भवता पराजितोस्मि. तत्सर्वस्वं स्वीकृत्य क्वचिदवस्थातुमनुगृहाण माम्.

रा—(सदयम्) भ्रातः पुष्कर! कलेरेवात्र दोषो न कश्चिदपि तव. तत् कुलक्रमागते राज्ये स्थीयतां भवता.

ऋतु—अहो! अपकारिण्यप्यनुकम्पा महाराजस्य.

वैदर्भः—सद्योऽलङ्क्रियतां पुरं शुभकरी वाद्यावलि र्वाद्यतां
सज्जन्ताश्च सुवासिनीसमुदया आरार्तिकान्दोलने।
सर्वैरद्य महर्षिभिः प्रमुदितैस्सम्भूय निर्वर्त्यते
वत्सायाश्च विभोर्नलस्य च पुनःपट्टाभिषेकोत्सवः ॥१६

दे—(सहर्षम्) अहो! तात स्वयमेवमाज्ञापयन् प्रहर्षयति. महर्षेर्वामदेवस्य प्रसाद एषः.

(प्रविश्य वामदेवः) देवीं राजानञ्च भद्रासने समुपवेश्य सह महर्षिभिः मन्त्रपूतैस्तीर्थोदकैः सुवर्णकलशोद्धृतैरभिषिञ्चन् महाराज! भवद्दयितया महापतिव्रताशिरोमणिभूतया वने भवद्वृत्तनिवेदनाय प्रार्थितोहमिदानीं रूपकेणैवं तत्प्रादर्शयम्.

दे—सत्यंसत्यम्.

वाम—तदद्य सङ्गतयोर्युवयोरालोकनेन महतीं निर्वृतिं प्राप्तोस्मि. महाराज! त्वमिदानीमायुष्मता युवराजेनेन्द्रसेनेन प्रियया परिवारैश्च सह स्वीयां राजधानीं प्राप्य साम्राज्यमनुभवन् बह्वीस्समा स्सुखी भूयाः.

राजा—(सप्रश्रयं साञ्जलिबन्धश्च) अनुगृहीतोस्मि.

वाम—किन्ते भूयः प्रियमुपहरामि ?

रा—महर्षे ! किमितोपि मे प्रियमस्ति ? श्रूयताम्—

राज्यावाप्तिः पुत्रयोश्चापि योगः
पत्नीप्राप्तिः पूर्वरूपोपलब्धिः ।
नित्यं सत्प्रसादच्युतिस्ते प्रसादात्
सर्वं लब्धं किन्नु मे काङ्क्षणीयम् ॥ १७ ॥

तथापीदमस्तु. (भरतवाक्यम्)—

ब्राह्मण्यं परिपालयन्तु मुखजाः स्वीयान्स्मरन्तोऽन्वयान्
राजानः परिपालयन्तु पृथिवीं सत्यैकसन्धास्स्वयम् ।
स्वेस्वे कर्मणि सक्तिमेत्य कपटद्वेषौ त्यजन्तु प्रजाः
काले वर्षतु वारिदः क्षितितले सुख्यन्तु सर्वे जनाः ॥ १८

(इति निष्क्रान्तास्सर्वे.)

इति श्रीमन्महीशूर महाराज कृष्णराजेन्द्रास्थानी
महाविदुषा मण्डिकल् रामशास्त्रिणा
विरचिते भैमीपरिणय-
नाटके दशमोऽङ्कः.
समाप्तोऽयं ग्रन्थः
ओं तत्सत्.

रथीतरसगोत्रस्य रामनामककवेर्वचः ।
सम्मोदयतु चेतांसि साधु वा साधु वा सताम् ॥

अनुमोदपत्रिकाः.

(१)

अस्ति किल चिरपरिचितपाणिनीयकाणादजैमिनीयवैयासिकतन्त्रमर्यादः ध्वन्यलङ्कारपाकशय्यारीतिविभवमेधाचातुरीपरिपोषितसाहितीसम्मिलितकविकर्मसरणिसुधासारास्वादपरिपक्वधीः सुधीः राथीतरः प्रथिततरः कामं मण्डिकल्रामशास्त्रीति महाविद्वान् श्रीमन्महिशूरमहाराजास्थान्याम्.

अयं हि निजजनिं सफलीचिकीर्षुः चिराय सङ्कलिपतं भैमीपरिणयं नाम नाटकमासेचनकमास्पदं संप्रतिपन्ननाटकगुणानां बहुकालिदासदण्डिभवभूतिकृतिं सोत्साहं व्यातानीत्.

निबन्धोयं सरससरसीरुहनिवहः परं मिलिन्दनिकुरुम्बमिव सकलरसिकविद्वन्मानसकदम्बं नापि नानन्दयेन्नाम.

अहं तु महाराजमातुलेन श्रीकान्तराजेन प्रेरितः पर्यकलयं समग्रमदोनाटकम्.

कृतिरियं निरवद्या, गुणप्रचुरा, भावनासम्मोदकरी, नातिव्यासोद्वेगा, नसङ्कोचखिन्ना, प्रकृतगहनसुन्दरगम्भीरसन्दर्भविचित्रकल्पना, अत्यद्भुतस्वरूपेति च मनो मामकीनं निस्समममामोदमनुभवतीत्यलं विस्तरेण.

श्रीमन्महीशूरमहाराजास्थान धर्माधिकारी,

नवीनं, रामानुजाचार्यः २२-२-१९१४.

(२)

अथात्र कतिपयेभ्यो मासेभ्य आरभ्य श्रीमन्माण्डिकल् रामशास्त्रिप्रणीतं भैमीपरिणयनामकं नाटकं आमूलचूडमाकलितवतो मम मानसमहीतले लब्धात्मनः तत्प्रशंसनकुतूहलकन्दलस्य सफलीकरणायाद्यावसरो लब्धइति महान् मे मानसामोदः.

तत्र तावत्प्रमाणमूर्धन्यस्य श्रीमन्महाभारतस्य वनपर्वणि समुपश्लोकितमहिम्नो नलदमयन्तीनामकस्य कलिनाशनकीर्तनतया स्मर्यमाणस्य मिथुनस्य चरितं नाटकस्यास्य वस्तु संवृत्तमिति एतद्ग्रन्थस्यादर्तव्यतायां वस्तुकृतोऽतिशयो महीयान्. बीजीकृतस्योक्तमिथुनसम्बन्धिनः अन्योन्यालम्बनकानुरागस्य साङ्गेन सन्धिपञ्चकेन फलाधिगमः साधु समर्थितोऽत्र कविना. ग्रन्थेऽत्र नायकस्य रसस्य वा अननुगुणं किञ्चिदपि क्वापि न वर्णितम्. प्रत्युत नायकनीतिधर्मोत्कर्षस्य रसस्य च परिपोषणाय अनुगुणामितिवृत्तकल्पनामपि तत्रतत्र विधाय नानाप्रकारैरभिमतनिर्वाहस्सम्पादितः. किं बहुना सर्वथा दोषैरस्पृष्टः समवायवृत्त्या रसोपकारकैर्गुणैः संयोगवृत्त्या तदुपकारकैरलङ्कारैश्च सर्वतः परिकर्मितशरीरोयं सन्दर्भः सहृदयहृदयावर्जनपटीयानिति वक्तुं प्रसीदति मे मनः.

जागर्त्वस्य कवेर्यशश्चिर मिदंसूक्तिप्रकाण्डाश्रयात्
श्रीमत्कृष्णनृपालशेखरमणिः जीयात्समाश्शाश्वतीः ।
तस्यामोघकृपावलोकनबलादेषा कृतिस्सत्क्रियां
पूर्णां प्राप्य चिराय सर्वविदुषां कण्ठेषु हारायताम् ॥
इत्थं कृष्णमहीमहेन्द्रपरिषद्धर्माधिकारी तथा
तत्पौरस्त्यसमस्तकोशनिवहास्थानेऽग्रिमः पण्डितः ।
श्रीकट्टेनरसिंहवर्यगुरुराजोपात्तधी राघवे-
न्द्राचार्यो निजमाशयं सुविशदं प्रादुश्चरीकर्त्यसौ ॥

(३)

महीशूरमहाराजकृष्णराजमहीपतेः ।
आस्थान्यामधितिष्ठद्भिर्महाविद्वत्पदं चिरात् ॥ १ ॥
कविमार्गेषु निष्णातैर्मण्डिकल् रामशास्त्रिभिः ।
रचितं रसभावादिशोभितं लक्षणान्वितम् ॥ २ ॥
भैमीपरिणयाभिख्यं नाटकं समुदैक्षिषि ।
सर्वे शब्दाश्शास्त्रशिष्टाः प्रसिद्धाश्च प्रयोगतः ॥ ३ ॥
औचित्यशालिनश्चार्थाः सन्दर्भश्चातिसुन्दरः ।
किमत्र बहुनोक्तेन समासेनेदमुच्यते ॥ ४ ॥
वसन्तीह गुणास्सर्वे प्रबन्धोत्कर्षदायिनः ।
अपकर्षावहो दोषः कुत्रापि न मयेक्षितः ॥ ५ ॥

पाठयिता व्याकरणं संस्कृतविद्याऽऽलये महीशस्य ।
श्रीरामकृष्णशास्त्री कथयत्येवं प्रमोदेन ॥ ६ ॥

---

(४)

महीशूरनृपास्थानमहाविद्वत्पदाश्रितैः ।
मण्डिकल्रामशर्माह्वकविवर्यैर्विनिर्मितम् ॥ १ ॥
पुण्यश्लोकचरित्रेतिवृत्तं कलिमलापहम् ।
भरताद्यभियुक्तोक्तलक्षणैस्समलङ्कृतम् ॥ २ ॥
भैमीपरिणयं नाम नाटकं रसनिर्भरम् ।
आमूलादाग्रमैकाग्र्यात्सविमर्शं मया श्रुतम् ॥ ३ ॥
अदोषाश्शब्दार्थाः श्रवणमधुरा रीतिरुचिता
गुणालङ्कारश्रीजनितमहिमा व्यङ्ग्यसरणिः ।
गभीरस्सन्दर्भो रससमुचिता वृत्तिरखिला
पदानामन्योन्यं परममिह सख्यं च लसति ॥ ४ ॥
एवमाख्याति निर्व्याजं गुणप्रेरितमानसः ।
नृसिंहशर्मा हर्षेण हासनाभिजनस्सुधीः ॥ ५ ॥
